॥ अनेकमन्त्राः ॥

1225 A13. ANEKAMANTRA.

Substance—Palm leaf. Size—4½" × 2". Leaves—2. 12 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Mantras relating to various deities.

Beginning:

श्रीगुरुभ्यो नमः ।

असकलशशिराजन्मौलि.....द्वपाशा-
ङ्कुशरुचिरकराब्जा बन्धुजीवारुणाङ्गी ।
अमरनिकरवन्द्या त्रीक्षणा शोणलेपां-
शुककुसुमयुता स्यात्सम्पदे पार्वती वः ॥

अज ऋषिः । अतिनृचिच्छन्दः । गौरी देवता । ह्रीन्नमो ब्रह्म-श्रीराजिते ! राजपूजिते ! जये ! विजये ! गौरि ! गान्धारि ! त्रिभुवनवशङ्करि ! सर्वलोकवशङ्करि ! सर्वस्त्रीपुरुषवशङ्करि ! सुदुघे ! सुदुघे ! वा ह्रीं स्वाहा ॥

End:

नारद ऋषिः । गायत्री छन्दः । श्रीकृष्णो देवता । गोपीजन-वल्लभाय स्वाहा ।

वन्दे कुन्देन्दुगौरं करुणमरुणपाथोजपत्राभनेत्रं
चक्रं शङ्खं गदाब्जं निजभुजपरिघैरायतैरादधानम् ।
दिव्यैर्भूषाङ्गरागैर्विविधमणिलसन्मालया च प्रदीप्तं
द्योतत्पीताम्बराढ्यं मुनिभिरभिवृतं पद्मसंस्थं मुकुन्दम् ॥

Colophon:

Author:

Remarks—The work embodies verses of meditation on Gaurī, Vāsudeva, Sālagrāma etc.

॥ गायत्रीव्याख्या ॥

1225 A14. GĀYATRĪVYĀKHYĀ.

Substance—Palm leaf. Size—4½″×2″. Leaf—1.
11 lines per page and 16 letters per line.
Script—Malayāḷam. No. of Granthas—11.

Subject etc.—Same as No. 1213 A13.

॥ सप्तर्चम् ॥

1225 A15. SAPTARCAM.

Substance—Palm leaf. Size—4½″×2″. Leaf—1.
21 lines per page and 18 letters per line.
Script—Malayāḷam. No. of Granthas—12.

Subject—A panegyric of Pitṛdevas.

Beginning:

प्रीयन्ते पितरो येन जपेन नियमेन च ।
सप्तर्चं सम्प्रवक्ष्यामि सर्वकामप्रदं नृणाम् ॥
अमूर्तीनां मूर्तिमतां पितॄणां दीप्ततेजसाम् ।
नमस्यामि सदा तेषां ज्ञानिनां योगचक्षुषाम् ॥
इन्द्रादीनां च पितरो दक्षमारीचयोस्तथा ।
पितरस्सप्तर्षीणां च तान्नमस्यामि कामदान् ॥
मन्वादीनां सञ्जनितॄन् सर्वलोकनमस्कृतान् ।
तान्नमस्कुर्मि(?) सर्वान् वै पितॄन् जलसमुद्रयोः ॥
नक्षत्राणां ग्रहाणां च वस्वग्निपितरश्च ये ।
द्यावापृथिव्योश्च सदा नमस्येऽहं कृताञ्जलिः ॥

End :

नमःपितृगणेभ्यश्च सप्तभ्यो येऽभिसंस्थिताः ।
स्वयम्भुवे नमस्तुभ्यं ब्रह्मणे योगचक्षुषे ॥
एतदुक्तश्च सप्तर्चं देवर्षिगणसेवितम् ।
पवित्रं परमं ह्येतच्छ्रीमद्रक्षोघ्नमेव च ॥
एतेन विधिना ह्युक्तस्त्रीन् वरान् लभते नरः ।
भक्त्या परमया युक्तः श्रद्दधानो जितेन्द्रियः ॥
सप्तर्चन्तु जपेद्यस्य नित्यमेव समाहितः ।
सप्तद्वीपसमुद्रायाः पृथिव्या एकराड् भवेत् ॥

Colophon :

Author :

Remarks—At the close of the Ms. occur the following lines :

"ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । हरिर्देवता । माधवाय नमः । हृदयाय नमः । केशवाय नमः । शिरसे स्वाहा । नारायणाय नमः । शिखायै वषट् । अच्युताय नमः । नेत्राभ्यां वौषट् । विष्णवे नमः । अस्त्राय फट् । ध्यानम् " ॥

हरिः । श्रीगुरुभ्यो नमः । श्रीगणपतये नमः । श्रीसरस्वत्यै नमः । अविघ्नमस्तु ।

कटकस्सविता सिद्धिं प्रियङ्गुश्शशभृत्सुखम् ।
श्रीरुद्रो भूमिजो नाशं गोपुरं ज्ञः सुखं वदेत् ॥
लाङ्गुली वाक्पती राज्यं गोत्राय सित उत्तमम् ।
कुरङ्गः कलहं मन्दः कालोरे राहुबन्धनम् ॥
रोगाख्यो मरणं केतुः सुग्रीवप्रश्नमीरितम् ॥

The two closing leaves furnish the following account of *Sālagrāmas* and *Bimbas* preserved in *Tevārappura* and *Homappura* :—

പള്ളിദേവോപഹാരത്തിൽ ബിംബങ്ങളുടെയും സാളഗ്രാമങ്ങളുടെയും കണക്ക്.

	വക.
സ്വർണ്ണബിംബം (ശക്തിഗണപതി)	ഫ
ലക്ഷ്മീനാരായണം ഏകാസനത്തിൽ പ്രഭയും കൂട	ഫ
ബിംബം ആകെ സ്വർണ്ണവിഗ്രഹം	ഫ
സ്വർണ്ണയന്ത്രം നാരസിംഹം	ഫ
വെള്ളികൊണ്ടു് അനന്തശയനം ഏകാസക്തിഃ	ശ്രീയും
ഭൂമിയും ബ്രഹ്മനും കൂട വിഗ്രഹം	ഒന്ന
ശ്രീരാമനും സീതയും പ്രഭയും കൂടവിഗ്രഹം	ഒന്ന
വെണ്ണകൃഷ്ണനും പ്രഭയും കൂടവിഗ്രഹം	ഒന്ന
വേണുഗോപാലവും പ്രഭയും കൂടവിഗ്രഹം	ഒന്ന
കൊച്ചുകൃഷ്ണവിഗ്രഹം	ഒന്ന
ശ്രീരാമൻവിഗ്രഹം	ഒന്ന
ആകെ ബിംബവക(യിൽ	(ആറു)
സ്വർണ്ണയന്ത്രകൈമുട്ടു	ഒന്ന
ശിവലിംഗവക ഒടഞ്ഞു വെള്ളി കെട്ടിയ ലിംഗം	ഒന്ന
പാദത്തിൽ ഭിന്നംവന്ന ശിവലിംഗം	ഒന്ന
മയൂരാസനം പ്രഭയോടുകൂടിയ ബിംബം	ഒന്ന
കോദണ്ഡരാമം പ്രഭയോടുകൂടിയതു്	ഒന്ന
വെണ്ണകൃഷ്ണം	ഒന്ന

കല്ലുള്ളം ഹോമപ്പുരയിൽ ഇരുപ്പു്.

സാളഗ്രാമവക ഭൂവരാഹം	ഒന്ന
ലക്ഷ്മീനാരായണം	ഒന്ന

	വക
ഹിരണ്യഗർഭം മൂനത്തിൽ വെള്ളികെട്ടിയ ഹിരണ്യഗർഭം	ഒന്നു
പുരുഷോത്തമം	രണ്ടു
അനന്തപത്മനാഭം	രണ്ടു
ചക്രപാണി	ഒന്നു
വിഷ്ണുപഞ്ജരം	ഒന്നു
ഹയഗ്രീവം	ഒന്നു
ദധിവാമനം	ഒന്നു
ഗൌരീശിവനാഭം	ഒന്നു
വാമനം	ഒന്നു
സീതാരാമം	ഒന്നു
സന്താനഗോപാലം	ഒന്നു
ഈശാനം	ഒന്നു

കല്ലുളം പുരയിൽ ഇരുപ്പു.

ഹിരണ്യഗർഭം	ഒന്നു
ഭ്രുവരാഹം	ഒന്നു
പഞ്ചചക്രസീതാരാമം	ഫ
സുദർശനം	ഒന്നു
കാളിയമർദ്ദനം	ഒന്നു
ആകസാളഗ്രാമം മത്സ്യമൂത്തി	
ശ്രീരാമവിഗ്രഹം പ്രഭയോടു	ഒന്നു
വെള്ളികൊണ്ടു പ്രഭയൊള്ള സുബ്രഹ്മണ്യവിഗ്രഹം	ഒന്നു
പ്രഭയോടുള്ള വെണ്ണകൃഷ്ണൻ	ഒന്നു
സൂര്യകാന്തം	ഒന്നു
ബാണലിംഗം	ഒന്നു
പത്മനാഭവാധ്യാർ കൊണ്ടുകൊടുത്ത സാളഗ്രാമം ദേവദേവമൂത്തി	ഒന്നു
കൂമ്മമൂത്തി	ഒന്നു
കാളിയ മർദ്ദനം	ഒന്നു
ഗോപാലം	ഒന്നു
തിരുശരംകോട്ടിലിന്ന വന്ന മൂത്തിയളുടെ വക കൂമ്മമൂത്തി	ഒന്നു

	വക
ചതുശ്ചക്രസീതാരാമം	ഒന്നു
ലക്ഷ്മീനൃസിംഹം	ഒന്നു
ഗോപാലം	ഒന്നു
ബാലഗോപാലം	ഒന്നു
നാരായണക്ഷേത്രത്തിൽ ഹൃഷ്ടരാമമൂത്തി	ഒന്നു
ശിവനാഭം	രണ്ടു
ഗൌരീശിവനാഭം	ഒന്നു
സുദർശനം	ഒന്നു
കൃത്രിമഗോപാലം	ഒന്നു

॥ विष्णुपादादिकेशस्तवः ॥

1226. VIṢṆUPĀDĀDIKEŚASTAVA.

Substance—Palm leaf. Size—$3\frac{1}{2}'' \times 1''$. Leaves—39. 4—5 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—150. Incomplete.

Subject—Same as No. 1214.

Beginning—Same as No. 1146 H.

End:

मत्स्यः कूर्मो वराहो नृहरिवरवपुर्वामनो जामदग्न्यः
काकुत्स्थः कंसघाती मनसिजविजयी यश्च कल्की भविष्यन्।
विष्णोरंशावतारा भुवनाहितकरा धर्मसंस्थापनार्थाः
पायासुर्नस्त एते गुरुतरकरुणाभारखिन्नाशया ये ॥

यस्माद्वाचो निवृत्तास्सममपि मनसा लक्षणामीक्षमाणाः
स्वार्थालाभात् परार्थव्युपगमकथनश्लाघिनो वेदवादाः ।
नित्यानन्दं स्वसंविन्निरवधिविमलस्वान्तसङ्क्रान्तविम्ब-
च्छायावत्यापि नित्यं सुखयति यमिनो यस्तदव्यान्महो नः ॥

आपादादा च शीर्षाद्विपुरिदमनघं वैष्णवं यस्य चित्ते
नित्यं नित्यं निरस्ताखिलकलिकलुषे सन्ततान्तःप्रमोदः ।
जुह्वज्जिह्वाकृशानौ हरिचरितहविस्तोत्रमन्त्यानुपाठैः
स्तत्पादाम्भोरुहाभ्यां सततमपि नमः कुर्महे निर्मलाभ्याम् ॥

Colophon :

Author—Remarks—Same as No. 1146 H.

॥ विष्णुपादादिकेशस्तवः (सव्याख्यः) ॥

1227. VIṢṆUPĀDĀDIKEŚASTAVA with commentary.

Substance—Palm leaf. Size—8″ × 2″. Leaves—57. 8 lines per page and 20 letters per line Script—Malayāḷam. No. of Granthas—570.

Subject—Same as No. 1214.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

वन्देऽहं दक्षिणामूर्तिं कुन्दमन्दारसप्रभम् ।
सुप्रभं सुखसाम्राज्यसर्वधीनृत्तसाक्षिणम् ॥

व्याख्यानृत्तं निखिलविदुषां कुर्वती निर्विशङ्कं
यद्वाङ्नारी निगमभरतं निर्मलं योजयन्ती ।
विद्यारत्नं निजसुखकरं वेदलोकादवाप्त्
तं वन्देऽहं यतिवरवृतं सत्यशैलं यतीन्द्रम् ॥

यथा खलु कश्चिद् राजसेवाकारी पुरुषो राजधानीं तदमात्य-प्रकृतिजनप्रसादपुरस्सरमेव प्रविश्य तत्सेवां करोति, तद्वत् श्री-भगवत्पादः श्रीमत्पादादिकेशाख्यं स्तोत्रमारभमाणो भगवतो विष्णोः परिवारस्थानीयशङ्खचक्रादिप्रसादपूर्वकमेव तत्करणीय-मिति मन्वानस्तन्महीकरणं कुर्वन्नादौ पाञ्चजन्याख्यशङ्खराजमा-शीर्वादेन महीकरोति—

लक्ष्मीभर्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं
नीलाद्रेस्तुङ्गशृङ्गस्थितमिव रजनीनाथबिम्बं बिभर्ति ।
पायान्नः पाञ्चजन्यः स दितिसुतकुलत्रासनैः पूरयन् स्वै-
र्निर्घ्वानैर्नीरदौघध्वनिपरिभवदैरम्बरं कम्बुराजः ॥

End :

इदं वैष्णवं वपुर्नारायणीयं विग्रहं सन्ततान्तःप्रमोदस्सन् हर्षा-कुलान्तःकरणो भूत्वा स्वचित्ते ईदृशं चित्तमन्तर्निर्धारणयोग्यमिति दर्शयन् विशिनष्टि निरस्ताखिलकलिकलुष इति । निरस्तोऽखिलः कलिकलुषो यस्मात् तत् तथोक्तं तस्मिन् चित्ते धर्तुं शक्यमित्यर्थः ।

मोदात्पादादिकेशस्तुतिमिति रचितां कीर्तयित्वा त्रिधाम्नः
पादाब्जद्वन्द्वसेवासमयकृतनुतिर्मस्तकेनानमेद् यः ।
उन्मुच्यैवात्मनैनोनिचयकवचकं पञ्चतामेत्य भानो-
र्बिम्बान्तर्गोचरं सं प्रविशति परमानन्दमात्मस्वरूपम् ॥

श्रीमत्पादादिकेशं भुवनहितकरः शङ्करः प्राकरोद् य-
न्नत्वा तं पूर्वविद्यागतिवरतिलकं सत्यशैलं च भूयः ।
व्याख्यानं तस्य चक्रे मतिमलहतये दक्षिणामूर्तिमूर्तेः
कारुण्यात् प्रेक्षणीयं भवजलधिभयत्रस्तुभिः पण्डितौघैः ॥

Colophon :

Author—Text : Same as No. 1146 H.

Remarks—The commentary ends on the verse beginning with "आपादादः च शीर्षात्" The concluding portions of the text of No. 1146 H and of this work are different. The work is identical with No. 1226.

॥ विष्णुपादादिकेशस्तवः (सव्याख्यः) ॥

1228. VIṢṆUPĀDĀDIKEŚASTAVA
with commentary.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—70. 5—6 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—575. Complete.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1227.

॥ विष्णुपादादिकेशस्तवः (भक्तिमन्दाकिनीसहितः) ॥

1229. VIṢṆUPĀDĀDIKEŚASTAVA
with the commentary, Bhaktimandākinī.

Substance—Palm leaf. Size—8½" × 1⅜". Leaves—83.
11—14 lines per page and 32—36 letters per line.
Script—Malayāḷam. No. of Granthas—2100.

Subject—Same as No. 1214.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

जात्याख्यागुणकर्मवर्धिततया निर्गीतमप्यागमै-
र्जात्या यं पशुपालमात्मवचसः कृष्णं गृणन्त्याख्यया ।
श्रीशं ज्ञानिनमीश्वरं सुयशसं वीरं विरक्तं गुणै-
स्त्रातारं जगताञ्च कर्मभिरहो देवाय तस्मै नमः ॥

श्रीमच्छङ्करपूज्यपादरचितं पादादिकेशावधि-
स्तोत्रं दात्रमघस्य नेत्रममलं गात्रं हरेः प्रेक्षितुम् ।
व्याचिख्यासति मय्यहो सति सतामेषा विधां हासितुं
व्यक्तं भक्तिरथापि विष्णुपदयोः पुष्णाति मे धृष्णुताम् ॥

तत्र तावदात्मा वा अरे द्रष्टव्य इति स्वविहितस्यात्मदर्शनस्य साधनतया श्रुत्या श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति प्रतिपादितानां श्रवणमननिदिध्यासनानां मध्ये यमादिषडङ्गनिष्पाद्यस्य परमेश्वरैक्यानुभवसमाधिमातुर्निदिध्यासनस्य प्राधान्यम्।

तद्रूपप्रत्ययैकान्तसन्ततिश्चान्यनिस्पृहा ।
तद्ध्यानप्रथमैरङ्गैष्षड्भिर्निष्पाद्यते नृप ॥
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यः समाधिः सोऽभिधीयते ॥

लक्ष्मीभर्त्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं
नीलाद्रेस्तुङ्गशृङ्गस्थितमिव रजनीनाथबिम्बं विभाति ।
पायान्नः पाञ्चजन्यः स दितिसुतकुलत्रासनैः पूरयन्स्वै-
र्निर्घ्वानैर्नीरदौघध्वनि-परिभवदैरम्बरं कम्बुराजः ॥

End:

इत्थं पादादिकेशस्य भगवत्पादनिर्मितेः ।
भक्तिमन्दाकिनीं व्याख्यां चक्रे पूर्णसरस्वती ॥
मृद्वङ्घ्रिश्लिष्टजङ्घं विकटकटितटं निम्ननाभिस्थपद्मं
सत्कुक्षिव्यूढवक्षः पृथुलभुजमुरुस्कन्धमुद्दामकण्ठम् ।
बिम्बोष्ठं सुष्ठुगण्डं सितरदमरुणापाङ्गमुत्तुङ्गघोणं
शोणाक्षं सुभ्रुचोक्षालिकलुठदलकं पातु विष्णोर्वपुर्वः ॥

भक्तिर्विष्णुपदाम्बुजप्रणयिनी वाणी सुधावर्षिणी
...त प्रतिहस्तिमुक्तिविततरौ (?) यस्य प्रतीक्ष्यम्मतम् ।
व्याख्यानं वटमूलगस्य महसस्तस्यापि विस्मापनं
तं वन्दे यतिसिंहमागमफलक्षेमंकरं शङ्करम् ॥

Colophon:

इति पूर्णसरस्वत्याः कृतिः श्रीमत्पादादिकेशव्याख्या भक्तिमन्दाकिनी नाम संपूर्णा ॥

Author—Text: Śaṅkarācārya.

Com: Pūrṇasarasvatī.

Remarks—The following stanza denotes that the author's preceptor was Pūrṇajyotis:

यस्य श्रीमच्चरणरजसा येन कैङ्कर्यमूहे
धीश्रीवर्णस्तमनुसततं भूयते किंकरीभिः ।

कारुण्याब्धिः श्रुतिगिरिशिरःकेलिकण्ठीरवोऽसौ
पूर्णज्योतिर्जयति भगवान् पुण्यराशिर्गुरुर्मे ॥
श्रीगुरुभ्यो नमः ।

॥ विष्णुपादादिकेशस्तवः (केरलभाषाव्याख्योपेतः) ॥

1230. VIṢṆUPĀDĀDIKEŚASTAVA
with Malayāḷam commentary.

Substance—Palm leaf. Size—$8\frac{1}{4}'' \times 1\frac{7}{8}''$. Leaves—66. 7 lines per page and 20—28 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 1214.

Beginning :

हरिः श्रीमहागणपतये नमः ।

गुरुपादपयोजन्मप्ररूढो रेणुसञ्चयः ।
निर्मलीकुरुतान्नित्यं मन्मनोमणिदर्पणम् ॥

लक्ष्मीभर्त्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं
नीलाद्रेस्तुङ्गशृङ्गस्थितमिव रजनीनाथबिम्बं विभाति ।
पायान्नः पाञ्चजन्यः स दितिसुतकुलत्रासनैः पूरयन् स्वै-
र्निर्ध्वानैर्नीरदौघध्वनिपरिभवदैरम्बरं कम्बुराजः ॥

ആദിയിങ്കൽ (കവിഃ) മംഗലാത്ഥമായിട്ട് കവി ലക്ഷ്മീശബ്ദത്തെ ചൊല്ലിയതു്. അങ്ങനെയല്ലോമിരുന്ന കംബുരാജൻ നമ്മെ രക്ഷിച്ചുതാക. എങ്ങിനെ ഇരുന്നോനെന്നു് വിശേഷിക്കുന്നു പിന്നെ. ലക്ഷ്മീഭർത്താവിന്റെ ഭുജാഗ്രത്തിങ്കൽ കൃത

വസതിയായിരുന്നോന്നു് ശ്രീനാരായണന്റെ തൃക്കയ്യിൽ ഇരിക്കുംപോൾ യാവനൊരുത്തന്റെ രൂപം ഈവണ്ണം ശോഭിക്കുന്നതു് നീലപവ്തത്തിന്റെ ശൃംഗത്തിന്മേൽ ചന്ദ്രബിംബം സ്ഥിതി ചെയ്യുന്നതോ എന്നു് തോന്നും കണ്ടാൽ ചന്ദ്രനെപ്പോലെ ധവളമായിരിക്കുന്ന നിറത്തോടുകൂടിയിരിക്കയാൽ. പാഞ്ചജന്യമെന്നു് നാമത്തോടുകൂടിയിരുന്നോന്നു് ശംഖം പഞ്ചജനനാകുന്ന അസുരൻ ശംഖരൂപിയായി സമുദ്രത്തിൽ വസിച്ചിരുന്നവനെ നിഗ്രഹിച്ചു് അവിടെന്നു് ഭഗവാൻ ശംഖിനെ കൊണ്ടുപോന്ന ആകയാൽ പാഞ്ചജന്യമെന്ന പേർ.

End :

मोदात् पादादिकेशस्तुतिमिति रचितां कीर्तयित्वा त्रिधाम्नः
पादाब्जद्वन्द्वसेवासमयकृतनतिर्मस्तकेनानमेद्यः ।
उन्मुच्यैवात्मनैनोनिचयकवचकं पञ्चतामेत्य भानो-
र्बिम्बान्तर्गोचरं स प्रविशति परमानन्दमात्मस्वरूपम् ॥

यः त्रिधाम्नः पादादिकेशस्तुतिं कीर्तयित्वा पादाब्जद्वन्द्वसेवासमयकृतनतिः मस्तकेनानमेत् सः पञ्चतामेत्य भानोर्बिम्बान्तर्गोचरं परमानन्दम् (आत्मा?त्मना) प्रविशति ।

യാതൊരുത്തൻ ഇങ്ങനെ രചിതയായിരിക്കുന്ന പാദാദികേശസ്തുതിയെ കീർത്തിപ്പോറ്റഞ്ഞെയ്ത പാദാബ്ജസേവാസമയത്തിങ്കൽ കൃതനതിയായി മസ്തകംകൊണ്ടു് നമസ്കരിക്കുന്നതു് അവൻ പഞ്ചത്വത്തെ പ്രാപിച്ചാൽ അവൻ എനോനിചയകവചകം ദാരിദ്ര്യവ്യാധി പാപമാകുന്ന കവചത്തെ കളഞ്ഞു് ഭാനുവിന്റെ ബിംബാന്തർഗോചരമായിരിക്കുന്ന പരമാനന്ദസ്വരൂപത്തെ പ്രവേശിക്കുന്നോൻ. ആത്മാവിനെക്കൊണ്ടു് പരമാനന്ദസ്വരൂപത്തെ പ്രാപിക്കുന്നോൻ,

Colophon :

श्रीगुरुभ्यो नमः । श्रीपद्मनाभो रक्षतु । श्रीकृष्णाय परब्रह्मणे नमः । सोमेश्वरी रक्षतु ।

Author—Text : Śaṅkarācārya.

Remarks—The Ms. is in neat legible hand.

॥ विष्णुपादादिकेशस्तवः (केरळभाषाव्याख्योपेतः) ॥

1231. VIṢṆUPĀDĀDIKEŚASTAVA
with Malayāḷam commentary.

Substance—Palm leaf. Size—$10\frac{1}{8}'' \times 1\frac{3}{8}''$. Leaves—64. 6 lines per page and 28—30 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1230.

॥ विष्णुपादादिकेशस्तवः (केरळभाषाव्याख्योपेतः) ॥

1232. VIṢṆUPĀDĀDIKEŚASTAVA
with Malayāḷam commentary.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—35. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1230.

॥ विष्णुभुजङ्गप्रयातम् ॥

1233 A. VIṢṆUBHUJAṄGAPRAYĀTAM.

Substance—Palm leaf. Size—9″ × 1″. Leaves—3½. 4 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1169 H.

Remarks—The work commences on the Fol. marked with the letter-numeral ~~leaf~~ "ദ (9)". Nine leaves ("ശ്രീ" to "പ്ര") in the beginning are missing.

॥ शिवभुजङ्गप्रयातम् ॥

1233 B. SIVABHUJAṄGAPRAYĀTAM.

Substance—Palm leaf. Size—9″ × 1″. Leaves—3½. 4 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—25. Complete.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1172 R.

Remarks—In RCMPL, this work is wrongly styled Rāmabhujaṅgaprayāta.

॥ शनिस्तवः ॥

1233 C. ŚANISTAVA.

Substance—Palm leaf. Size—9″ × 1″. Leaves—8. 5 lines per page and 16—24 letters per line. Script—Malayāḷam. No. of Granthas—50. Complete.

Subject—Beginning : Same as No. 1164 A9.

End :

द्वादशैतानि नामानि प्रातरुत्थाय कीर्तयेत् ।
द्वादशाष्टमजन्मस्थोऽप्येकादशफलप्रदः ॥
विषमस्थोऽपि भगवान् सुप्रीतस्तस्य जायते ।
शनैश्चरभयं नास्ति लक्ष्मीमायुश्च विन्दति ॥

अश्वस्य कण्ठे शर(पा?चा)पहस्तं
तिष्ठन्तमीड्यं वरदं वरेण्यम् ।
शनैश्चरं भूतगणेश्वरेश्वरं
नमाम्यहं दुःखविनाशनाय ॥

Colophon :

शनिस्तवः समाप्तः । शनैश्चराय नमः ।

Author :

Remarks—The concluding portion of this work is different from that of No. 1164 A9.

॥ श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

1233 D. ŚRĪKṚṢṆĀṢṬOTTARA-ŚATANĀMASTOTRAM.

Substance—Palm leaf. Size—9″ × 1″. Leaves—4. 6 lines per page and 28—30 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as No. 1225 I.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

धरण्युवाच—

शेष शेष महाबाहो धृतास्मि तव मौलिभिः ।
पूतास्मि कृतकृत्यास्मि त्वयैव विधृता पुरा ॥

गङ्गाधरेण गङ्गेव धृता मूर्ध्ना प्रयाणतः ।
भगीरथतपःप्रीत्या हरेण विधृता पुरा ॥

महावराहेण पुरा दंष्ट्रा संकुचिता क्वचित् ।
धृता त्वया तु विस्तीर्णा शिरोभिर्लीलया सदा ॥

सहस्रमौलिमकुटं नानारत्नप्रभाङ्कितम् ।
बहुवर्णमये चित्रा जाता मौलौ चिरो ... ... ॥

मम भारावतारार्थमवतीर्णेन विष्णुना ।
सह त्वमवतीर्णोऽसि सर्व(था) सर्वमुक्तिषु ॥

शय्यासनपरीधानपादुकच्छत्रचामरैः ।
किन्नाभूत्तस्य कृष्णस्य मूर्तिभेदैश्च मूर्तिषु ॥

धरण्या देव देव्यैव सादरं पृच्छमानया ।
एवं निगदित शृण्वन् प्रणम्य प्रत्युवाच ताम् ॥

... ...

श्रीकृष्णः कमलानाथो वासुदेवः सनातनः ॥

End :

जपतां शृण्वतां चैव कोटिकोटिगुणं भवेत् ।
पुत्रप्रदं विपुत्राणामगतीनां गतिप्रदम् ॥
धनावहं दरिद्राणां जयेप्सूनां जयप्रदम् ।
शिशूनां च कुलानां च पुष्टिदं पूर्णपुण्यदम् ।
बालरोगग्रहादीनां शमनं शान्तिमत्तमम् ।
समस्तकामदं सद्यः कोटिजन्माघनाशनम् ॥
अन्ते कृष्णस्मरणदं भवतापत्रयापहम् ।
कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने ॥
नाथाय (रमणी? रुक्मिणी) शाय नमो वेदान्तवेदिने ।
इमं मन्त्रं महादेवि! जपन्नेव दिवानिशम् ॥
सर्वग्रहानुग्रहभाक् सर्वप्रियतमो नरः ।
पुत्रपौत्रैः परिवृतः सर्वसिद्धिसमृद्धिमान् ॥
निर्विश्य भोगानन्ते वै कृष्णसायुज्यमाप्नुयात् ।
(श्रीकृष्णसायुज्यमाप्नुयात्) ।

Colohpon :

Author :

Remarks—The leaves are worn out here and there. The work is not mentioned in RCMPL.

॥ श्रीरामाष्टोत्तरशतनामस्तोत्रम् ॥

1233 E. ŚRĪRĀMĀṢṬOTTARAŚATANĀMA-STOTRAM.

Substance—Palm leaf. Size—9″ × 1″. Leaves—3. 6 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—30. Incomplete.

Subject—Same as No. 1225 F.

Beginning:

हरिः ।

अथ वेदविदां श्रेष्ठं व्यासं तत्त्वार्थदर्शनम् ।
उवाच वचनं भीष्मो भक्तियुक्तः परन्तपः ॥
वेदागमपुराणेषु भिन्नार्थेष्वखिलेषु च ।
भवतः गदितं श्रेष्ठं यदेतच्छाश्वतं पदम् ॥
यन्नामस्मरणेनैव सर्वपापैः प्रमुच्यते ।
अनायासेन योजन्तः ? प्राप्नुयादव्ययं पदम् ॥
त(था ? दा)चक्ष्व मुनिश्रेष्ठ भुक्तिमुक्तिप्रदायकम् ।
एवमुक्तस्तु भीष्मेण महर्षिश्चिन्तयन् परम् ॥

End:

ध्यात्वा मुहूर्तं प्रोवाच हर्षव्याकुललोचनः ।
श्रीवेदव्यास उवाच ।
शृणु गाङ्गेय वक्ष्यामि रामस्याद्भुतकर्मणः ।
नामाष्टशतकं पुण्यं महापातकनाशनम् ॥
नातः परतरं पुण्यं त्रिषु लोकेषु विद्यते ।

कोसलेयः खरध्वंसी विराधवध(ख? प)ण्डितः ।
विभीषणपरित्राता दशग्रीवशिरोहरः ॥
सप्तसालप्रभेत्ता च हरकोदण्डखण्डनः ।
जामदग्न्यमहादर्पदलनस्ताटकान्तकृत् ॥
वेदान्तसारो वेदाङ्गो... ... ...

Colophon :

Author :

Remarks—The Ms. is partly decayed. Some verses given under No. 8984, DCSM. Vol. XVII are identical with this work. The Ms. is mis-titled as Rāmasahasranāmastava in RCMPL.

॥ विष्णुभुजङ्गप्रयातम् ॥

1234 A. VIṢṆUBHUJAṄGAPRAYĀTAM.

Substance—Palm leaf. Size—$10\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—2. 23 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1169 H.

॥ शिवभुजङ्गप्रयातम् ॥

1234 B. ŚIVABHUJAṄGAPRAYĀTAM.

Substance—Palm leaf. Size—$10\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—2,

25 lines per page and 30–34 letters per line. Script — Malayāḷam. No. of Granthas—25. Complete.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1172 R.

Remarks—The leaves are much damaged.

॥ विंशतिस्तवः ॥

1234 C. VIMŚATISTAVA.

Substance—Palm leaf. Size—$10\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—$4\frac{1}{2}$. 6 lines per page and 24 letters per line. Script — Malayāḷam. No. of Granthas—25. Complete.

Subject—Same as No. 1224.

Author :

Remarks—The Ms. otherwise known as Laghustuti is published as No. 60 in TSS. The subjoined colophon given under No. 9627, Vol. XVIII, DCSM. ascribes this composition to Kālidāsa:

इति श्रीमत्कविराजराजिमुकुटरत्नराजिनीराजितचरणारुणराजीवस्य राजेश्वरीकटाक्षलब्धनिखिलानवद्यविद्यस्य तत्रभगवतः श्रीकाळिदासस्य कृतिषु श्रीदेवीलघुस्तवः संपूर्णः ।

॥ विष्णुभुजङ्गप्रयातम् ॥

1235 A. VIṢṆUBHUJAṄGAPRAYĀTAM.

Substance—Palm leaf. Size—$8\frac{3}{8}'' \times 1\frac{3}{8}''$. Leaves—3. 6 lines per page and 24 letters per line. Script — Malayāḷam. No. of Granthas — 25. Complete.

Subject etc.—Same as No. 1169 H.

Remarks—The Ms. is partly worn out. The following verses occur after the colophon:

"कृपालो हरे केशवाशेषहेतो
जगन्नाथ विश्वेश्वरानन्दहेतो ।
विष्णो नमस्तुभ्यमित्यालपन्तं
सदा मां कुरु श्रीपतेस्त्वत्पदाम्भोजभक्तम् (?)॥

नमस्ते नमस्ते जगन्नाथ विष्णो
नमस्ते नमस्ते गदाचक्रपाणे ।
नमस्ते नमस्ते प्रपन्नार्तिहारिन्
समस्तापराधं क्षमस्वाखिलेश ॥

मुखे मन्दहासं करे चारुचक्रं
नखे चन्द्रभासं सुरेशाभिवन्द्यम्
भुजङ्गे शयानं हरेरन्यदेवं
त्वदन्यं शरण्यं न मन्ये न मन्ये ॥

भूयाद् भूयो द्विपक्षाभयवरदकरा तप्तकार्तस्वराभा
शुभ्राभ्राभेदयुग्मद्वयकरधृतकुम्भाद्भिरासिच्यमाना

रत्नौघाबद्धमौलिर्विमलतरदुकूलार्तवालेपनाढ्या
पद्माक्षी पद्मनाभोरसिकृतवसतिः पद्मगा श्रीः श्रियेवः ॥

॥ रामस्तवराजः ॥

1235 B. RĀMASTAVARĀJA.

Substance—Palm leaf. Size—$8\frac{3}{8}'' \times 1\frac{3}{8}''$. Leaves—9. 6—7 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—80. Complete.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1210 O.

Remarks—The names of 14 worlds are enumerated at the close of the Ms. RCMPL. notices the work as *Rāmanāmamāhātmya.*

॥ विष्णुसहस्रनामस्तवः ॥

1236. VIṢṆUSAHASRANĀMASTAVA.

Substance—Palm leaf. Size—$18'' \times 1\frac{3}{4}''$. Leaves—8. 6—7 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—185.

Subject—Same as No. 1214.

हरिः । श्रीगणपतये नमः । ओं नमो भगवते वासुदेवाय । ओं नमो भगवते पुरुषोत्तमाय । ओं नमः सर्वलोकगुरवे । ओं

नमः सर्वलोकपित्रे । ओं नमः सर्वलोकपितामहाय । ओं नमः सर्वलोकप्रपितामहाय । ओं नमः सर्वलोकप्रधानाय ।

* * * *

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥

End :

ईश्वर उवाच—

रामरामेति रामेति रमे रामे मनोरमे ।
श्रीसहस्रनामतस्तुल्यं श्रीरामनाम वरानने ॥

श्रीरामनामवरानन इति ।

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

इमं मन्त्रं महादेवि जपन्नेव दिवानिशम् ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥

श्रीविष्णुसायुज्यमाप्नुयात् ।

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश नारायण नमोस्तु ते ॥

Colophon :

Author :

Remarks—The front Fol. is numbered "मन" (11). The work forms a chapter in Anuśasanaparva of the Mahābhārata.

॥ विष्णुसहस्रनामावलिः ॥

1237. VIṢṆUSAHASRANĀMĀVALI.

Substance—Palm leaf. Size—$6\frac{1}{2}'' \times 2\frac{1}{4}''$. Leaves—22. 12 lines per page and 12 letters per line. Script—Nandināgarī. No. of Granthas—200. Complete.

Subject—Same as No. 1214.

Beginning:

श्रीसरस्वत्यै नमः । श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः । ओं विश्वाय नमः । ओं विष्णवे नमः ओं वषट्कराय नमः । ओं भूतभव्यभवत्प्रभवे नमः । ओं भूतकृते नमः । ओं भूतभृते... ...भावाय नमः । ओं भूतात्मने नमः । ओं भूतभावनाय नमः । ओं पूतात्मने नमः ।

End:

रथाङ्गपाणये नमः । अक्षोभ्याय नमः । सर्वप्रहरणायुधाय नमः ।

नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

Colophon:

श्रीविष्णोर्दिव्यसहस्रनाम संपूर्णम् ।

श्रीकृष्णार्पणमस्तु । ओं केशवाय नमः । ओं नारायणाय नमः । ओं माधवाय नमः । ओं गोविन्दाय नमः । ओं विष्णवे नमः । ओं मधुसूदनाय नमः । ओं त्रिविक्रमाय नमः ।

ओं वामनाय नमः । ओं मधुसूदनाय नमः । ओं श्रीधराय नमः । ओं हृषीकेशाय नमः । ओं पद्मनाभाय नमः । ओं दामोदराय नमः । ओं सङ्कर्षणाय नमः । ओं वासुदेवाय नमः । ओं त्रिविक्रमाय नमः । ओं वामनाय नमः । ओं प्रद्युम्नाय नमः । ओं अनिरुद्धाय नमः । ओं पुरुषोत्तमाय नमः । ओं अधोक्षजाय नमः । ओं नारसिंहाय नमः । ओं अच्युताय नमः । ओं जनार्दनाय । ओं उपेन्द्राय नमः । ओं हरये नमः । ओं श्रीकृष्णाय नमः । नामान्तरं संपूर्णम् ॥

श्रीकृष्णार्पणमस्तु ॥

Author:

Remarks—The Ms. is damaged.

॥ विष्णुसहस्रनामावलिः ॥

1238. VIṢṆUSAHASRANĀMĀVALI.

Substance—Palm leaf. Size—6½″ × 1¼″. Leaves—23. 8 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—200. Complete.

Subject—Same as No. 1214.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
ओं विश्वस्मै नमः । ओं विष्णवे नमः ।

End :

ओं क्षितीशाय नमः। पापनाशनाय नमः। ओं शङ्खभृते नमः। ओं नन्दकिने नमः। ओं चक्रिणे नमः। ओं शार्ङ्गधन्वने नमः। ओं गदाधराय नमः। ओं रथाङ्गपाणये नमः। ओं अक्षोभ्याय नमः। ओं सर्वप्रहरणायुधाय नमः। ओं नमो नारायणाय नमः।

Colophon :

ओं शुभमस्तु।

नाम्नां सहस्रं कृष्णस्य कृष्णेन लिखितं शिवम्।
चतुर्थ्यन्तं विधायाशु हरिमीडे मृदुस्मितम्॥

हरि हरि राम राम कृष्ण कृष्ण गोविन्द गोविन्द शिव शिव पुरुषोत्तम श्रीनारायण श्रीहरे मां पालय।

वृन्दावनजुषं कृष्णं वृन्दारकनिषेवितम्।
वृन्दैर्गवां सञ्चरन्तं वृतं गोपैर्भजे सदा॥

Author :

Remarks—The scribe's name is noted in the colophon.

॥ विष्णुसहस्रनामावलिः ॥

1239. VIṢṆUSAHASRANĀMĀVALI.

Substance—Palm leaf. Size—8″ × 1¾″. Leaves—11. 9 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—125, Incomplete.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1237.

End :

वनमालिने नमः । हलायुधाय नमः । आदित्याय नमः । ज्योतिरादित्याय नमः । सहिष्णवे नमः । गतिसत्तमाय नमः । ... ...

Colophon :

Author :

Remarks—The following appellations of Ganapati etc. are enumerated at the close of the work:

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
(देदो?लम्बो)दरश्च विकटो विघ्नराजो विनायकः ॥
धूमकेतुर्गणाध्यक्षः (ब?फा)लचन्द्रो गजाननः ।
वक्रतुण्डः (शुकण्डो?शूर्पकर्णो) हेरम्बः स्कन्दपूर्वजः ॥
षोडशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
सर्वसौभाग्यसिद्ध्यर्थं दीर्घमायुश्च विन्दति ॥

सुमुखाय नमः । एकदन्ताय नमः । कपिलाय नमः । गजकर्णकाय नमः । (देदो?लम्बो)दराय नमः । (कपिलाय?) नमः । विकटाय नमः । विघ्नराजाय नमः । विनायकाय नमः । धूमकेतवे नमः । गणाध्यक्षाय नमः । (बल?फाल)चन्द्राय नमः । गजाननाय नमः । वक्रतुण्डाय नमः । शूर्पकर्णाय नमः । हेरम्बाय नमः । स्कन्दपूर्वजाय नमः । सुब्रह्मण्यं प्रणमाम्यहम् । सर्वज्ञं सर्वसंपदं सर्वाभीष्टार्थसिध्यर्थं । प्रपक्षि नमः षोडशं प्रधम अशक्ता(?)त्मद्वितीयं स्कन्दमेव च (?) ।

अग्निगर्भं तृतीयन्तु बाहुलेयचतुस्तथा ।
(रोग?गां)गेयं पञ्चमं प्रोक्तं (शटं?शपष्ठं)शर(व)णो(भ?द्भ)वम् ॥
सप्तमं कर्त्युकेयश्च शूरञ्चमताथ ? ।
नवमं षण्मुखप्रोक्तं तारकारिमृतैदेश ? ॥
गेननीयं देशप्रोक्तगुहोद्वादशमव ।
चत्रयोदशब्रह्मचारि शिवथे जपतु देशपद्मदेश(?) ॥

॥ विष्णुसहस्रनामावलिः ॥

1240 A. VIṢṆUSAHASRANĀMĀVALI.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—12. 9—10 lines per page and 28—32 letters per line. Script — Malayāḷam. No. of Granthas—200. Complete.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1237.

Remarks—The following *śloka* occurs in the last Fol:

विश्वं वृषा च सन्धात्रे युगावीरः कपिस्तथा ।
श्रीवत्सवक्षाः सत्तायै अक्षोभ्यः स्वस्तिदः क्रमात् ॥

॥ कृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

1240 B. KṚṢṆĀṢṬOTTARAŚATANĀMASTOTRAM.

Substance—Palm leaf, Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaf—1,

10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—20. Complete.

Subject—Same as No. 1214.

Beginning:

श्रीकृष्णः कमलानाथो वासुदेवः सनातनः ।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥
श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः ।
चतुर्भुजात्तचक्रासिगदाशङ्खाद्युदायुधः ॥
देवकीनन्दनः श्रीशो नन्दगोपप्रियात्मजः ।
यमुनावेगसंहारी बलभद्रप्रियानुजः ॥

End:

काळीयफणमाणिक्यरञ्जितश्रीपदांबुजः ।
दामोदरो यज्ञभोक्ता दानवेन्द्रविनाशनः ॥
नारायणः परं ब्रह्म पन्नगाशनवाहनः ।
जलक्रीडासमासक्तगोपीवस्त्रापहारकः ॥
पुण्यश्लोकस्तीर्थपादो वेदवेद्यो दयानिधिः ।
सर्वतीर्थात्मकः सर्वग्रहरूपी परात् परः ॥

Colophon:

हरिः

Author:

Remarks—This work is not noticed in RCMPI.

॥ शिवाष्टोत्तरशतनामस्तोत्रम् ॥

1240 C. ŚIVĀṢṬOTTARAŚATANĀMASTOTRAM.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaf—$\frac{1}{2}$. 17 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—14.

Subject—Same as No. 1215 B.

Begininng :

शिवो महेश्वरः शंभुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥
शङ्करः शूलपाणिश्च खट्वांगी विष्णुवल्लभः ।
शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥
भवः शर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः ।
उग्रः कपाली कामारिरन्धकासुरसूदनः ॥

End :

अष्टमूर्तिरनेकात्मा सात्त्विकः शुद्धविग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचकः ॥
मृडः पशुपतिर्देवो महादेवोऽव्ययो हरः ।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः ॥
भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात् ।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ॥

Colophon :

Author :

Remarks—The following portion occurs after the close of the work:

नामत्रयमहामन्त्रस्य व्यासपराशरनारदाः ऋषयः । अनुष्टुप् छन्दः । गरुडारूढश्रीमहाविष्णुर्देवता । अच्युताय नमः । अङ्गुष्ठाभ्यां नमः । अनन्ताय नमः । तर्जनीभ्यां नमः । गोविन्दाय नमः । मध्यमाभ्यां नमः । गरुडारूढाय नमः । अनामिकाभ्यां नमः । शार्ङ्गधन्वने नमः । कनिष्ठिकाभ्यां नमः । महाविष्णवे नमः । करतलकरपृष्ठाभ्यां नमः । अच्युताय नमः । हृदयाय नमः । अनन्ताय नमः । शिरसे स्वाहा । गोविन्दाय नमः । शिखायै वषट् । गरुडारूढाय नमः । कवचाय हुम् । शार्ङ्गधन्वने नमः । नेत्रत्रयाय वौषट् । महाविष्णवे नमः । अस्त्राय फट् । ध्यानम् ।

अशुभमपनयन्तं पक्षजैः सामघोषै-
रचलमिव सपक्षं हैममारुह्य तार्क्ष्यम् ।
सजल इव पयोदः श्यामलः शार्ङ्गधन्वा
शमयतु परितापं सर्वमेत्य स्वयं नः ॥

श्रियः पतये नमः । हरये नमः ।

कोलम्बाब्दे धृतेन्दौ तिथिगुणितदिने ज्येष्ठमासे पुनर्व- ME. 869
स्वन्त्याङ्घ्रौ कर्कटान्त्ये सुरगुरुदिवसे युक्तशुक्लद्वितीये ।
जीर्णोद्धारप्रतिष्ठामरचयत महेशस्य मार्तण्डनाम्नो
माता मैत्रर्क्षजाता महिततमगुणश्रीरिलंबानगर्याः ॥

The last verse refers to the renovation of the celebrated Śivakṣetra at Iḷamba, near Āttingal, effected in 869 M. E. under the command of H. H. Mārtāṇḍavarma Maha Rāja's Queen-mother.

॥ विष्णुसहस्रनामावलिः ॥

1241 A. VIṢṆUSAHASRANĀMĀVALI.

Substance—Palm leaf. Size—5½″ × 1½″. Leaves—30. 6—8 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—200.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1237.

Author:

Remarks—The following remedy for the inguinal bubo is suggested at the close of the Ms.:—

"അരയാപ്പിന—പുളിയില ഇടിച്ചുപിഴിഞ്ഞു രണ്ടുനാഴിവെള്ളത്തിൽ നാഴി പശുവിൻപാലു വീഴ്ത്തി പിറേറദിവസം എട്ടത്താൽ ഉറഞ്ഞിരിക്കും. ആയതിനെ വസ്ത്രത്തിൽകെട്ടി നീരൊക്കെ വാൎന്നുപോയ പശുവിൻവെണ്ണയിൽ ചാലിച്ചിടുക. ഉടയും വറുന്നതെങ്കിൽ വറും."

॥ मङ्गलाष्टकम् ॥

1241 B. MAṄGALĀṢṬAKAM.

Substance—Palm leaf. Size—5½″ × 1½″. Leaves—4. 8 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject etc.—Same as No. 1169 F.

Remarks—The work is also known by the name Maṅgaḷastotrāṣṭaka.

॥ कृष्णकेशादिपादस्तवः ॥

1241 C. KṚṢṆAKEŚĀDIPĀDASTAVA.

Substance—Palm leaf. Size—5½" × 1½". Leaves—7. 7 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—40.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1146 L.

॥ दशावतारस्तोत्रम् ॥

1241 D. DAŚĀVATĀRASTOTRAM.

Substance—Palm leaf. Size—5½" × 1½". Leaves—2. 7 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—15.

Subject—Same as No. 1172 A14.

Beginning etc.—Same as No. 1172 A15.

Author :

Remarks — The subjoined lines occur after the close of the work :

मत्स्य कूर्म महाक्रोड नृसिंह वटुवामन ।
राम दाशरथे सीरिन् कृष्ण कल्किन् नमोऽस्तु ते ॥

अं कृष्णवर्णाय धात्रे केशवाय नमः । आं कनकवर्णायार्यम्णे नारायणाय नमः । इं श्यामवर्णाय मित्राय माधवाय नमः । ईं कर्पूरवर्णाय वरुणाय गोविन्दाय नमः । उं रक्तवर्णायांशाय विष्णवे नमः । ऊं धूम्रवर्णाय भगाय मधुसूदनाय नमः । एं

हरितवर्णाय विवस्वते त्रिविक्रमाय नमः। ऐं पिङ्गलवर्णायेन्द्राय वामनाय नमः। ओं अभ्रवर्णाय पूष्णे श्रीधराय नमः। औं मेघवर्णाय पर्जन्याय हृषीकेशाय नमः। अं पाण्डरवर्णाय त्वष्ट्रे पद्मनाभाय नमः। अः अञ्जनवर्णाय विष्णवे दामोदराय नमः।

ഇതു ദ്വാദശാദിത്യനാം ദ്വാദശനാമവും കൂടെ

॥ दशावतारस्तुतिः ॥

1241 E. DAŚĀVATĀRASTUTI.

Substance—Palm leaf. Size—$5\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—2. 8 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—175.

Subject—Same as No. 1172 A14.

Beginning :

श्रीकेशव नमस्तेऽस्तु मत्स्यरूप प्रसीद मे ।
श्रोत्रेणानुष्ठितं सर्वं तव पूजा भवेद्धरे ॥

नारायण नमस्तेऽस्तु कूर्मरूप प्रसीद मे ।
त्वगिन्द्रियकृतं सर्वं तव पूजा भवेद्धरे ॥

श्रीमाधव नमस्तेऽस्तु कोलरूप प्रसीद मे ।
चक्षुषानुष्ठितं सर्वं तव पूजा भवेद्धरे ॥

End :

हृषीकेश नमस्तेस्तु कल्किरूप प्रसीद मे ।
उपस्थेनानुष्ठितं सर्वं तव पूजा भवेद्धरे ॥

पद्मनाभ नमस्तेऽस्तु विराड्रूप प्रसीद मे ।
मनसानुष्ठितं सर्वं तव पूजा भवेद्धरे ॥

दामोदर नमस्तेऽस्तु त्रिगुणात्मन् प्रसीद मे ।
सर्वेन्द्रियैः कृतं सर्वं तव पूजा भवेद्धरे ॥

Colophon :

श्रीकृष्णाय नमः ।

Author :

Remarks—The Ms. is fairly accurate.

॥ विष्णुस्तवः ॥

1242 A. VIṢṆUSTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 16—17 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—40.

Subject—Same as No. 1214.

Beginning :

श्रीगणपतये नमः ।

योगेश्वर प्रसन्नात्मन् लोकानामभयङ्कर ।
भवार्णवे निमज्जन्तं मामुद्धर नमोऽस्तु ते ॥
सोत्कर्षादन्यमहसां सविशेषातिशायिक ।
तवैव भक्तकारुण्यपीयूषभरितेक्षण ॥
यद्वा समाधिभिश्चित्तसरोजस्फुटलक्षित ।
अतिमात्रेण भक्तानामनुग्रहविधायिना ॥
चरणाम्बुरुहद्वन्द्वं शरणं प्रवृणे तव ।
सञ्जातवृत्तिभिर्नित्यप्रवर्त्तित जगत्त्रय ॥
दुस्तरार्तिमहावर्तादुत विश्वं समुद्धर ।
सर्गे सर्गे श्रुतीस्ताश्च तदर्थांश्च प्रकाशयन् ॥

ताभिश्च तात्क्रियाभिश्च यज्ञसिद्धिं सुसाधयेत् ।
ब्रह्मकोशद्वयीगुप्त्यै ताश्च विद्यां विभावयन् ॥

End :

विज्ञानं यदिदं प्राप्तं यदिदं स्थानमार्जितम् ।
जन्मान्तरेऽपि मे देव मा भूदस्य परिक्षयः ॥
दुर्गतावपि जातायां त्वद्गतो मे मनोरथः ।
यदि नाशं न विन्देत तावताऽस्मि कृती सदा ॥
न कामकलुषं चित्तं न तु ते पादयोः स्थितम् ।
कामये वैष्णवत्वं तु सर्वजन्मसु केवलम् ॥
नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥
मनोवाक्कायचेष्टाः स्युर्ध्यानस्तुतिनमस्क्रियाः ।
देवेश कर्म सर्वं मे भवेदाराधनं तव ॥

Author :

Remarks — The following stanzas occur in the wake of the colophon :

समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥
आपद्घनध्वान्तसहस्रभानवः समीहितार्थार्पणकामधेनवः ।
समस्ततीर्थाम्बुपवित्रमूर्तयः पुनन्तु मां ब्राह्मणपादपांसवः ॥
आधिव्याधिहरं नृणां मृत्युदारिद्र्यनाशनम् ।
श्रीपुष्टिकीर्तिदं वन्दे विप्रश्रीपादपङ्कजम् ॥
विप्रौघदर्शनात्सद्यः क्षीयन्ते पापराशयः ।
वन्दनान्मङ्गलावाप्तिरर्चनादच्युतं पदम् ॥

तन्नस्समादिशोपायं येन ते चरणाब्जयोः ।
स्मृतिर्यथा न विरमेदपि संसारतामिह ॥
अशेषक्लेशशमन शेषपर्यङ्कशायिनम् ।
श्रीपुष्टिभ्यां शोभमानं पद्मनाभं नमाम्यहम् ॥

॥ विष्णुकवचम् ॥

1242 B. VIṢṆUKAVACAM.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 16 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—52.

Subject—Same as No. 1214.

Beginning:

श्रीविष्णुकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् च्छन्दः । श्रीनारायणो देवता ।

ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाकारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

ओन्नमो नारायणाय द्वादशवारं जपेत् ।
पूर्वतो मां हरिः पातु पश्चाच्चक्री च दक्षिणे ।
कृष्ण उत्तरतः पातु श्रीशो विष्णुश्च सर्वशः ॥
ऊर्ध्वं मां नन्दकी चाव्यादधस्ताच्छार्ङ्गभृत्सदा ।
पादौ पातु सरोजाङ्घ्रिर्जङ्घे पातु जनार्दनः ॥

जानुनी मे जगन्नाथ ऊरू पातु त्रिविक्रमः ।
गुह्यं पातु हृषीकेशः पृष्ठं पातु ममाव्ययः ॥
पातु नाभिं ममानन्तः कुक्षिं राक्षसमर्दनः ।
दामोदरो मे हृदयं वक्षः पातु नृकेसरी ॥

End :

करौ मे कालियारातिर्भुजौ भक्तार्तिभञ्जनः ।
कण्ठं काळाम्बुदश्यामः स्कन्धौ मे कंसमर्दनः ॥
नारायणोऽव्यान्नासां मे कर्णौ केशिप्रभञ्जनः ।
कपोलौ मेऽद्य वैकुण्ठो जिह्वां पातु दयानिधिः ॥
आस्यं दशास्यहन्ता च नेत्रे मे पद्मलोचनः ।
भ्रुवौ मे पातु भूमेशो ललाटं मे सदाच्युतः ॥
मुखं मे पातु गोविन्दश्शिरो गरुडवाहनः ।
मां शेषशायी सर्वेभ्यो व्याधिभ्यो भक्तवत्सलः ॥
पिशाचाग्निजलेभ्यो मां विप(ज्वो?ज्वः) पातु वामनः
सर्वेभ्यो दुरितेभ्यश्च पातु मां पुरुषोत्तमः ॥
इदं श्रीविष्णुकवचं सर्वमङ्गलदायकम् ।
सर्वरोगप्रशमनं सर्वशत्रुप्रणाशनम् ॥
एवञ्जपन् तपः काले ह्यात्मरक्षाकरं परम् ।
त्रिसन्ध्यं यः पठेच्छुद्धः सर्वत्र विजयी भवेत् ॥

Colophon :

विष्णुकवचं संपूर्णम् ।

Author :

Remarks—Same as No. 1241 E.

॥ विष्णुपञ्जरम् ॥

1242 C. VIṢṆUPAÑJARAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 18 lines per page and 30—32 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1064 E.

॥ विष्णुकेशादिपादान्तस्तुतिः ॥

1242 D. VIṢṆUKEŚĀDIPĀDĀNTASTUTI.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 18 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1146 L.

॥ रामचन्द्रस्तुतिः ॥

1242 E. RĀMACANDRASTUTI.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 22 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—20.

Subject—Same as No. 1225 F.

Beginning etc.—Same as No. 1169 I.

॥ हनुमत्पञ्चकम् ॥

1242 F. HANUMATPAÑCAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 16 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject etc.—Same as No. 1172 L.

Remarks—The work is not noticed in RCMPL.

॥ सुदर्शनकवचम् ॥

1242 G. SUDARŚANAKAVACAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 17 lines per page and 29 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject etc.—Same as No. 1210 F.

॥ गरुडनामाष्टोत्तरशतम् ॥

1242 H. GARUḌANĀMĀṢṬOTTARAŚATAM.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 18 lines per page and 27—32 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject etc.—Same as No. 1159.

Colophon :

इति रहस्ये ब्रह्माण्डपुराणे पार्वतीपरमेश्वरसंवादे गरुडनामाष्टोत्तरशतम् ।

Author :

Remarks—The work is indited in the form of a dialogue between Pārvatī and Parameśvara. It is borrowed from the Brahmāṇḍapurāṇa.

॥ गरुडस्तवः ॥

1242. I. GARUḌASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—$\frac{1}{3}$. 8 lines per page and 27—30 letters per line. Script—Malayāḷam. No. of Granthas—7.

Subject—Same as No. 1159.

Beginning :

कपिलाक्षं गरुत्मन्तं सुवर्णसदृशप्रभम् ।
दीर्घबाहुं बृहत्स्कन्धं नागाभरणभूषितम् ॥
अनन्तं वामकटकं यज्ञसूत्रं च वासुकिम् ।
तक्षकं कटिसूत्रञ्च हारं कार्कोटकं तथा ॥
पद्मं दक्षिणकर्णेऽपि महापद्मं तु वामतः ।
शङ्खपालं शिरः कृत्वा गुळिकन्तु भुजान्तरे ॥
एवं ध्यायेत् त्रिसन्ध्यं य आत्मानं पक्षिरूपिणम् ।
विषं विनाशयेत्क्षिप्रं वायुः शीघ्रमिवाम्बुजम् ॥

End:

यो विश्वप्राणभूतस्तनुरपि च हरेर्यानकेतुस्वरूपो
यं संचिन्त्यैव सद्यः स्वयमुरगवधूवर्गगर्भाः पतन्ति ।
चञ्चच्चण्डोरुतुण्डत्रुटितफणिव(सं?सा)रक्तपङ्काङ्कितास्यं
वन्दे छन्दोमयं तं खगपतिममलं स्वर्णवर्णं सुपर्णम् ॥

Colophon :

Author :

Remarks—The work forms a portion of the Ms. noticed under No. 1041.

॥ गरुडकवचम् ॥

1242 J. GARUḌAKAVACAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 16 lines per page and 26—28 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Same as No. 1159.

Beginning :

असौ विनायको जीयाद्विनतानन्दवर्धनः ।
यस्य स्कन्धतटी भाति दानवारिविराजिता ॥

इन्द्र उवाच

किं विद्वन्विप्रशार्दूल करुणालय काश्यप ।
येन सर्पा न बाधन्ते सर्वलोकांश्च सर्वदा ॥
तद् ब्रूहि मम सर्वज्ञ सर्वलोकप्रियङ्करम् ।
अनुग्रहाय सर्वेषां मानवानां विशेषतः ॥

काश्यपः

श्रृणु विद्वन्महाप्राज्ञ गुह्याद् गुह्यतरं परम् ।
एतत्सर्वेषु कालेषु रक्षाकरमनुत्तमम् ॥
विशेषात्तव देवेन्द्र वक्ष्येऽहं कवचोत्तमम् ॥

End:

यः पठेत्कवचं नित्यं भक्त्या परमयान्वितः ।
अतन्द्रः प्रयतो भूत्वा गरुडस्य जगत्पतेः ॥
तस्य नश्येत तत्क्षिप्रं विषं किल्बिषमेव च ।
श्रृणोत्यवहितो वापि विषमाशु विनश्यति ॥
अन्ये विषोद्भवा रोगा विलयं यान्त्यसंशयः ।
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥

Colophon:

गरुडकवचं समाप्तम् ।

Author:

Remarks—The work is composed in the form of a dialogue between Kāśyapa and Indra. As stated in RCMPL., it is borrowed from the Bṛhannāradīya but no confirmatory internal evidence is available.

॥ सौमित्रिकवचम् । [लक्ष्मण कवचम्]

1242 K. SAUMITRIKAVACAM.

Substance—Palm leaf, Size—7″ × 3″, Leaf—1,

16 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—28.

Subject— A panegyric of Lakṣmaṇa.

Beginning:

सौमित्रिकवचं वक्ष्ये यशःकीर्तिजयप्रदम् ।
दुर्गमे पथि दुर्गे च नराणां सर्वलक्षणम् ॥
भक्तकल्पतरुं देवं गौराङ्गं कञ्जलोचनम् ।
रामानुजं महावीरं लक्ष्मणं सर्वलक्षणम् ॥
इन्द्रजिद्वधकर्तारं पूर्णचन्द्रनिभाननम् ।
सर्वसद्गुणसम्पन्नं जितेन्द्रियगुणं विभुम् ॥
एकपत्नीव्रतं शुद्धं त्यक्तसर्वसुखास्पदम् ।
पीताम्बरधरं धीरं काकुत्स्थं करुणामयम् ॥
भक्तप्रियं सदा देवं परमानन्दविग्रहम् ।
योगीन्द्रं योगनाथञ्च तप्तचामीकरप्रभम् ॥
चतुर्दशसु वर्षेषु निराहारं तपस्विनम् ।
दीर्घपीनमहाबाहुं कन्दर्पाधिकसुन्दरम् ॥

End:

इत्येतद्यो जपेन्नित्यं कवचं लक्ष्मणस्य वै ।
कोटियज्ञफलं तस्य भवेदिह न संशयः ॥
वाञ्छितं फलमाप्नोति सर्वप्रियकरो भवेत् ।
शत्रुक्षयो भवेत्तस्य राजपीडा भवेन्न हि ॥
दुष्टा नैव समायान्ति ग्रहपीडा न विद्यते ।
वह्निचोरभयं तस्य गृहेषु च न जायते ॥
अनुकूलो भवेल्लोकेऽप्यऽचला कमलालया ।
धनपुत्रान्वितः सैष लोके भवति नान्यथा ।

पाठात्कवचराजस्य सुदुर्लभमनोरथम् ।
षण्मासाच्छ्रुते मर्त्यः कवचस्य प्रसादतः ॥
न भयं यमराजस्य लोकोः भवति निश्चितम् ॥
भुजे विलिख्य कवचं स्मरणे धारयेद्यदि ॥
स एव देवतुल्यस्तु सर्वतीर्थफलप्रदः ॥

Colophon:

इति श्रीनारदीयतन्त्रे श्रीलक्ष्मणकवचं सम्पूर्णम् ।

Author:

Remarks—The work is borrowed from the Nāradīyatantra.

॥ रामायणविंशतिः ॥

1242 L. RĀMĀYAṆAVIMŚATI.

Substance—Palm leaf. Size—7″ × 3″. Leaves—2. 16—17 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as No. 1225 F.

Beginning:

रक्षोराजबलावलेपपरिभूतामर्त्यसार्थार्थना-
माकर्ण्याखिललोकपालनकलाचातुर्यधुर्यो हरिः ।
मेदिन्यामरविन्दिनीप्रणयिनो वंशेऽवतीर्यानुजैः
कुर्वन्पूर्णमनोरथं दशरथं रामोऽनिशं पातु नः ॥

विश्वामित्रमनुव्रजन्पथि मुनेराकर्ण्य मन्त्रद्वयीं
नीत्वा तामथ ताटकां यमपुरीं दृष्ट्वाश्रमं वामनम् ।

लब्ध्वास्त्राणि दिवौकसां प्रमुदितः संप्राप्य सिद्धाश्रमं
हत्वा राक्षसपुङ्गवं क्रतुमवत्रामोऽनिशं पातु नः ॥

कृत्वा पादपयोजपांसुपटलैः शुद्धामहल्यां पुन-
स्तीर्त्वा स्वस्सारितं समेत्य मिथिलां भञ्जन्धनुः शाङ्करम् ।
तां सीतां परिणीय साधुविहितोद्वाहः सहैवानुजै-
र्जित्वा भार्गवमाव्रजन्निजपुरीं रामोऽनिशं पातु नः ।

End :

प्रेतेन्द्रेण सह प्रभातसमये सम्मन्त्रयन्नन्तरा
दुर्वासाभिगमात्प्रभिन्नसमये द्वारे स्थितं लक्ष्मणम् ।
आहन्तुं समुपाद्रवन्निजमहिम्नालीनमालोक्य तं
शत्रुघ्नं भरतं दधत्करयुगे रामोऽनिशं पातु नः ॥

संपूर्णे गगने विमाननिवहैर्भूम्यर्पितां जानकी-
माश्लिष्यन् विनिवर्तयन्ननुगतौ लङ्केन्द्रवातात्मजौ ।
सर्वैर्बन्धुजनैर्निमज्य सरयूतोयादनन्ताश्रमं
स्वं धाम प्रविशन् पतिस्त्रिजगतां रामोऽनिशं पातु नः ॥

Colophon :

श्रीमद्रामाङ्घ्रिपद्मस्मृतिसमयगळच्चारुसारस्वताढ्यै-
र्विद्वत्या साधुपद्यैर्विरचितमखिलं तस्य संक्षिप्य वृत्तम् ।
नित्यं भक्त्यावनम्रः स्मरति च पठति श्रावयन्यः शृणो(तु?ति)
प्रत्यग्ज्योतिःस्वरूपं व्रजति स परमानन्दसान्द्राभिरामम् ॥

Author :

Remarks—The following verse is quoted after the end :

फालोद्यद्घनघर्मबिन्दुमटनीन्यस्ताग्रहस्ताम्बुजं
मध्ये मुष्टिनिविष्टपञ्चपशरं बिभ्राणमन्यं करम् ।
वीरश्रीनखरक्षतैरिव नवैर्बाणव्रणैरङ्कितं
रामं देवमवस्थितं प्रणमत प्रोन्मथ्य लङ्केश्वरम् ॥

[एकश्लोकी रामायणम्
" भारतम्
" भागवतम्]

॥ रामायणभारतभागवतसंग्रहः ॥

1242 M. RĀMĀYAṆABHĀRATA-BHĀGAVATASAṄGRAHA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 9 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—7.

Subject—A compendium of the Rāmāyaṇa, the Bhārata & the Bhāgavata.

Beginning:

रामायणसंग्रहः ।

पूर्वं रामतपोवनानिगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसंभाषणम् ।
बालीनिग्रहणं समुद्रतर(ळं?णं) लङ्कापुरीदाहनं
पश्चाद्रावणकुंभकर्णनिधनम् एतद्धि रामायणम् ॥

भारतसंग्रहः ।

आदौ पाण्डवधार्तराष्ट्रजननं (दा?ला)क्षागृहे दाहनं
द्यूतस्त्रीकरणं वने विहरणं मात्स्यालये वर्तनम् ।
लीलागोग्रहणं रणावतरणं सन्धिक्रियाजृम्भणं
पश्चाद्भीष्मसुयोधनादिमरणम् एतन्महाभारतम् ॥

End :

भागवतसंग्रहः ।

आदौ देवकिदेवगर्भजननं गोपीगृहे वर्धनं
मायापूतनजीवितापहरणं गोवर्धनोद्धारणम् ।
कंसच्छेदनकौरवादिहननं कुन्तीसुतापालनम् ।
एवं भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ॥

Colophon :

Author :

Remarks—The whole text is quoted above.

॥ रामनामाष्टोत्तरशतम् ॥

1242_N. RĀMANĀMĀṢṬOTTARAŚATAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 19 lines per page and 29 letters per line. Script—Malayāḷam. No. of Granthas—35.

Subject—Same as No. 1225 F.

Beginning :

श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः ।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥
जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।
विश्वामित्रप्रियो दान्तः शरणत्राणतत्परः ॥
वालिप्रमथनो वादी सत्यवाक् सत्यविक्रमः ।
सत्यव्रतो व्रतधरस्सदा हनुमदाश्रयः ॥

कौसलेयः खरध्वंसी विराधवधपण्डितः ।
विभीषणपरित्राता दशग्रीवशिरोहरः ॥
सप्तसालप्रभेत्ता च हरकोदण्डखण्डनः ।
जामदग्निमहादर्पदलनस्ताटकान्तकः ।

End :

अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तरः ।
मायामानुषचारित्रो महादेवाभिपूजितः ॥
(जि?से)तुक्रुञ्जितवारीशः सर्वतीर्थमयो हरिः ।
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः ॥
सर्वयज्ञाधिपो यज्वा जरामरणवर्जितः ।
शिवलिङ्गप्रतिष्ठाता सर्वापगुणवर्जितः ॥
परमात्मा परब्रह्म सच्चिदानन्दविग्रहः ।
परंज्योतिः परंधाम पराकाशः परात्परः ॥
परेशः पारगः पारस्मर्वेदेवात्मको हरिः ।

Colophon :

Author :

Remarks—The work is almost identical with No. 1233 E.

॥ रामगृहद्वारस्तवः ॥

1242 O. RĀMAGṚHADVĀRASTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 14 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject—Description of the four main entrances to the palace of Rāma.

Beginning :

प्राग्द्वारे भवतः पदाम्बुजयुगं संसेवितुं सायुधः
सर्वज्ञैश्च मरुद्गणैश्च वसुभिस्सार्धं सहस्रेक्षणः ॥
त्वद्वेलामवलोकयन्सकुतुकं सन्तानपुष्पाञ्जलि-
स्तिष्ठत्यार्य रघुप्रवीर भवते विज्ञापयामि प्रभो ॥

धर्माधर्मविशेषविद्भिरनघैस्तैश्चित्रगुप्तादिभिः
प्राज्ञैः कालयमान्तकैः पितृपतिद्वारे शुभे दक्षिणे ।
कर्पूरागरुकुङ्कुमैर्मृगमदैस्सम्मिश्रगन्धोत्तमैः
पूर्णं रत्नघटं वहन् तव कृते सन्तर्पितुं तिष्ठति ॥

सिद्धैः साध्यगणैश्च पन्नगजनैर्मित्रेण साकं विभो
संप्रा(प्ते?प्तो) वरुणस्त्वदीयभवनद्वारे शुभे पश्चिमे ।
हाराद्याभरणानि रत्नखचितान्यादाय पादार्पणं
कर्तुं त्वत्समयं हि काङ्क्षति चिरं श्रीरामचन्द्र प्रभो ॥

यक्षैः किंपुरुषैस्तुरङ्गवदनैर्गन्धर्वविद्याधरैः
सेव्यो वैश्रवणः सुवर्णकमलान्यादाय तेऽप्युत्तरे ।
द्वारे तिष्ठति संशृणोत्यवसरं त्वन्नामचिन्तापरः
सीतानाथ विलोकयैनममलापाङ्गेन संगृह्यताम् ॥

End :

अनुजविटपमुख्यं जानकीदिव्यपुष्पं
सुरगणवरपत्रं लक्षितं मोक्षकामैः ।
सुरवरमुनिपक्षीधर्मकामार्थमोक्ष-
प्रवरफलयुतं तं रामवृक्षं नमामि ॥

Colophon :

Author :

Remarks—Same as No. 1141 E.

॥ रामध्यानम् ॥

1242 P. RĀMADHYĀNAM.

Substance—Palm leaf. Size—7″ × 3″. Leaves—2.
18 lines per page and 33 letters per line.
Script—Malayāḷam. No. of Granthas—75.

Subject—Meditation on Rāma.

Beginning :

अष्टौ विभूतीरहमाश्रितानां
संभावये स्वैरमितीव शंसन् ।
कराम्बुजे कल्पितबोधमुद्रः
करोतु भद्रं मम रामचन्द्रः ॥

सीतापतिं कमलपत्रविशालनेत्रं
रामं गुणाकरमनन्तगुणानुरक्तम् ।
इन्द्रादिदेवगणवन्दितपादपद्मं
नित्यं भजेऽहमसुरान्तकमप्रमेयम् ॥

लोकत्राणानुकारी दशवदनशिरःपङ्क्तिविच्छेदकारी
सीतासीमन्तकारी मणिमयमकुटो दिव्यकोदण्डधारी ।
लङ्कालङ्कारहारी भृगुतनयमनस्सर्वगर्वापहारी
श्रीरामः पापहारी शमयतु दुरितं भूमिभारापहारी ॥

End :

कोदण्डकोटिविनिवेशितबाहुदण्ड-
माखण्डलाद्यमरपातितपुष्पवर्षम् ।
आयोधनक्षितिरजःपरिधूसराङ्ग-
मव्यात् स्थितं रघुपतेरवसन्नशत्रोः ॥

शृङ्गारं क्षितिनन्दनाविहरणे वीर्यं धनुर्भञ्जने
कारुण्यं मुनिपोषणेऽद्भुतरसं बाणान् युधि स्थापने ।
हास्यं शूर्पणखामुखे भयमघे (?) बीभत्समन्यामुखे (?)
रौद्रं रावणमर्दने मुनिजने शान्तं वपुः पातु नः ॥

या कृपा मुनिसन्त्राणे या कृपा कपिनायके ।
या विभीषणरक्षायां सा रामं मम दीयताम् ॥

वैदेहीमधिरोप्य जातपुलकां वामाङ्गमाश्लेषिणीं
वामेन स्तनचूचुकं पुलकितं वामं करेण स्पृशन् ।
तत्वं दक्षिणपाणिना कलितया धीमुद्रया बोधयन्
रामो मारुतिसेवितः स्फुरतु मे साम्राज्यसिंहासने ॥

Colophon :

Author :

Remarks—The contents disclose that the work is a panegyric of Rāma.

॥ नवरत्नमालिका ॥

1242 Q. NAVARATNAMĀLIKĀ.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1,

14 lines per page and 31—33 letters per line.
Script—Malayāḷam. No. of Granthas—15.

Subject—Same as No. 1224.

Beginning :

ओङ्कारपञ्जर शुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥
दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां सङ्गीतमातृकां वन्दे ॥
श्यामलिमसौकुमार्यां सौन्दर्यानन्दसंपदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वन्दे ॥
नखमुखमुखरितवीणानादरसास्वादनवनवोल्लासम् ।
मुखमम्ब मोदयतु मां मुक्ताताटङ्कमुग्धहसितं ते ॥
सरिगमपधनिरतान्तां वीणासंक्रान्तकान्तहस्तां ताम् ।
शान्तां मृदुलस्वान्तां कुचभरतान्तां नमामि शिवकान्ताम् ॥

End :

अवटुतटघटित(धूचू)लीताडिततालीपलाशताटङ्काम् ।
वीणावादनवेळाकम्पितशिरसं नमामि मातङ्गीम् ॥
वीणारसानुषङ्गं विकचमदामोदमाधुरीभृङ्गम् ।
करुणापूरतरङ्गं कलये मातङ्गकन्यकापाङ्गम् ॥
मणिभङ्गमेचकाङ्गीं मातङ्गीं नौमि सिद्धमातङ्गीम् ।
यौवनवनसारङ्गीं सङ्गीताम्भोरुहानुभवभृङ्गीम् ॥
मेचकमासेचनकं मिथ्यादृष्टान्तमध्यभागान्तम् ।
मातस्तव स्वरूपं मङ्गलसङ्गीतसौरभं वन्दे ॥

Colophon :

नवरत्नमाल्यमेतद्रचितं मातङ्गकन्यकाभरणम् ।

यः पठति लिखति सततं स भवेद्वागीश्वरीमुखः साक्षात् ॥

Author :

Remarks—In RCMPL. the authorship of the work is ascribed to Śrī Śaṅkarācārya, but there is no internal evidence lending support to this view.

॥ सुब्रह्मण्यभुजङ्गप्रयातम् ॥

1242 R. SUBRAHMAṆYABHUJAṄGA-PRAYĀTAM.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 19 lines per page and 31—33 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as No. 1155 B.

Beginning:

गणेशं नमस्कृत्य गौरीकुमारं गजास्यं गुहस्याग्रजातं गभीरम् ।
प्रलम्बोदरं शूर्पकर्णं त्रिणेत्रं प्रवक्ष्ये भुजङ्गप्रयातं गुहस्य ॥

पृथक् पट्टकिरीटस्फुरद्दिव्यरत्नप्रभाक्षिप्तमार्ताण्डकोटिप्रकाशम् ।
चलत्कुण्डलोद्यत्सुगण्डस्थलान्तं महानर्घ्यहारोज्ज्वलत्कम्बुकण्ठम् ॥

शरत्पूर्णचन्द्रप्रभाचारुवक्त्रं विराजल्ललाटं कृपापूर्णनेत्रम् ।
लसद्भ्रूसुनासापुटं विद्रुमोष्ठं सुदन्तावलीसुस्मितं प्रेमपात्रम् ॥

द्विषड्बाहुदण्डाङ्गदैर्दीप्यमानं क्वणत्कङ्कणालङ्कृतोदारहस्तम् ।
लसन्मुद्रिकारत्नराजत्कराग्रं रणत्किङ्किणीरम्यकाञ्चीकलापम् ॥

End :

त्वदन्यं परं दैवतं नाभिजाने प्रभो पाहि संपूर्णदृष्ट्यानुगम्यम् ।

यथाशक्ति भक्त्या कृतं स्तोत्रमेकं भुजङ्गं विभो मेऽपराधं क्षमस्व ॥

Colophon :

भुजङ्गाकृति त्वत्प्रियार्थं मयेदं भुजङ्गप्रयातेन वृत्तेन कल्पम् ।
तव स्तोत्रमेतत्पवित्रं सुचित्रं परानन्दसन्दोहसंवर्धनञ्च ॥
इदं तारकारेर्गुणस्तोत्रराजं पठन्ति त्रिकाले प्रपन्ना जना ये ।
सुपुत्राष्टभोगानिह त्वेव भुक्त्वा लभन्ते तदन्ते परं स्वर्गभोगम् ॥

Author :

Remarks—The whole text is composed in Bhujaṅga-prayāta metre.

॥ गायत्रीरामायणम् ॥

1242 S. GĀYATRĪRĀMĀYAṆAM.

Substance—Palm leaf. Size—7″×3″. Leaf—1. 19 lines per page and 31 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject—The quintessence of the Rāmāyaṇa.

Beginning :

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥
स हत्वा राक्षसान् सर्वान् यज्ञघ्नान्रघुनन्दनः ।
ऋषिभिः पूजितस्सम्यग्यथेन्द्रो विजयी पुरा ॥
विश्वामित्रस्तु धर्मात्मा श्रुत्वा जनकभाषितम् ।
वत्स राम धनुः पश्य इति राघवमब्रवीत् ॥

तुष्टावास्य तदा वंशं प्रविश्य स विशां पतेः ।
शयनीयं नरेन्द्रस्य तदासाद्यावतिष्ठत ॥

वनवासं हि संख्याय वासांस्याभरणानि च ।
भर्तारमनुसञ्छन्त्यै सीतायै श्वशुरो ददौ ॥

राजा सत्यश्च धर्मश्च राजा कुलवतां कुले ।
राजा माता पिता चैव राजा हितकरो नृणाम् ॥

End :

धर्मात्मा राक्षसश्रेष्ठः संप्राप्तोऽयं विभीषणः ।
लङ्कैश्वर्यं ध्रुवं श्रीमानयं प्राप्तो ह्यकण्टकम् ॥

यो वज्रपाताशनिसन्निपाता-
न्न(चे?चु)क्षुपे नापि चचाल राजा ।
स रामबाणाभिहतो भृशार्त-
श्चाल चापञ्च मुमोच वीरः ॥

यस्य विक्रममासाद्य राक्षसा निधनं गताः ।
तं मन्ये राघवं वीरं नारायणमनामयम् ॥

न ते ददृशिरे रामं दहन्तं हरिवाहिनीम् ।
मोहिताः परमास्त्रेण गान्धर्वेण महात्मना ॥

प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली ।
बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपतः ॥

चलनात्पर्वतेन्द्रस्य गणा देवास्सकम्पिताः ।
तदापि पार्वती चापि तदाश्लिष्टा महेश्वरम् ॥

दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादनभोजनम् ।
सर्वमेवाविभक्तन्नो भविष्यति हरीश्वर ॥

यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत् ॥
तामेव रात्रिं सीतापि प्रासूत दारकद्वयम् ॥

Colophon :

इदं रामायणं दिव्यं गायत्रीबीजसंहितम् ।
त्रिसन्ध्यं यः पठेन्नित्यं सर्वपापैः प्रमुच्यते ॥

Author :

Remarks—The title, Gāyatrīrāmayaṇa, is based on RCMPL. while the Ms. is labelled as 'Gāyatryakṣaraśloka. The work contains 24 verses whose initial letters go to form the Gayatrī.

॥ वागीश्वरीस्तवः ॥

1242 T. VĀGĪŚVARĪSTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 18 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject etc.—Same as No. 1147 C.

॥ कनकधारास्तवः ॥

1242 U. KANAKADHĀRĀSTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 17 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject etc.—Same as No. 1147 D.

॥ कृष्णनामाष्टोत्तरशतम् ॥

1242 V. KṚṢṆANĀMĀṢṬOTTARAŚATAM.

Substance—Palm leaf. Size—7" × 3". Leaf—1. 17 lines per page and 23 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Same as No. 1214 A.

Beginning etc.—Same as No. 1240 B.

॥ हनुमन्मन्त्रः ॥

1242 W. HANUMANMANTRA.

Substance — Palm leaf. Size—7" × 3". Leaf—1. 6 lines per page and 29 letters per line. Script—Malayāḷam. No. of Granthas—5.

Subject—Same as No. 1172 L.

Beginning :

भयभञ्जनहनुमन्मन्त्रस्य ईश्वर ऋषिः । अनुष्टुप्च्छन्दः । हनूमान्देवता । हं बीजं स्वाहा शक्तिः हां हृद, हीं शिर हूं शिखा हैं कवचा हौं नेत्रत्रयाय हः अस्त्राय ।

ध्यानम् ।

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥

End :

वामे हस्ते समाकृष्य दशास्यभुजमण्डलीम् ।
उद्यद्दक्षिणदोर्दण्डं हनूमन्तं विचिन्तये ॥
इति मन्त्रः । द्वादशवारं जपेत् ।

Colophon :

Author :

Remarks—The portion quoted above comprises the whole text.

॥ हनुमद्द्वादशकम् ॥

1242 X. HANUMADDVĀDAŚAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 20 lines per page and 29 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject etc.—Same as No. 1210 U.

॥ हनुमद्भुजङ्गप्रयातम् ॥

1242 Y. HANUMADBHUJAṄGAPRAYĀTAM.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 17 lines per page and 29 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Same as No. 1172 L.

Beginning:

स्फुरद्विद्युदुल्लासवालाग्रघण्टा-
घणात्कारनादप्रबद्धाट्टहासम् ॥
भजे वायुसूनुं भजे रामदूतं
भजे वज्रदेहं भजे भक्तबन्धुम् ॥

प्रपन्नानुरागं प्रभाकाञ्चनाङ्गं
जगद्गीतशौर्यं तृणीभूतहेतिम् ।
रणोद्यद्विभूतिं भजे वायुपुत्रं
..... पवित्रात्पवित्रम् ॥

भजे हेमरम्भावने नित्यवासं
भजे बालभानुप्रभाचारुभासम् ।
भजे चान्द्रिकाकुन्दमन्दारहासं
भजे सन्ततं रामभूपालदासम् ॥

End:

नमस्ते महासत्त्ववाहाय तुभ्यं
नमस्ते महाकालकालाय तुभ्यम् ।
नमस्ते महाशौर्यशौर्याय तुभ्यं
नमस्ते महावज्रदेहाय तुभ्यम् ॥

नमस्ते महा ? फलीभूतसूर्याय तुभ्यं
नमस्ते सदाब्रह्मचर्याय तुभ्यम् ।
नमस्ते सदात्माञ्जनेयाय तुभ्यं
....

जितारातिजालं समालोलबालं
गुणाधीतसारं गणाधीशरूपम् ।

शिवाकारमेकं सदा वेदसारं
मुदा कामरूपं भजे रामदूतम् ॥

Colophon :

हनूमद्भुजङ्गं समाप्तम् ।

Author :

Remarks—The work is composed in Bhujaṅga-prayāta metre.

॥ शिवस्तवः ॥

1242 Z. ŚIVASTAVA.

Substance — Palm leaf. Size—7" × 3". Leaf—1. 15 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—13.

Subject—Same as No. 1215 B.

Beginning :

विश्वेश्वराय नरकार्णवतारणाय
ज्ञानप्रदाय करुणामृतसागराय ।
कर्पूरकुन्दधवळेन्दुजटाधराय
दारिद्र्यदुःखदहनाय नमश्शिवाय ॥

भक्तप्रियाय भवरोगभयापहाय
दिव्यादिदिव्यवसनाय गुणार्णवाय ।
तेजोमयाय निखिलाङ्गसमास्थिताय
दारिद्र्यदुःखदहनाय नमश्शिवाय ॥

बाणप्रियाय भवसागरनाशनाय
कालान्तकाय कमलप्रियपूजिताय ।
नेत्रत्रयाय शुभलक्षणलक्षिताय
दारिद्र्यदुःखशमनाय नमश्शिवाय ॥

End :

गौरीप्रियाय शशिराजकलाधराय
कालान्तकाय भुजगाधिपकङ्कणाय ।
गङ्गाधराय गजराजविमर्दनाय
दारिद्र्यदुःखदहनाय नमश्शिवाय ॥

चर्माम्बराय शवभस्मविलेपनाय
फालेक्षणाय फणिकुण्डलमण्डिताय ।
मञ्जीरपादयुगलाय महेश्वराय
दारिद्र्यदुःखदहनाय नमश्शिवाय ॥

मुक्ताय यज्ञफलदाय वरप्रदाय
गीतप्रियाय वृषभध्वजवाहनाय ॥
मातङ्गचर्मवसनाय महेश्वराय
दारिद्र्यदुःखदहनाय नमश्शिवाय ॥

Author :

Remarks—The work almost resembles No. 1172 U.

॥ शिवपादादिकेशस्तवः ॥

1242 A1. ŚIVAPĀDĀDIKEŚASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—4½.

16 lines per page and 27 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1210 W.

Remarks—The verse beginning with 'निसर्गभक्तीन्दु—' in No. 1210 W, is missing herein.

॥ महिम्नःस्तवः ॥

1242 A2. MAHIMNASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—2½. 16 lines per page and 31 letters per line. Script—Malayāḷam. No. of Granthas—75.

Subject etc.—Same as No. 1146 D.

॥ शिवकेशादिपादस्तवः ॥

1242 A3. ŚIVAKEŚĀDIPĀDASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—3½. 16 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—95.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1154 C.

॥ कारस्करेशस्तवः ॥

1242 A4. KĀRASKAREŚASTAVA.

Substance — Palm leaf. Size—7″×3″. Leaf—1. 16 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Eulogy of Śiva, as resident of Kāraskara forest.

Beginning:

धत्ते मूर्ध्नामलकमनिशं यः सहस्राक्षसेव्यः
पथ्याराध्यो य इह मुनिभिस्साधुसाष्टाङ्गयोगे ।
दोषोत्पेषोपकरणचणं तं गृहीतौषधीशं
नित्यं कारस्करवनजुषं वैद्यमाद्यं प्रपद्ये ॥

योऽयं नेत्राञ्चलसमुदितस्नेहपाकेन भक्त-
व्याधिव्रातप्रशमनविधिं संविधत्ते नितान्तम् ।
पादाम्भोजद्वितयविसरच्चूर्णलेशेन चैनं
नित्यं कारस्करवनजुषं वैद्यमाद्यं प्रपद्ये ॥

End:

श्यामा शश्वद्भवति गृहिणी यस्य पुत्रौ कुमारौ
मुक्ताशङ्खस्फटिकरुचिरो यः स्वयं तत्वसाक्षी ।
अव्युच्छिन्नं सुखमनुभवन् भाति यस्तं शरण्यं
नित्यं कारस्करवनजुषं वैद्यमाद्यं प्रपद्ये ॥

अष्टश्लोकीमनुदिनमुपस्यस्ततन्द्रं पठेद्य-
स्तस्य प्रीतो भवति भगवानाशु कारस्करेशः ।

अर्थारोग्यप्रियसुतयशोवेश्मभार्यादिसौख्यं
तस्मिन्प्रीते सति तनुभृतां मुक्तिदे दुर्लभं किम् ॥

कारस्करारण्यनिकेतवासिल्लोकत्रयाधीश दयाम्बुराशे ।
नतोऽस्म्यहं ते चरणारविन्दं गौरीपते मां परिपाहि रोगात् ॥

Colophon :

Author :

Remarks—The forest of Kāraskara may probably be identified with Vaithīśvarancoil in Tanjore District wherein Vaidyanāthakṣetra is situated.

॥ शिवभुजङ्गप्रयातम् ॥

1242 A5. ŚIVABHUJAṄGAPRAYĀTAM.

Substance—Palm leaf. Size—7″ × 3″. Leaves—2. 16 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as No. 1215 B.

Beginning :

गळद्दानगण्डं मिलद्भृङ्गषण्डं
चलच्चारुशुण्डं जगत्त्राणशौण्डम् ।
कनद्दन्तकाण्डं विपद्भङ्गचण्डं
शिवप्रेमपिण्डं भजे वक्रतुण्डम् ॥

अनाद्यन्तमाद्यं परं तत्त्वमर्थं
चिदाकारमेकं तुरीयं त्वमेयम् ।

हरिब्रह्ममृग्यं परब्रह्मरूपं
मनोवागतीतं महः शैवमीडे ॥

स्वशक्त्यादि शक्त्यान्त? सिंहासनस्थं
मनोहारिसर्वाङ्गरत्नादिभूषम् ।
जटाहीन्दुगङ्गास्थिशम्याकमौलिं
पराशक्तिमित्रं नमः पञ्चवक्त्रम् ॥

End—Colophon—Same as No. 1172 R.

Remarks—The printed edition of this work is based on a copy of this Ms.

॥ शिवाष्टकम् ॥

1242 A6. ŚIVĀṢṬAKAM.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 15 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject—Same as No. 1215 B.

Beginning :

आशावशादष्टदिगन्तराळ-
देशान्तरभ्रान्तमशान्तबुद्धिम् ।
आकारमात्रादवनीसुरं मा-
मकृत्यकृत्यं शिव पाहि शंभो ॥

संसारमायाजलधिप्रवाह-
सुमग्नमुद्भ्रान्तमनन्तबुद्धिम् ।

त्वत्पादसेवामनसं सकामं
सुदुर्जनं मां शिव पाहि शंभो ॥

End :

अन्यायवित्तार्जनसक्तचित्त-
मन्यासु नारीष्वनुरागवन्तम् ।
अन्यान्नभोक्तारमशुद्धदेह-
माचारहीनं शिव पाहि शम्भो ॥

पापात्तितापत्रयभोगदेहं
परां गतिं गन्तुमुपायवर्जम् ।
परावमानैकपरात्मबोधं
नराधमं मां शिव पाहि शम्भो ॥

पिता यथा रक्षति पुत्रमीश
जगत्पिता त्वं हि जगत्सहायः ।
कृतापराधं तव सर्वकार्ये
दयानिधे मां शिव पाहि शम्भो ॥

Colophon :

अगस्त्याष्टकमिदं पुण्यं यः पठेच्छिवसान्निधौ ।
तस्य मृत्युभयं नास्ति शिवलोके महीयते ॥

Author—Agastya.

Remarks—The work is well-known by the title, Agastyāṣṭaka.

॥ शास्तृस्तवः ॥

1242 A7. ŚĀSTṚSTAVA.

Substance—Palm leaf, Size—7" × 3", Leaf—1.

16 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject—A eulogy of Śāsta.

Beginning :

आश्यामकोमळविशालतनुं विचित्र-
वासो वसानमरुणोत्पलमानहस्तम् ।
उत्तुङ्गरत्नमकुटं कुटिलाग्रकेशं
शास्तारमिष्टवरदं शरणं प्रपद्ये ॥

शान्तं शारदचन्द्रकान्तिधवळं चन्द्राभिरामाननं
चन्द्रार्कोत्पलकान्तिकुण्डलधरं चन्द्रावदातांशुकम् ।
वीणापुस्तकमक्षसूत्रवलयं व्याख्यानमुद्रां करै-
र्बिभ्राणं कलये सदा हृदि? शास्तारमिष्टाप्तये ॥

तेजोमण्डलमध्यगं त्रिणयनं दिव्याम्बरालङ्कृतं
देवं पुष्पशरेक्षुकार्मुकलसन्माणिक्यपात्राभयान् ।
बिभ्राणं करपङ्कजैर्मदगजस्कन्धाधिरूढं महा-
शास्तारं सततं भजामि वरदं त्रैलोक्यसंमोहनम् ॥

End :

कल्हारोज्ज्वलनीलकुन्तलधरं काळाम्बुदश्यामळं
कर्पूराकलिताभिरामवपुषं कान्तेन्दुबिम्बाननम् ।
श्रीदण्डाङ्कुशपाशशूलविलसत्पाणिं मदाढ्यद्विपा-
रूढं शत्रुविमर्दनं हृदि महाशास्तारमाद्यं भजे ॥

जम्बूमूलतले सुमेरुशिखरे माणिक्यसिंहासने
रूढं विश्वविमोहनं निरुपमं बन्धूकपुष्पारुणम् ।

बाणेष्वासगदासिपाशवरदाभीतीः कराम्भोरुहै-
र्बिभ्राणं नततापहं हृदि मम? शास्तारमाद्यं भजे ॥

श्यामवर्णशरीरं सुयौवनं
तुङ्गशृङ्गसहस्रसुकुन्तलम् ।
योगपट्टित?पद्मसुखासनं
वामदक्षिणपुष्कलपूर्णयोः ॥

Colophon :

Author :

Remarks—The work describes the weapons, ornaments etc. of Śāsta.

॥ सीतारामस्तवः ॥

1242 A8. SĪTĀRĀMASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 14 lines per page and 27 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject etc.—Same as No. 1210 M.

॥ पञ्चायुधस्तवः ॥

1242 A9. PAÑCĀYUDHASTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1.

11 lines per page and 26 letters per line.
Script—Malayāḷam. No. of Granthas—8.

Subject etc.—Same as No. 1146 P.

॥ अन्नपूर्णाष्टकम् ॥

1242 A10. ANNAPŪRṆĀṢṬAKAM.

Substance — Palm leaf. Size—7″×3″. Leaf—1.
18 lines per page and 28 letters per line.
Script—Malayāḷam. No. of Granthas—16.

Subject—Same as No. 1224.

Beginning :

आदाय दक्षिणकरेण सुवर्णदर्वीं
दुग्धान्नपूर्णमितरेण च रत्नपात्रम् ।

भिक्षाप्रदाननिरतां नवहेमवर्णा-
मम्बां भजे कनकभूषणमाल्यशोभाम् ॥

रक्तां प्रसन्नवदनां नवचन्द्रचूडा-
मन्नप्रदाननिरतां स्तनभारनम्राम् ।
रुद्रं तमिन्दुशकलाभरणं विलोक्य
हृष्टां भजे भगवतीं मम दुःखहन्त्रीम् ॥

वामे करे कनकरत्नमनोज्ञपात्रं
पूर्णोदनं तदितरे दधतीं च दर्वीम् ।
श्यामां शशाङ्ककलया परिणद्धमौलिं
त्वां सस्मिते गिरिसुते शरणं भजामि ॥

End :

सन्ध्यारागलसद्दुकूलकलितां बाहुद्वयप्रोल्लस-
द्दर्वीपूर्णपयोन्नपात्रविधृतां हारप्रसूनोज्ज्वलाम् ।
मूले कल्पतरोः स्थितां सुसुलभां देवीं शुकश्यामलां
ब्रह्मेन्द्रादिमरुद्गणैरभिनुतां ध्यायेज्जगन्मातरम् ॥

किसलयितदुकूला दर्विकासन्नपात्र-
स्तबकितभुजशाखा हाररोचिःप्रसूना ।
मरतकलतिकेव स्वर्द्रुमाधःस्थिता सा-
प्यखिलभुवनमव्यादन्नपूर्णा भवानी ॥

रुद्रताण्डवविलोकनलोलां भद्रवक्त्रनयनां भवकान्ताम् ।
अन्नदाननिरतां जननीं तां चिन्तयेदुपासि चित्रदुकूलाम् ॥
सुरत्नपात्रञ्च सुवर्णदर्वीं पयोन्नपूर्णं विधृतां कराभ्याम् ।
सुरद्रुमूले कनकासनस्थां गिरीन्द्रकन्यां भजतान्नपूर्णाम् ॥

Colophon :

भक्त्या पठेद्योऽनुशृणोति नित्यं मर्त्योऽन्नपूर्णाष्टकमादरेण ।
नित्यं प्रयच्छत्यखिलां समृद्धिं भक्तिं च मुक्तिं वरदा-
[न्नपूर्णा ॥

Author :

Remarks—The colophon furnishes the title as, Annapūrnāṣṭaka, but from the verse quoted below, the work appears to be a panegyric of the presiding diety in the Cerukunnattu temple in Malabar :

തുക്കൺകിടീടമണിമാലകളിന്ദുബിംബം
തുത്താലിതോഽംവളകരങ്ങളിലങ്ഗ്രഹീയം.
ടിക്കിന്നൊരാഭരണമാം ചെറുകുന്നിമെവു-
മുൽപന്നയാ ഭഗവതിക്കിഹ കൈതൊഴുന്നേൻ."

॥ षण्मुखषट्कम् ॥

1242 A11. ṢAṆMUKHAṢAṬKAM.

Substance -- Palm leaf. Size—7" × 3". Leaf—1.. 13 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—10.

Subject—Same as No. 1155 B.

Beginning :

शरणागतमातुरमाधिजितं
करुणाकर कामद कामहतम् ।
शरकाननसंभव चारुरुचे
परिपालय तारकमारक माम् ॥

शरदिन्दुसमानषडाननया
सरसीरुहचारुविलोचनया ।
निरुपाधिकया निजबालतया
परिपालय तारकमारक माम् ॥

हरसारसमुद्भव हैमवती-
करपल्लवलालित कम्रतनो ।
मुरवैरिविरिञ्चिमुदम्बुनिधे
परिपालय तारकमारक माम् ॥

End:

बहुलासुत सायकभिन्नगिरे
सुरसिन्धुतनूज सुवर्णरुचे ।
शिखितोकशिखावळवाहन हे
परिपालय तारकमारक माम् ॥

जय विप्रजनप्रिय वीर नमो
जय भक्तपरायण भद्र नमो ।
जय शाख विशाख कुमार नमो
परिपालय तारकमारक माम् ॥

वलवृत्रभिदाखिलशत्रुभिया
पृतनापतितां गमितोऽसि ततः
निजशक्तिनिराकृतदैत्यतते
परिपालय तारकमारक माम् ॥

Colophon:

इति कुक्कुटकेतुमनुस्मरतां
पठतामपि षण्मुखष(ण्ड?ट्क)मिदम् ।
नमतामपि नन्दनमिन्दुभृतो
न भयं क्वचिदस्ति शरीरभृताम् ॥
परिपालय तारकमारक माम् ॥

Author:

Remarks—The work is identical with No. 11310, DCSM. Vol. XIX noticed under the title Subrahmanyaṣaṭka wherein two more verses occur at the end.

॥ राघवाष्टकम् ॥

1242 A12. RĀGHAVĀṢṬAKAM.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 11 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—9.

Subject—Same as No. 1225 F.

Beginning :

नमः कोदण्डहस्ताय सन्धीकृतशराय च ।
दण्डिताखिलदैत्याय रामायापन्निवारिणे ॥
नमश्शुद्धान्तरङ्गाय तारकब्रह्ममूर्तये ।
संसारबन्धमोक्षाय रामायापन्निवारिणे ॥
नमस्सुग्रीवनाथायायोध्यापुरवासिने ।
जानकीप्राणनाथाय रामायापन्निवारिणे ॥
नमः कोमळहस्ताय अहल्यापापहारिणे ।
शिवलिङ्गप्रतिष्ठात्रे रामायापन्निवारिणे ॥

End :

नमश्चण्डेशकोदण्डखण्डनाय महात्मने ।
भानुवंशप्रदीपाय रामायापन्निवारिणे ॥
नमः कारुण्यनिधये जटावल्कलधारिणे ।
पितृवाक्यानुपालाय रामायापन्निवारिणे ॥
नमः खरहरायेति कुम्भकर्णविदारिणे ।
दशकण्ठशिरश्छेत्रे रामायापन्निवारिणे ॥
नमः काकुत्स्थवंशाय कौसल्यातनयाय च
हनुमत्सेवितपदे रामायापन्निवारिणे ॥

Colophon :

राघवाष्टकं संपूर्णम् ।

Author :

Remarks—Same as No. 1230.

॥ राघवाष्टकम् ॥

1242 A13. RĀGHAVĀṢṬAKAM.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 20 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—15.

Subject—Same as No. 1225 F.

Beginning :

वैदेहीं परिरभ्य जातपुलकां लज्जावतीं सस्मितां
काञ्चीकङ्कणहारनूपुरलसत्कर्णावतंसोज्ज्वलाम् ।
कस्तूरीघनसारचर्चितकुचां चन्द्राननां श्यामलां
कन्दर्पायुतसुन्दरं रघुपतिं सीतासमेतं भजे ॥

कल्याणदं कौशिकयज्ञपालं
कलानिधिं काञ्चनशैलधैर्यम् ।
कञ्जातनेत्रं करुणाकटाक्षं
काकुत्स्थरामं कलयामि चित्ते ॥

कमललोचनौ काञ्चनाम्बरौ कवचभूषणौ कार्मुकान्वितौ ।
कलुषसंहरौ कामितप्रदौ रहसि नौमि तौ रामलक्ष्मणौ ॥

धृताशिखण्डकौ दीनरक्षकौ धृतिहिमालयौ दिव्यविग्रहौ ।
दिविजपूजितौ दीर्घदोर्युगौ रहसि नौमि तौ रामलक्ष्मणौ ॥

End:

सवनरक्षकौ सत्यसंगरौ समरभीकरौ साहसान्वितौ ।
सदयमानुषौ सर्वपूजितौ रहसि नौमि तौ रामलक्ष्मणौ ॥
वनविहारिणौ वल्कलाम्बरौ वनफलाशिनौ वानरस्तुतौ ।
वरगुणाधिकौ वासवार्चितौ रहसि नौमि तौ रामलक्ष्मणौ ॥
पवनजानतौ पादचारिणौ पटुशिलीमुखौ पावनाङ्घ्रिकौ ।
परमपावनौ भक्तवत्सलौ रहसि नौमि तौ रामलक्ष्मणौ ॥
मनुकुलेश्वरौ मञ्जुभाषिणौ मनुकिरीटिनौ मानुषोत्तमौ ।
मकरकुण्डलौ मौनसेवितौ रहसि नौमि तौ रामलक्ष्मणौ ॥
रणकुतूहलौ राक्षसान्तकौ रतिवरोपमौ रत्नभूषणौ ।
रघुकुलोद्भवौ राज्यपालकौ रहसि नौमि तौ रामलक्ष्मणौ ॥
रसगुणास्पदं राघवाष्टकं रहसि यः पठेद्रामभक्तिदम् ।
रहितकल्मषो राममन्निधौ रविसमप्रभो राजते सदा ॥

Colophon:

राघवाष्टकस्तोत्रं संपूर्णम् ।

Author:

Remarks—The work is not noticed in RCMPL. It differs from No. 1242 A12 in that the latter is a panegyric of both Rāma and Lakṣmaṇa.

(अप्रकाशित)

॥ हस्तामलकीयम् ॥

1242 A14. HASTĀMALAKĪYAM.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 24 lines per page and 23 letters per line. Script—Malayāḷam. No. of Granthas—17.

Subject—Same as No. 657 D. (Vol. III).

Beginning :

कस्त्वं शिशो कस्य सुतः क्व जातः
किं नाम ते त्वं कुत आगतोऽसि ।
एतद्वद त्वं मम चार्भकस्त्वं
मत्प्रीतये प्रीतिविवर्धनोऽसि ॥

नाहं मनुष्यो न च देवयक्षो
न ब्राह्मणक्षत्रियवैश्यशूद्रः ।
न ब्रह्मचारी न गृही वनस्थो
भिक्षुश्च नाहं निजबोधरूपः ॥

निमित्तं मनश्चक्षुरादिप्रवृत्तौ
निरस्ताखिलोपाधिराकाशकल्पः ।
रविर्लोकचेष्टानिमित्तं यथा यः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

End etc.—Same as No. 657 D. Hastāmalaka

Remarks—The first two verses cited herein are in addition to those occurring in No. 657 D.

॥ परतत्वस्तवः ॥

1242 A15. PARATATVASTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 20 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—15.

Subject — Glorification of the reality of the supreme soul.

Beginning :

अनाधेयसंविन्मयानन्दकायं
भयातीतमाम्नायमूर्धैकगेयम् ।
उदस्तात्ममायं मनोवागमेयं
परं तत्त्वमन्तः शिवं चिन्तयामि ॥

प्रलीनप्रपञ्चं प्रमृष्टप्रभेदं
प्रचारानुगं प्रत्यगद्वैतमाद्यम् ।
प्रमात्राद्यसाध्यं प्रबोधस्वरूपं
परं तत्त्वमन्तः शिवं चिन्तयामि ॥

अनाधारमाधारभूतं तुरीयं
निरीहं निराकारमोंकारगम्यम् ।
निराभासकं निर्गुणं निष्कलङ्कं
परं तत्त्वमन्तः शिवं चिन्तयामि ॥

End :

अनभ्यस्तसंविन्निरस्तप्रपञ्चं
समस्तैकसाक्षिस्वभावैकरूपम् ।
अनस्तं ग(द?तं) निस्तुलानन्दसान्द्रं
परं तत्त्वमन्तः शिवं चिन्तयामि ॥

नदृश्यं न गोत्रं न वर्णं न गात्रं
न शब्दं न रूपं न गन्धं न मात्रम् ।
न मूर्तं मनोग्राह्यमात्रं ... ...मेकं
परं तत्त्वमन्तः शिवं चिन्तयामि ॥

दशैतानि विद्यान्यवोचं मुदाऽहं
सदा भावयन्तः सदर्थं विरक्ताः ।
अविद्यादिदोषान् विधूयात्मरूपं
परं ब्रह्मतत्वं प्रयान्तीह सन्तः ॥

Colophon :

परन्तत्त्वस्तोत्रं संपूर्णम् ।

Author :

Remarks—The Ms. is old and worn out in some places.

॥ अर्धनारीश्वराष्टकम् ॥

1242 A 16. ARDHANĀRĪŚVARĀṢṬAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 16 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1164 H.

॥ किरातरुद्रस्तवः ॥

1242 A 17. KIRĀTARUDRASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 33 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject—Same as No. 1215 B.

Beginning :

धाराधरश्यामळाङ्गं क्षुरिकाचापधारिणम् ।
किरातवपुषं वन्दे परमानन्दमीश्वरम् ॥

भरद्वाज ऋषिः । अनुष्टुप् छन्दः । किरातमूर्तिः परमात्मा देवता । प्रत्यर्थिव्रात ... ।

किरातात्मा शिवः शान्तः शिवात्मा शिवनन्दनः ।
पुराणपुरुषो धन्वा पुरुहूतसहायकृत् ॥
नीलाम्बरो महाबाहुर्वीर्यवान्विजयप्रदः ।
विधुमौलिर्विराडात्मा विश्वात्मा विश्वमोहनः ॥
वरदो वामदेवश्च वासुदेवप्रियो विभुः ।
केयूरवान्पिञ्छमौलिः पिङ्गलाक्षः कृपाणवान् ॥

End :

स्तोत्रेणानेन ये नित्यं विल्वपत्रेण नामभिः ।
किरातात्मानमर्चन्ति तेषां नश्यन्ति शत्रवः ॥
प्रातः स्नात्वा जले स्थित्वा ये पठन्ति समाहिताः ।
तेषां वेश्मसु श्रीर्देवी सदा क्रीडति संपदा ॥
सायं रक्ताम्बरं धृत्वा रक्तपुष्पेण नामसु ।

अर्चन्ति ये श्रद्दधानास्तेषां विश्वं वशं भवेत् ॥
अकामा ये जपन्त्येतन्नित्यं तद्गतमानसाः ।
तेषां मुक्तिर्भवेन्नूनं सत्यं सत्यं न संशयः ॥

उग्रासिधेनुकमुदग्रशरासनाग्र-
व्यग्राग्रहस्तमुडुराजकलावतंसम् ।
उद्यत्कृपालसदपाङ्गमुमाङ्कजातं
तेजः परं शबरवेषधरं नमामि ॥

प्रत्यर्थिव्रातवक्षःस्थलरुधिरसुरापानमत्तं पृषत्कं
चापे सन्धाय तिष्ठन्हृदयसरसिजे मामके तापहन्ता ।
पिञ्छोत्तंसश्शरण्यः पशुपतितनयो नीरदाभः प्रसन्नो
देवः पायादपायाच्छबरवपुरसौ सावधानस्सदा माम् ॥

Colophon :

Author :

Remarks—The Ṛṣi, metre etc. are also described herein.

॥ सूर्यस्तवः ॥

1242 A 18. SŪRYASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 16 lines per page and 23 letters per line. Script—Malayāḷam. No. of Granthas—34.

Subject—Same as No. 1147 A,

Beginning :

श्रीरामभद्रः ।

जाम्बवन्नद्भुतमिदं शृण्वतां विस्मयावहम् ।
आञ्जनेयस्य चरितममुष्य वद विस्तरात् ॥

अथ किं कृतवानेष सदागतिसमुद्भवः ।
उत्तरं कृत्यमेतस्य श्रोतुं कौतूहलं हि मे ॥

चोदितो राघवेणेति जाम्बवान्नृक्षपुङ्गवः ।
मारुतेः कथयामास कथां पापप्रणाशिनीम् ॥

शृणु राघवशार्दूल हनुमच्चरितं शुभम् ।
शृण्वतां सर्वपापघ्नं भवतः प्रीतिवर्धनम् ॥

* * * *

बन्धुं जलरुहां देवमुपतस्थे दिवाकरम् ।

* * * *

घृणामयतनुर्नृणां ननु तनोति सर्वामय-
क्षतिं क्षपितकल्मषः स्मरणमात्रनिष्पीकृतः ।
अविघ्नमनिशं मृशन् दिशति यश्च सन्मङ्गलं
स पुण्यघृणिरस्तु मे द्युमणिराशु सिद्ध्यै श्रियः ॥

End :

किं पुनर्नियताचारः प्रातर्मामन्वहं नरः ।
स्तौति स्तुत्यानया तस्य वशगोऽसीति मारुते ।
यशः श्रियश्च विपुलाः सौभाग्यं ज्ञानमुत्तमम् ॥
प्राप्नोति पुण्यभोगांश्च स्तुवन् स्तुत्यानयैव माम् ।
भानुवारे शुचिर्मर्त्यः सप्तम्यां वा समाहितः ॥

इमं स्तवं जपन्मुक्तिं प्राप्नुयान्मत्प्रसादतः।
सकृद्वा भानुसप्तम्यामाचरन्मत्प्रियं नरः ॥
इमं स्तवमधीयानः पुष्कलां श्रियमाप्नुयात् ।
मत्तः किमिच्छसि प्रीतान्निश्शङ्कं वृणु मारुते ॥
मत्वा विधेयमात्मानमात्मज्ञं तव सांप्रतम् ।

Colophon :

" आञ्जनेयस्तोत्रं संपूर्णम् " ।

Author :

Remarks—It is evident from the colophon that the work is also styled Āñjaneyastotram.

॥ दक्षिणामूर्तिस्तवः ॥

1242 A19. DAKṢIṆĀMŪRTISTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 23 lines per page and 27 letters per line. Script—Malayāḷam. No. of Granthas—20.

Subject—Same as No. 1215 B.

Beginning :

गङ्गाधर विरूपाक्ष गरुडध्वजपूजित ।
गेयाय दिव्यमुनिभिर्दिविजैरीडिताय च ॥
गम्भीरयोगिपरिपूजितपादुकाय
श्रीशैलमूलनिलयाय नमाशिवाय ।

वृत्रारिवन्दितपदाय वृषे स्थिताय
वृष्ट्यादिमङ्गलकराय वृषात्मकाय ।
वृद्ध्यादिदोषरहिताय चिदात्मकाय
श्रीशैलमूलनिलयाय नमश्शिवाय ॥

कैलासभूधरविनोदकलाप्रियाय
शैलाधिराजतनयाविभवाय तुभ्यम् ।
कोलावतारमुरवैरिवितर्किताय
श्रीशैलमूलनिलयाय नमश्शिवाय ॥

End :

जय देव महादेव जय शाश्वत शङ्कर ।
जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥
जय नित्य निराधार जय विश्वम्भराव्यय ।
जय विश्वैकवन्द्येश जय नागेन्द्रभूषण ॥
जय गौरीपते शम्भो जय चन्द्रार्धशेखर ।
जय कोट्यर्कसंकाश जयानन्द निरञ्जन ॥
जय नाथ कृपासिन्धो जय भक्तार्तिभञ्जन ।
जय दुस्तरसंसारसागरोत्तारण प्रभो ॥
प्रसीद मम देवेश संसारार्त्तस्य खिद्यतः ।
सान्निध्यं सर्वदा कृत्वा रक्ष मां परमेश्वर ॥
इति स्तुतो महादेवः शङ्करश्चन्द्रशेखरः ।
प्राह गम्भीरया वाचा तं मुनिं हर्षयन्द्विजाः ॥

Colophon :

इति (शिवशी ? श्रीशै)लनाथस्तोत्रं संपूर्णम् ॥

Author ;

Remarks—The colophon bears out that the title of the work is Srī Sailanāthastotram. The opening few lines are missing.

॥ दक्षिणामूर्तिनवरत्नमालिका ॥

1242 A 20. DAKṢIṆĀMŪRTINAVARATNA-MĀLIKĀ.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 17 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject—Same as No. 1215 B.

Beginning :

तेजः किंचित्काञ्चनटङ्कीकपिशाभा-
न्बिभ्रद्भ्रूनुद्भटकापर्दकलापान् ।
भस्मालेपस्मेरललाटं वटमूले
दृष्टंदृष्टापस्मृतहारि स्मरहन्तृ ॥

न्यग्रोधाधो धिक्कृतधाराधरधीर-
ग्रीवाभागं भोगिकुलाकल्पमनल्पम् ।
दुग्धाकारं मुग्धनिशानाथवदवतंसं
मुग्धस्मेरं मोहविरामं विमृशामः ॥

नासादत्तालोकयाऽन्यसरोरुक्?
किञ्जल्काळीपिङ्गजटाचूटकवचा ? ।
घोरापस्मारसैतं घस्मरशक्त्या ?
चित्रीभूतं चित्कलया मामकमन्तः ॥

End :

नीहाराम्भोहारलतैरावतगङ्गा-
पाटीराळीभूतिसुधाम्बुतिवळक्षैः ।
सद्रुद्राक्षस्रग्धरमद्राक्षमनाक्षि-
स्पन्दं मन्दस्मेरमनादिं गुरुमन्तः ॥

इन्दूत्तंसं काळिमकण्ठं
सिन्दूरोष्ठं शिखिनेत्रम् ।
बद्धफणीन्द्रा भातीशाभा
भासुरहासं भवमन्तः ॥

शार्दूलत्वग्वाससमीशं वरिवस्ये? ।

घोरापस्मृत्युत्कटपृष्ठे विनिविष्टो
यस्यैकाङ्घ्रिः तत्पृथुलोरुस्थितिरन्यः ।
वस्तुध्यानादुद्धुर निष्पन्दशरीरं
चान्द्रं तेजः सन्महिमावासमुपासे ॥

Colophon :

एतां मालां नवमणिरूपामादिगुरो-
र्भक्त्या नित्यं पठति यो जाड्यविमुक्तः ? ।
अष्टाचत्वारिंशन्मुनिसहस्रसमत्वं
गत्वा तस्मिन् विलयमुपेयाच्च स धन्यः ॥

Author :

Remarks—The work is not noticed in RCMPL.

॥ भद्रकालीस्तवः ॥

1242 A 21. BHADRAKĀḶĪSTAVA.

Substance—Palm leaf. Size—7″×3″. Leaf—1. 18 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—28.

Subject—A panegyric of Bhadrakāḷī.

Beginning :

काळीं व्रीळितकाळमेघनिवहां वर्णेन कालानल-
प्रख्यां दुःखहरीं कपर्दकलितेन्दर्धां परेतासनाम् ।
रोषोद्वृत्तविवृत्तरक्तनयनत्रेताग्निलीढासुर-
श्रेणीक्षोणितलां प्रणौमि सततं भद्रां भवोच्छित्तये ॥

कल्पान्तानलघूर्णितार्णवमहाडिण्डीरचण्डध्वनिं
मुष्णद्भिर्द्रुहिणाण्डखण्डमकुटस्फोटक्षमैर्दारुणैः ।
दैत्यश्रोत्रविदारणैरतिघनैर्हुंकारनादैरिदं
त्रायन्तीं भुवनत्रयं भगवतीं वन्दे महाभैरवीम् ॥

संवर्ताम्बुदबिम्बरञ्जिततटित्पुण्ड्रप्रभापञ्जर-
प्रस्पर्ध्युत्कटदंष्ट्रया विरचितप्रोत्फुल्लवक्त्राम्बुजाम् ।
चञ्चत्स्वञ्चितकञ्चुकीश्वरफणारत्नोज्ज्वलत्कुण्डलां
चामुण्डां प्रणतोऽस्मि शर्मविषये सर्वात्मना शाम्भवीम् ॥

End :

एकद्वित्रिचतुष्कपञ्चकमतः षोढा पुनस्सप्तधा
या भिन्ना पुनरष्टधा च नवधा चाष्टाष्टधा च क्रमात् ।

सेव्या व्याप्तचराचरा च शिवदा शक्तिश्शिवेच्छावशा-
च्चामुण्डेत्युदिता चिराय भवतां भूयाद्विभूत्यै शिवा ॥

काळीं मेघसमप्रभां त्रिणयनां वेताळकण्ठस्थितां
खड्गं खेटगुणौघदारितशिरः कृत्वा कराग्रेषु च ।
भूतप्रेतपिशाचमातृसहितां मुण्डस्रजालङ्कृतां
वन्दे दुष्टवसूरिकादिसकलां? संहारिकामीश्वरीम् ॥

Colophon :

Author :

Remarks—Same as No. 1241 E.

॥ नृसिंहस्तवः ॥

1242 A 22. NṚSIMHASTAVA.

Substance—Palm leaf. Size—7 × "3". Leaves—1½. 15 lines per page and 31 letters per line. Script—Malayāḷam. No. of Granthas—15.

Subject—Same as No. 1218.

Beginning:

वृत्तोत्फुल्लविशालाक्षं विपक्षक्षयदीक्षितम् ।
निनादत्रस्तविश्वाण्डं विष्णुमुग्रं नमाम्यहम् ॥

सर्वैरवध्यतां प्राप्तं बलवन्तं दितेः सुतम् ।
नखाग्रैः शकलीचक्रे यस्तं वीरं नमाम्यहम् ॥

पादावष्टब्धपाताळं मूर्धाविष्टत्रिविष्टपम् ।
भुजप्रक्षिप्ताष्टदिशं महाविष्णुं नमाम्यहम् ॥

ज्योतींषि खेन्दुनक्षत्रज्वलनादीन्यनेकधा ।
ज्वलन्ति तेजसा यस्य तं ज्वलन्तं नमाम्यहम् ॥
सर्वेन्द्रियैरपि विना सर्वं सर्वत्र सर्वदा ।
जानाति यो नमाम्याद्यं तमहं सर्वतोमुखम् ॥

End :

यन्नामस्मरणाद्भीता भूतवेतालराक्षसाः ।
रोगाद्याश्च प्रणश्यन्ति भीषणं तं नमाम्यहम् ॥
सर्वोऽपि यं समाश्रित्य सकलं भद्रमश्नुते ।
श्रिया च भद्रया (मु?यु)क्तो यस्तं भद्रं नमाम्यहम् ॥
साक्षात्स्वकालं संप्राप्तं मृत्युं शत्रुगणानपि ।
भक्तानां नाशयेद्यस्तु मृत्युमृत्युं नमाम्यहम् ॥
नमस्कारात्मकं यस्मै विधायात्मनिवेदनम् ।
मुक्तदुःखोऽखिलान्कामानश्नुते तं नमाम्यहम् ॥
दासभूतास्स्वतस्सर्वे ह्यात्मनः परमात्मनः ।
अतोऽहमपि ते दास इति मत्वा नमाम्यहम् ॥

Colophon :

शङ्करेणादरात्प्रोक्तं पदानां तत्त्वमुत्तमम् ।
त्रिसन्ध्यं यो जपेत्तस्य श्रीर्विद्यायुश्च वर्धते ।

श्रीनृसिंहाय नमः ।

Author—Śaṅkara.

Remarks—Each of the nine appellations of Nṛsimha noted in the verse beginning with "उग्रं वीरं" is described at length in a verse herein.

॥ अपराधदशकम् ॥

1242 A 23. APARĀDHADAŚAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 17 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Invocation of God for the remission of one's misdemeanours.

Beginning :

आदौ कर्मप्रसङ्गात्कलयति कलुषं मातृकुक्षौ स्थितस्सन्
तन्मूत्रामेध्यमध्ये कथयति नितरां जाठरो जातवेदाः ।
यद्यद्वा तत्र दुःखं विषगतिविषमं शक्यते केन वक्तुं
क्षन्तव्यो मेऽपराधाश्शिव शिवशिव भो श्रीमहादेव शम्भो ॥

बाल्ये दुःखातिरेकान्मलमलिनवपुः स्तन्यपाने पिपासुः
नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिता जन्तवो मां तुदन्ति ।
नानारोगात्तिदुःखाद्रुदनपरवशाच्छंकरं न स्मरामि
क्षन्तव्यो मेऽपराधाश्शिवशिवशिवभो श्री महादेव शम्भो ॥

प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ
दष्टो नष्टविवेकः सुतधनयुवतिस्वादुसौख्ये निषण्णः ।
शैवे चिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षन्तव्यो मेऽपराधाश्शिवशिवशिव भो श्रीमहादेव शम्भो ॥

End :

क्षुत्पीडादाहमोहैर्भ्रमति मम मनो बाध्यमानोऽपि रागै-
राशापाशैकबद्धः परवशतिलुठत्काकवद्भ्राम्यमाणः ।

जाग्रैः स्वप्नैस्सुषुप्तैस्त्रिगुणपरवशैश्शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधाश्शिवशिवशिवभो श्रीमहादेव शम्भो ॥

करचरणकृतं वा कर्मवाक्कायजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विदितमविदितं वा सर्वमेतत्क्षमस्व
शिव शिव करुणाब्धे श्रीमहादेव शम्भो ॥

Colophon :

अपराधदशकं समाप्तम् ।

Author :

Remarks—In RCMPL. this work is designated as Kṣamāpaṇapañcāśat. The following verse is quoted after the close:

चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे
सर्पैर्भूषितखण्डकर्णविवरे नेत्रोत्थवैश्वानरे ।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे
मोक्षार्थं गुरुचित्तवृत्तिरमलावन्यैस्तु किं कर्मभिः ? ॥

॥ रामस्तवः ॥

1242 A 24. RĀMASTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 16 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject—Same as No. 1225 F.

Beginning :

नित्यं किं धावसि चलविषयाननुभवितुं सुखलेशाभासान्
उरुतरदुःखानतिदुस्साहनत्यायासानंहोमूलान् ।
उग्रभयङ्करौरवादिनारकगतिहेतूनेतानपि परिहर
सीतापतिमाशु परिचरेशं भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डम्
भो चेतः श्रीरामं भज शरणम् ॥

बहुविधपापवशादिह नानायोनिषु जन्ममृती यो देही
दैवादुत्तममानुषपौरुष विप्रदेहविश्वासम्पन्नोऽपि ।
ब्रह्मणि परमे विमुखो दुर्विषयैषी नश्यति तृणकवळ-
स्वीकरणे काले पंशुरिव रोमन्थं कुर्वन्भो चेतः श्रीरामं भज
शरणम् ॥

End :

नित्यानन्दं सत्यमनन्तं ब्रह्मपदं पदमव्ययममलं
नित्यं बुद्धं शुद्धं शान्तं शाश्वतमप्रमेयं आ ?ज्यस्सर्वासामुपनिषदा-
मर्थं श्रीरामस्सीतापतिरिति हरिहरचतुराननादिभि-
र्यस्य नाम गीयते तस्य दासोऽहं भो चेतः श्रीरामं भज शरणम् ॥

श्रितजनचिन्तामणिमतिकरुणाकरमरिहरमुरुतर-
शरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥

Colophon :

Author :

Remarks—The work is composed in strict conformity with the rules of music.

॥ गोविन्दस्तवः ॥ [द्वादशमञ्जरी]

1242 A 25. GOVINDASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 23 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject—Instructions relating to abnegation.

Beginning:

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिस्सर्वत्रैषा विहिता रीतिः ॥
का ते कान्ता कस्तव पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः ॥

End:

दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥
त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः ।
भव समचित्तः सर्वत्र त्वं वाञ्च्छस्यचिराद्विष्णुपदं त्वम् ॥
कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीने सर्वमतेन मुक्तिर्न भवति जन्मशतेन ॥
भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ।

Colophon:

द्वादशमञ्जरिकाभिरशेषः शिष्याणां कथितो ह्युपदेशः ।
येषां नैव करोति विवेकं ते पश्यन्ते नरकमनेकम् ॥

भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ॥

Author—Śaṅkarācārya.

Remarks—This work is also known by the title, Dvādaśamañjarī.

उपदेशी-

॥ अद्वैतपञ्चरत्नम् ॥

1242 A 26. ADVAITAPAÑCARATNAM.

Substance—Palm leaf. Size—7" × 3". Leaf—1. 16 lines per page and 27 letters per line. Script—Malayāḷam. No. of Granthas—15.

Subject—A brief résumé of the principles of Advaita.

Beginning :

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामुपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयता-
मात्मेच्छाव्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥

सङ्गस्सत्सु विधीयतां भगवतो भक्तिर्दृढाधीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् ।
सद्विद्वाननुसृप्यतामनुदिनं तत्पादुका सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥

वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयतां
दुस्तर्कात्तु विरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम् ।

ब्रह्मास्मीतिविभाव्यतामहरहर्गर्वः परित्यज्यतां
देहेऽहंमतिरुज्झ्यतां बुधजनैर्वादस्समुत्सृज्यताम् ॥

End :

क्षुद्व्याधिश्च चिकित्स्यतामनुदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं न तु यत्यतां विधिवशात्प्राप्तेन सन्तुष्यताम् ।
औदासीन्यमभीप्स्यताज्जनकृपानैष्ठुर्यमुत्सृज्यतां
शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यताम् ॥

एकान्ते सुखमास्यतां परतरे चेतस्समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥

Colophon :

Author—Śaṅkarāchārya.

Remarks—The existence of many commentaries on this work testifies to its sublimity and utility. The citations given above comprise the complete text.

॥ शिवसप्तरत्नम् ॥

1242 A27. ŚIVASAPTARATNAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 15 lines per page and 23 letters per line. Script—Malayāḷam. No. of Granthas—11.

Subject—Identification of the individual soul with Śiva or Paramātman.

Beginning—Same as No. 1060 D.

End :

मत्तो नान्यत्किंचिदत्रास्ति दृश्यं
सत्यं बाह्यं वस्तु मायोपकल्पम् ।
आदर्शान्तर्भासमानस्य तुल्यं
मय्यद्वैते भाति तस्माच्छिवोऽहम् ॥

जाग्रत्युद्भूतबाह्येन्द्रियविषयसमुल्लाससाक्षी शिवोऽहं
स्वप्ने दृष्टप्रपञ्चप्रतिफलितमनोवृत्तिसाक्षी शिवोऽहम् ।
सुप्तौ चित्ते प्रलीने प्रबलत(म)महामोहसाक्षी शिवोऽहं
नित्यानन्दस्तुरीयो विगतकलिमलः सर्वसाक्षी शिवोऽहम् ॥

जाग्रत्स्वप्नसुषुप्तियोगसमयेष्वात्मानिशं वर्तते
स्वप्ने स्थूलशरीरनाशनमभूत्सुप्तौ च सूक्ष्मा तनुः ।
लुप्ता कारणगात्रहानिरभवद्योगे ततोऽङ्गत्रयं
दृश्यानित्यजडात्मकं तु न तथा स्वात्मा स एवास्म्यहम् ॥

Colophon :

शिवसप्तरत्नं समाप्तम् ।

Author—Śaṅkarācārya.

Remarks—The work is better known by the title, Advaitasaptaratnam.

॥ मनीषापञ्चकम् ॥

1242 A28. MANĪṢĀPAÑCAKAM.

Substance—Palm leaf. Size—7" × 3". Leaf—1.

21 lines per page and 28 letters per line.
Script—Malayalam. No. of Granthas—18.

Subject—Realisation of the supreme soul.

Beginning :

अन्नमयादन्नमयमथवा चैतन्यादेव चैतन्यम्
द्विजवर दूरीकर्तुं वाञ्छसि किं गच्छ गच्छेति ॥

किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चण्डालवीथीपयः-
पूरे वान्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाम्बरे ।
प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ
विप्रोऽयं श्वपचोऽयमित्यपि महान्कोऽयं विभेदग्रहः ॥

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चे-
च्चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥

End :

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तकलुषे लब्ध्वा मुनिर्निर्वृतिम् ।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मवि-
द्यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥

या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटं गृह्यते
यद्भासा हृदयाक्षदेहविषया भाति स्वतोऽचेतनाः ।
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदाभावयन्
योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम ॥

विश्वं नश्वरमेव शश्वदखिलं निश्चिन्य वाचा गुरो-
र्नित्यं ब्रह्म निरन्तरं विमृशतां निर्व्याजशान्तात्मनाम् ।
भूतं भावि च दुष्कृतं प्रदहतां संविन्मये पावके
प्रारब्धाय समर्पितं स्वपुरित्येषा मनीषा मम ॥

Colophon :

मनीषापञ्चकं समाप्तम् ।

Author—Śaṅkarācārya.

Remarks—The work embodies the essence of the Advaita philosophy.

॥ श्लोकाष्टकम् ॥

1242 A29. ŚLOKĀṢṬAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 22 lines per page and 30 letters per line. Script —Malayāḷam. No. of Granthas—20.

Subject—Doctrine of the complete absorption of the individual soul in the supreme soul.

Beginning :

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्तिः ।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

हेम्नः कार्यं हुतवहगतं हेम चैवेति तद्व-
त्क्षीरं क्षीरे समरसगते तोयमेवाम्बुमध्ये ।

एवं सर्वं समरसगतं त्वंपदं तत्पदार्थे
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

उद्यन्नद्यस्समरसगताः सागरं संप्रपन्ना
स्तद्वज्जीवास्समरसगताश्चित्स्वरूपे प्रपन्नाः ।
वाचातीते समरसगते कश्चिदानन्दरूपे
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

End :

यस्मिन्विश्वं सकलभुवनं सागरस्यैव रूप-
मुर्व्यम्बाग्निश्वसनगगनज्जीवभावं क्रमेण ।
तत्प्रारब्धैर्नविदितलयैस्सन्धवस्यैकरूपं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

कार्याकार्ये किमपि च ततो नैव कर्तृत्वमस्ति
जीवन्मुक्तिस्थितिरहमहो दग्धवस्त्रावभासः ।
एवं सर्वं समरसगतं तिष्ठतः स्वात्मरूपं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

सत्यं नित्यं परममृतं शान्तिकल्याणहेतुं
मायारण्ये दहनमननं शान्तिनिर्वाणदीपम् ।
तेजोराशिं निगम(न?)सदनं व्यासपुत्राष्टकं यः
प्रातःकाले पठति महतां को विधिः को निषेधः ॥

Colophon :

शुकाष्टकं समाप्तम् ।

Author—(Vyāsaputra) Śuka

Remarks —The colophon manifests that the work is also styled Śukāṣṭakam.

॥ श्लोकदशकम् ॥

1242 A30. ŚLOKADAŚAKAM.

Substance—Palm leaf. Size—7" × 3". Leaf—1.
18 lines per page and 30 letters per line.
Script—Malayalam. No. of Granthas—17.

Subject—Monism.

Beginning :

न शास्ता न शास्त्रं च शिष्यो न शिक्षा
नच त्वं नचाहं नचायं प्रपञ्चः ।
स्वरूपावबोधो विकल्पासहिष्णुः
स एकोऽवशिष्टः शिवः केवलोऽहम् ॥

न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राज्ञको वा ।
अविद्यात्मकत्वात् त्रयाणां तुरीयः
स एकोऽवशिष्टः शिवः केवलोऽहम् ॥

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात्सुषुप्त्यैकसिद्धः
स एकोऽवशिष्टश्शिवः केवलोऽहम् ॥

End :

न चोर्ध्वं न चाधो न चान्तर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वापरा दिक् ।
वियद्व्यापकत्वादखण्डैकरूपः
स एकोऽवशिष्टः शिवः केवलोऽहम् ॥

जगत्तुच्छमेतत्समस्तं तदन्यद्
द्वयाऽतिव्यापकत्वा.... .... ।
स्वतस्सिद्धभावादनन्याश्रयत्वात्
स एकोऽवशिष्टश्शिवः केवलोऽहम् ॥

नचैकं तदन्यद्द्वितीयं कुतः स्या-
न्न वा केवलं त्वन्न चाकेवलत्वम् ।
न शून्यं नचाशून्यमद्वैतकत्वात्
कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥

Colophon:

आचार्यदशकं समाप्तम् ।

Author—Śaṅkarācārya.

Remarks—The colophon evinces that the work is also styled Ācāryadaśaka.

॥ हस्तामलकीयम् ॥

1242 A31. HASTĀMALAKĪYAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 24 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject etc.—Same as No. 657 D. (Vol. III).

Remarks — The order of verses in this work varies from that of No. 657 D. Hastāmalaka.

॥ दक्षिणामूर्त्यष्टकम् ॥

1242 A32. DAKṢIṆĀMŪRTYAṢṬAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1.
15 lines per page and 24 letters per line.
Script—Malayāḷam. No. of Granthas—25.

Subject etc.—Same as No. 1160 H.

Remarks—The following two verses are quoted in the beginning and the end respectively :

"किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्यासि मे ।
चक्षुस्तस्य निमीलनादिसमये किं धीर्धियोर्दर्शने
किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मि प्रभो ॥"

"ब्रह्मविद्या मया लब्धा ब्रह्मणैव सरस्वती ।
यस्य तत्त्वोपदेशेन तस्मै श्रीगुरुमूर्तये नमः (?) ॥ "

॥ सौरस्तवः ॥

1242 A33. SAURASTAVA.

Substance—Palm leaf. Size—7½″ × 3″. Leaf—1.
8 lines per page and 31 letters per line.
Script—Malayāḷam. No. of Granthas—8.

Subject—Same as No. 1147 A.

Beginning etc.—Same as No. 1168 G.

॥ सौराष्टकम् ॥

1242 A34. SAURĀṢṬAKAM.

Substance — Palm leaf. Size — 7″ × 3″. Leaf—$\frac{1}{2}$. 14 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—10.

Subject etc.—Same as No. 1147 E.

Remarks—The following verse is cited after the end:

"शरीरे जर्जरीभूते व्याधिग्रस्ते कलेवरे ।
औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ॥"

॥ अशुचिविधिः ॥

1242 A35. AŚUCIVIDHI.

Substance — Palm leaf. Size—7″ × 3″. Leaf—$\frac{1}{2}$. 16 lines per page and 23 letters per line. Script—Malayāḷam. No. of Granthas—11.

Subject—Description of the rites relating to pollution.

Beginning:

शूद्राष्पट्कं त्रिकं वा पतितरजकका विप्रकृष्याः पदानां
षट्कं स्त्रीधर्मिणीकद्युग?ममुकयुगं दाहकः शौण्डिकश्च ।
तक्षैवं तद्युगं पुल्कसमृगयुदिवाकीर्तयोऽत्रान्तरस्थाः
षट्त्रिंशत्स्मृतिका तद्दलमाहिकृति तुल्यन्तु वा पुल्कसाद्याः ॥?

नृणां विण्मूत्रशुक्लव्रणसलिलवसामांसमज्जास्थिरक्तं
चण्डालान्नादि मद्यं श्वखरबलिभुजश्चात्यशुद्धश्च विप्रः ।

इत्येषाञ्च स्वसीम्नो बहिरधिवसतां चोक्तशूद्रादिकानां
तार्तीये सत्युपस्पर्शन इह विहितो वीतिहोत्रस्य नाशः ॥

एकीभूतं बहुद्रव्यमेकत्वेन प्रकल्पयेत् ।
चण्डालानामुपस्पर्शे चातुर्थेऽप्यग्निनाशकृत् ॥

End :

अन्तःपत्यतिकालजं सुहृदघं बालाघभेदाश्च नो ।
विद्वत्पारशवस्य चाघमखिलं स्याद्विप्रवत्सूत्रिणाम् ॥

बाहुजादिषु तु नातिकालजं स्नानतो शुचिरिहापयाति सा ।
पिण्डदायकसुवोश्च तत्कृतेः प्राक्तनानि च दिनानि वा शुचिः ॥

आकूटस्थस्त्रियः पुत्रपुत्र्यादीनां परस्परम् ।
सापिण्ड्यं च तथा बोध्यं दम्पत्योरिह सूरिभिः ॥

हीनजातिं स्त्रियं मोहादुद्वहन्तो द्विजातयः ।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥

Colophon :

Author :

Remarks—The work is only a portion of a voluminous treatise.

॥ आत्मार्पणस्तवः ॥

1242 A36. ĀTMĀRPAṆASTAVA.

Substance—Palm leaf. Size—7″×3″. Leaf—1. 22 lines per page and 27 letters per line. Script—Malayāḷam. No. of Granthas—20.

Subject—Same as No. 1145.

Beginning etc.—Same as No. 1146 A.

Colophon :

आत्मार्पणस्तोत्रं समाप्तम् ।

Remarks—The colophon discloses the title of the work.

॥ विष्णुस्तवः ॥

1242 A37. VIṢṆUSTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 17 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—35.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1146 B.

॥ आत्मार्पणस्तवः ॥

1242 A38. ĀTMĀRPAṆASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 12 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—10.

Subject—Same as No. 1145.

Beginning—Same as No. 1146 A.

End:

दिग्वाससे कपर्दान्तध्वान्ताहिसरिदिन्दवे ।
देवदैत्यासुरेन्द्राणां मौलिघृष्टाङ्घ्रये नमः ॥
भस्माभ्यक्ताय भक्तानां भुक्तिमुक्तिप्रदायिने ।
व्यक्ताव्यक्तस्वरूपाय शङ्कराय नमो नमः ॥

नमोऽन्धकान्तकरिपवे पुरद्विषे
नमोऽस्तु ते द्विरदवराहभेदिने ।
विषोल्लसत्फणिकुलबद्धमूर्तये
नमः सदावृषवरवाहनाय ते ॥

वियन्मरुद्धुतवहवार्वसुन्धरा-
मखेशरव्यमृतमयूखमूर्तये ।
नमः सदा विबुधवरेश्वराय ते
भवेह नो भवभयभङ्गकृद्भिभो ॥

Colophon :

आत्मार्पणं संपूर्णम् ।

Author :

Remarks—No. 1146 A. and this work vary in their closing portions.

॥ सुदर्शनकवचम् ॥

1242 A39. SUDARŚANAKAVACAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 17 lines per page and 27 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject etc.—Same as No. 1210 F.

Colophon :

इति पाञ्चरात्रे विहगेन्द्रसंहितायां अगस्त्याम्बरीषसंवादे षोडशोऽध्यायः ।

Author :

Remarks—The work is composed in the form of a

dialogue between Agastya and Ambarīṣa. It is borrowed from Vihagendrasamhitā in Pāñcarātra.

॥ उग्रनृसिंहस्तवः ॥

1242 A40. UGRANṚSIMHASTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—½. 16 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject etc.—Same as No. 1211 B.

॥ लक्ष्मीनृसिंहस्तवः ॥

1242 A41. LAKṢMĪNṚSIMHASTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1. 17 lines per page and 24—26 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject etc.—Same as No. 1164 J.

Remarks—The verse beginning with 'सत्यज्ञानसुख' is missing herein.

॥ कृष्णानुस्मृतिः ॥

1242 A42. KṚṢṆĀNUSMṚTI.

Substance—Palm leaf, Size—7″ × 3″. Leaves—3½.

17 lines per page and 25 letters per line.
Script—Malayāḷam. No. of Granthas—15.

Subject—Same as No. 1225 I.

Beginning etc.—Same as No. 1146 C.

॥ कृष्णस्तवराजः ॥

1242 A43. KṚṢṆASTAVARĀJA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—5½.
17 lines per page and 26 letters per line.
Script—Malayāḷam. No. of Granthas—150.

Subject—Same as No. 1225 I.

Beginning etc.—Same as No. 1146 E.

॥ माधवस्तवराजः ॥

1242 A44. MĀDHAVASTAVARĀJA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—3½.
18 lines per page and 29 letters per line.
Script—Malayāḷam. No. of Granthas—100.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1146 F.

॥ अपराधस्तवः ॥

1242 A45. APARĀDHASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaves—4.

18 lines per page and 24 letters per line.
Script—Malayāḷam. No. of Granthas—125.

Subject etc.—Same as No. 1146 N.

॥ शिवस्तवः ॥ [शिवताण्डवस्तोत्रम्]

1242 A46. ŚIVASTAVA.

Substance — Palm leaf. Size—7″ × 3″. Leaf—1.
17 lines per page and 28 letters per line.
Script—Malayāḷam. No. of Granthas—30.

Subject—Same as No. 1215 B.

Beginning:

जटाकटाहसम्भ्रमन्निलिम्पनिर्झरीझरी-
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥

धराधरेन्द्रनन्दिनीविलासबद्धबन्धुर-
स्फुरद्दुरन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिच्चिदम्बरे मनो विनोदमेतु वस्तुनि ॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रवप्रालिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरासुरत्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥

End :

प्रफुल्लनीलपङ्कजप्रचण्डकालिमच्छटा-
विडम्बिकण्ठकन्दळीरुचिप्रबन्धबन्धुकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदन्धकाच्छिदं तमन्तकच्छिदं भजे ॥

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी-
रसप्रवाहमाधुरीविजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥

जयत्यदभ्रविभ्रमभ्रमद्भुजङ्गनिश्वस-
द्विनिर्गमत्क्रमत्करालफालदिव्यहव्यवाट् ।
धिमिन्धिमिं धिमिं ध्वनन् मृदङ्गतुङ्गमङ्गल-
ध्वनिक्रमप्रवर्तित प्रचण्डताण्डवश्शिवः ॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो-
र्गरिष्ठरत्नलोष्टयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तयः कदा सदाशिवं भजामहे ॥

निलिम्पनिर्झरीतटीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिस्सदा शिरस्थमञ्जलिं वहन् ।
विमुक्तलोललोचनो ललामदामबन्धनं
शिवेति मन्त्रमुच्चरन्कदा सुखी भवाम्यहम् ॥

Colophon :

इति रावणविरचितं स्तोत्रं सम्पूर्णम् ।

Author—Rāvaṇa.

Remarks—The work is composed in Pañcacāmara metre.

॥ दक्षिणामूर्तिनवरत्नमालिका ॥

1242 A47. DAKṢIṆĀMŪRTINAVARATNAMĀLIKĀ.

Substance—Palm leaf. Size—7″ × 3″. Leaf—½. 17 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—15.

Subject etc.—Same as No. 1242 A20.

॥ लक्ष्म्यष्टोत्तरशतनामस्तोत्रम् ॥ (दारिद्र्यमोचनस्तोत्रम्)

1242 A48. LAKṢMYAṢṬOTTARAŚATA-NĀMASTOTRAM.

Substance—Palm leaf. Size—7″ × 3″. Leaves—1½. 16 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—42.

Subject—Invocatory verses relating to Lakṣmī.

Beginning:

महेश्वरी उवाच ।

देव देव महादेव त्रिकालज्ञ महेश्वर ।

करुणाकर सर्वेश भक्तानुग्रहकारक ॥

अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तद्वद ।

ईश्वर उवाच ।

देवि साधु महाभागे महाभाग्यप्रदायकम् ।

सर्वैश्वर्यकरं पुण्यं सर्वपापप्रणाशनम् ॥
सर्वदारिद्र्यशमनं श्रवणाद्भुक्तिमुक्तिदम् ।
राजवश्यकरं देवि गुह्याद् गुह्यतरं महत् ।
दुर्लभं सर्वदेवानां चतुष्पष्टिकलाप्रदम् ॥
पद्मादीनां निधीनां च नवानां यत्प्रदायकम् ।
समस्तदेवसेव्यमणिमाद्यष्टसिद्धिदम् ॥

End :

त्रिकालं यो जपेद्विद्वान्षण्मासं विजितेन्द्रियः ।
दारिद्र्यध्वंसनं कृत्वा श्रियं प्राप्नोत्यनिन्दिताम् ॥
सारं नाम्नां सहस्रेषु पुण्यमष्टोत्तरं शतम् ।
भृगुवारे शतं धीमान्पठेद्वत्सरमात्रकम् ॥
सर्वैश्वर्यं भवेत्तस्य नृत्यन्ति निधयो नव ।
यस्त्वेवं षड्ऋजैर्देवीं भृगुवारेऽर्चयेदजाम् ॥
वत्सरत्रयमात्रेण साक्षाद्वैश्रवणो भवेत् ।
यस्त्वेवं विष्णुगेहस्थो विल्वमूले वसन्सुधीः ॥
नियतं वा पठेन्नित्यं त्रिकालञ्च त्रिवत्सरम् ।
दारिद्र्यमपहायाशु धनधान्यञ्च विन्दति ॥
तस्मात्सर्वप्रयत्नेन श्रियं पूजय पार्वति ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रकः ॥

Colophon :

दारिद्र्यमोचनं नाम्नां स्तोत्रमष्टोत्तरं शतम् ।
श्रवणाद्भुक्तिमुक्तिःस्यात्स्मरणात्सर्वसंपदः ॥

Author :

Remarks—The work is in the form of a dialogue

between Pārvatī and Parameśvara and it is better known by the title, Dāridryamocana-stotra.

॥ शिवनवकम् ॥

1242 A49. ŚIVANAVAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—$\frac{1}{2}$. 14 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—10.

Subject—Same as No. 1215 B.

Beginning :

वेदशास्त्रपुराणेतिहासकाव्यकलादिषु ।
विज्ञानं देहि मे देव ऐन्नमः क्लीं शिवाय सौः ॥

चतुर्दशसु विद्यासु चतुष्पष्टिकलासु च ।
चतुरां धियमादेहि ऐन्नमः क्लीं शिवाय सौः ॥

मीमांसायां समस्तायां शब्दशास्त्रे विशेषतः ।
देहि मे देव सत्प्रज्ञां ऐन्नमः क्लीं शिवाय सौः ॥

गणितेषु हि सर्वज्ञ देहि मे परमेश्वर ।
सम्यग्ज्ञानं जगन्नाथ ऐंन्नमः क्लीं शिवाय सौः ॥

सकलेष्वपि काव्येषु सरसासु कथासु च ।
सावित्रीं देहि मे वाचं ऐन्नमः क्लीं शिवाय सौः ॥

End :

हृदयाम्भोरुहे नित्यं वस मे जगदीश्वर ।
हर मे दुरितं शश्वदैंनमः क्लीं शिवाय सौः ॥
जन्मान्तरकृतं पापं बुद्धेर्जाड्यकरं शिव ।

जहि जन्तुषु निद्रां मे ऐंनमः क्लीं शिवाय सौः ॥
विषयेषु विरक्तिं च विफलेषु विधेहि मे ।
विविधेषु हि विश्वेश ऐंनमः क्लीं शिवाय सौः ॥
मुक्तिमार्गपरश्चित्तं कुरु मे जगदीश्वर ।
मुग्धचन्द्रकलाचूड ऐंनमः क्लीं शिवाय सौः ॥

Colophon :

इत्येतन्नवकं नित्यं भक्तितो यः पठेन्नरः ।
प्रारम्भास्तस्य सिद्ध्यन्ति प्रार्थितश्चाशु सिद्ध्यति ॥

Author :

Remarks—Same as No. 1241 E.

॥ कृष्णस्तवः ॥

1242 A50. KṚṢṆASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 15 lines per page and 23 letters per line. Script—Malayāḷam. No. of Granthas—20.

Subject etc.—Same as No. 1225 I.

Author :

Remarks—The work is also known by the title of Mānasasnāna.

॥ किराताष्टकम् ॥

1242 A51. KIRĀTĀṢṬAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1.

15 lines per page and 23 letters per line.
Script—Malayāḷam. No. of Granthas—25.

Subject etc.—Same as No. 1210 Z.

Remarks—The opening verse cited in No. 1210 Z is missing herein.

॥ भविष्योत्तरम् ॥

1242 A52. BHAVIṢYOTTARAM.

Substance—Palm leaf. Size—7″ × 3″. Leaves—2.
15 lines per page and 20—24 letters per line.
Script—Malayāḷam. No. of Granthas—50.

Subject—A critical note on the future.

Beginning:

भविष्योत्तरपुराणे तृतीयाध्याये ईश्वरागस्त्यसंवादे ईश्वर उवाच—

शृणु कुम्भज वक्ष्यामि भविष्यद्वृत्तमादितः ।
मन्नियोगाद्भविष्यन्ति धर्माधर्माश्चतुर्युगे ॥
तेषामाद्यं कृतं विद्धि ततस्त्रेतायुगं मुने ।
तृतीयं द्वापरं प्रोक्तं ततः कलियुगं मुने ॥
मनुमान्धातृसगरा भविष्यन्ति कृते युगे ।
त्रेतायाञ्चैव रामाद्या द्वापरान्ते यदद्वहः ॥
भविष्यति हि धर्माद्यैस्सहितो मन्नियोगतः ।
भविष्यन्ति च कल्यादौ जनमेजयवंशजाः ॥
चेरा द्वादशसंख्याकाः सोमवंशांशसंभवाः ।

End:

निर्मर्यादास्ततो हूणा भविष्यन्ति ततो मुने ।
तानाश्रित्य नृपाः केचिद्गोब्राह्मणहितैषिणः ॥
पालयिष्यन्ति वर्माख्याः केरळेषु क्वचित्क्वचित् ।
दुर्गा त्रिंशत्सहस्रान्ते पृथ्वीं त्यक्ष्यति कुम्भज ॥
तावत्कालं हि ते भूपाः पालयिष्यन्ति केरळान् ।
ततः कल्यन्तिमे प्राप्ते धर्मसंस्थापनाय च ॥
ममानुज्ञां समासाद्य विष्णुः कल्यात्मना मुने ।
हूणान् म्लेच्छान् तदा विष्णुर्नाशयिष्यत्ययोनिजः ॥
तां दिशं गच्छ भद्रं ते ममाज्ञां शिरसा वहन् ।
संभविष्यन्ति कल्क्यादौ हरदत्तादयो मुने ॥
इति तृतीयेऽध्याये ।
अथ एकादशेऽध्याये क्षेत्रानुक्रमणप्रकरणे देवीं प्रति शिवः
येषु क्षेत्रेषु मद्भक्त्या गत्वा स घटसंभवः ।
मामर्चयित्वा देवेशि स्कन्दविष्णवालयेषु च ॥

* * * * * *

कन्याकुब्जे पद्मनाभे तोताद्रौ च महेन्द्रके ।
काश्यारण्ये च जप्येशे श्रीवाञ्छे च वसाम्यहम् ॥

Colophon:

इति एकादशाध्याये । ശ്രീമതി സഹായം. श्रीरामजयम् ।

Author:

Remarks—The work is in the form of a dialogue between Īśvara and Agastya. It is borrowed from the Bhaviṣyottarapurāṇa.

॥ नाट्यशास्त्रसंक्षेपः ॥ [भरतार्णवः]

1242 A53. NĀṬYAŚĀSTRASAMKṢEPA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 15 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—16.

Subject—A compendium of the science of histrionics.

Beginning:

चतुस्सहस्रसंख्याकैर्ग्रन्थैश्च परिपूरितम् ।

नन्दी—

भरतार्णवशास्त्रन्तु सुमते शृणु सादरम् ॥

सुमतिः—

नन्दिकेश दयामूर्ते विस्तरान् संविहाय मे ।
संक्षिप्य नाट्यसारांशान् क्रमपूर्वमुदाहर ॥

नन्दी—

तथा वदामि सुमते संक्षिप्य भरतार्णवम् ।
शिवेन रचितं पूर्वं नाट्यवेदानुसारिणा ॥

मस्तकं नयने पादौ करौ ग्रीवा मनो वपुः ।
एवमङ्गानि सप्त स्युर्नाटकाङ्गानि वै क्रमात् ॥

पताकस्त्रिपताकोऽर्धपताकः कर्तरीमुखः ।
मयूराख्योऽर्धचन्द्रः स्यादराळश्शुकतुण्डकः ॥

End:

प्रसारणादङ्गुलीनामङ्गुष्ठस्य तु कुञ्चनात् ।
पताकाख्यकरः प्रोक्तः करटीकाविचक्षणैः ॥

विनियोगः ।

नाट्यारम्भे वारिवाहे वने वस्तुनिषेधके ।
कुचस्थलेऽग्निशम्याञ्च नद्याममरमण्डले ॥
तुरगे खण्डने वायौ शयने गमनोदिते ।
प्रतापे च प्रसादे च चन्द्रिकायां घनातपे ॥
कवाटबन्धने सप्ताविभक्तयर्थे तरङ्गके ।
अव्ययार्थेषु युज्यन्ते पताका ह्युत्तमस्त्रियाम् ।

Colophon :

Author :

Remarks—This work is not noticed in RCMPL. It deals with the different items constituting a drama and also with 16 signs employed therein. Of these, the definition and application of patākā alone are expounded in this Ms. Some verses seen herein occur in the Bālarāmabhāratam, No. 118, TSS.

॥ पार्वतीस्तवः ॥

1242 A54. PĀRVATĪSTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 15 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas — 15.

Subject etc.—Same as No. 1146 Q.

॥ नवग्रहस्तुतिः ॥

1242 A55. NAVAGRAHASTUTI.

Substance—Palm leaf. Size—7″ × 3″. Leaf—½.
19 lines per page and 16 letters per line.
Script—Malayāḷam. No. of Granthas—9.

Subject—A panegyric of the nine planets.

Beginning:

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥
श्वेताम्बरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डधरो द्विबाहुः ।
चन्द्रोऽमृतात्मा वरदः प्रशान्तः श्रेयांसि मह्यं विदधातु देवः ॥
रक्ताम्बरो रक्तवपुः किरीटी ..... मेषगतो गदाभृत् ।
धरासुतश्शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः ॥
पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दण्डधरश्च हारी ।
चर्मासिभृत्सोमसुतस्सदा मे सिंहाधिरूढो वरदोऽस्तु नित्यम् ॥
पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः ।
दधाति दण्डञ्च कमण्डलुञ्च तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥

End:

श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः ।
दधाति दण्डञ्च कमण्डलुञ्च तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥
नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।
चतुर्भुजः सूर्यसुतः प्रशान्तः सदास्तु मह्यं वरमन्दगामी ॥
नीलाम्बरो नीलवपुः किरीटी करालवक्त्रः करवाळशूली ।
चतुर्भुजश्चर्मधरश्च राहुर्व्याघ्राधिरूढो वरदोऽस्तु मह्यम् ॥

धूम्रो द्विबाहुर्वरदो गदाभृद् गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूरविभूषिताङ्गस्स चास्तु मे केतुगणः प्रशान्तः ॥

Colophon :

Author :

Remarks—The work is not noticed in RCMPL.

॥ सौराष्टकम् ॥

1242 A56. SAURĀṢṬAKAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—½. 13 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—25.

Subject etc.—Same as No. 1147 E.

॥ कृष्णस्तवः ॥

1242 A57. KṚṢṆASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 14 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—21.

Subject—Same as No. 1225 I.

Beginning :

त्वत्पादपद्ममहिमानमवेति को वा
लोके शुभंयुरमणीयगुणैकधामन् ।

यन्निःसृतं सलिलमा परमेष्ठिधिष्ण्या-
द्विश्वं पुनाति भगवन्नरविन्दनाभ ॥

अत्यन्तदुस्सहभवामयपीडितानां
सिद्धौषधं भुवनमङ्गलसन्निधानम् ।
वन्दे पयोनिधिसुताकरपद्मयुग्म-
संभावितं भगवतश्चरणारविन्दम् ॥

तापत्रयार्कपरितप्तजनातपत्रं
पापौघपर्वतविदारणतीव्रवज्रम् ।
भक्तान्तरङ्गविधुकान्तहिमांशुविम्बं
वन्दे रमारमणपादसरोजयुग्मम् ॥

End:

त्वद्रूपमेतदखिलं खलु दृश्यमानं
त्वन्मायया विरचितं त्वयि निर्विकल्पे ।
भूमात्मनीति सततं दृढनिश्चयेन
श्रीकृष्ण निर्भयमहं विहराम्यशोकः ॥

त्वामन्तरेण पुरुषोत्तम सामरेशं
कालाहिदष्टमखिलं जगदच्युतात्मन् ।
दिष्ट्या त्वदङ्घ्रिकमलं परिरभ्य कृष्ण
कालाहिभीतिहरमस्म्यभयस्सुखात्मा ॥

श्रीकृष्ण दीनजनरक्षणबद्धकच्छ
त्रैलोक्यमङ्गलमनोज्ञविशुद्धकीर्ते ।
प्रत्यक्चिदेकरसनिर्मलनित्यशुद्ध-
स्वानन्दपूर्ण परिपालय मामजस्रम् ॥

Colophon :

Author :

Remarks—Same as No. 1241 E.

॥ शिवनामाष्टोत्तरशतम् ॥

1242 A58. ŚIVANĀMĀṢṬOTTARAŚATAM.

Substance—Palm leaf. Size—7″ × 3″. Leaf—½. 20 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—15.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1240 C.

॥ आर्यस्तवः ॥

1242 A59. ĀRYASTAVA.

Substance—Palm leaf. Size—7″ × 3″. Leaf—1. 22 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—35.

Subject—A panegyric of Śāstā.

Beginning :

सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
सर्वयज्ञफलं यच्च कं स्तुत्वा लभते नरः ॥
तीर्थदानमयान्कर्तुमशक्तस्तु कलौ युगे ।
एतदाचक्ष्व नस्सर्वं भक्तानां नन्दिकेश्वर ॥

नन्दिकेश्वरः ।

श्रूयतामभिधास्यामि सुखोपायं महाफलम् ।
आर्यस्तवं महापुण्यं श्रीप्रदं कुलवर्धनम् ॥
आर्यश्शास्ता गुहासन्नस्सेनानीर्भूतवल्लभः ।
रुद्रजो रूपवान्कामी वरदो नीललोहितः ॥
नीलाश्वः श्वेतमातङ्गः श्यामी पीतानुलेपनः ।
रक्तमालाधरः शूरोऽमायो मातृगणप्रियः ॥
काळवासा गणाध्यक्षः खड्गहस्तो धनुर्धरः ।
सहजायो जनावेशः साधुस्संसाररक्षकः ॥
उन्मत्तो ललितश्चैव हरश्च मदनस्तथा ।
वर्धिष्णुर्भूतसेनानीर्महेश्वरसुतः प्रभुः ॥

End :

भूतनाथ सदानन्द सर्वभूतदयापर ।
रक्ष रक्ष महाबाहो शास्त्रे तुभ्यन्नमो नमः ॥
कोदण्डी कुण्डली खड्गी बली कामी जयी सुखी ।
नीलनीरदनीलाङ्गश्शास्ता रक्षतु मां चिरम् ॥
रक्तां रक्तोज्ज्वलाकल्पां सुरूपां कान्तयौवनाम् ।
धृतवीणां प्रभां वन्दे देवीं रक्तान्तलोचनाम् ॥
तमालश्यामळं भद्रं पिशङ्गाकल्पसुन्दरम् ।
अधिज्यकार्मुकं वन्दे सत्यकं सत्ययौवनम् ॥
इदं स्तोत्रं पठेद्यस्तु शृणुयाद्वापि भक्तितः ।
स हि कामानवाप्नोति सत्यमेव कलौ युगे ॥
आराधय परं श्रेष्ठं कायवाङ्मनसैस्सदा ।
सर्वभूतात्मभूतस्य सर्वदुःखौषधस्य च ॥

Colophon :

आर्यस्तवं शुचिर्भूत्वा त्रिसन्ध्यं नियतः पठेत् ।
विमुक्तस्सर्वपापेभ्यः पदं गच्छत्यनामयम् ॥
स्निग्धाराळविसारिकुन्तळभरं सिंहासनाध्यासिनं
स्फूर्जत्पत्रसुकल्पकुण्डलमथेष्वासभृद्दोर्द्वयम् ।
नीलक्षौमवसं नवीनजलदश्यामं प्रभासत्यक-
स्फायत्पार्श्वयुगं सुरक्तसकलाकल्पं स्मरेदार्यकम् ॥

Author :

Remarks—In RCMPL. this work is designated as Svapnādhyāya.

॥ विष्णुस्तवः ॥

1243 A. VIṢṆUSTAVA.

Substance—Palm leaf. Size—14½" × 2". Leaf—1. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—35.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1242 A.

॥ विष्णुकवचम् ॥

1243 B. VIṢṆUKAVACAM.

Substance—Palm leaf. Size—14½" × 2". Leaf—1. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1242 B.

॥ विष्णुकेशादिपादस्तवः ॥

1243 C. VIṢṆUKEŚĀDIPĀDASTAVA.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—2. 9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—40.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1146 L.

Remarks—The stanza commencing with 'मरतकमणि—' in No. 1146 L is missing herein.

॥ सुदर्शनकवचम् ॥

1243 D. SUDARŚANAKAVACAM.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—27. Complete.

Subject etc.—Same as No. 1210 F.

Remarks—The work deals with the ways and means for the destruction of one's enemies.

॥ गरुडनामाष्टोत्तरशतम् ॥

1243 E. GARUḌANĀMĀṢṬOTTARAŚATAM.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—2.

9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—45.

Subject etc.—Same as No. 1159.

॥ गरुडस्तवः ॥

1243 F. GARUḌASTAVA.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—7.

Subject—Same as No. 1159.

Beginning etc.—Same as No. 1242 I.

॥ गरुडकवचम् ॥

1243 G. GARUḌAKAVACAM.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1. 9 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject—Same as No. 1159.

Beginning etc.—Same as No. 1242 J.

Remarks—Mantras contained in this work are employed for counteracting the effects of poison.

॥ हनुमद्द्वादशकम् ॥

1243 H. HANUMADDVĀDAŚAKAM.

Substance—Palm leaf. Size—14½″—2″. Leaf—1.

9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—24.

Subject etc.—Same as No. 1210 U.

॥ हनुमद्भुजङ्गप्रयातम् ॥

1243 I. HANUMADBHUJAṄGAPRAYĀTAM.

Substance—Palm leaf. Size—14½″×2″. Leaf—1. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—27.

Subject etc.—Same as No. 1242 Y.

॥ शिवस्तवः ॥

1243 J. ŚIVASTAVA.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1242 Z.

॥ पञ्चायुधस्तवः ॥

1243 K. PAÑCĀYUDHASTAVA.

Substance—Palm leaf. Size—14½″×2″. Leaf—1. 6 lines per page and 48 letters per line.

Script — Malayāḷam. No. of Granthas—10. Complete.

Subject etc.—Same as No. 1146 P.

॥ षण्मुखस्तवः ॥

1243 L. ṢAṆMUKHASTAVA.

Substance—Palm leaf. Size—14½" × 12". Leaf—1. 7 lines per page and 48 letters per line. Script — Malayāḷam. No. of Granthas—10..

Subject etc.—Same as No. 1242 A 11.

॥ श्रीशैलनाथस्तोत्रम् ॥

1243 M. ŚRĪŚAILANĀTHASTOTRAM.

Substance—Palm leaf. Size—14½" × 2". Leaf—1. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas — 21. Complete.

Subject etc.—Same as No. 1242 A 19.

Remarks—This work is a panegyric of Dakṣiṇāmūrti in Śrīśaila.

॥ शिवनामाष्टोत्तरशतम् ॥

1243 N. ŚIVANĀMĀṢṬOTTARAŚATAM.

Substance—Palm leaf. Size—14½" × 2". Leaf—1.

9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—15. Complete.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1240 C.

॥ आर्यस्तवः ॥

1243 O. ĀRYASTAVA.

Substance—Palm leaf. Size—14½" × 2". Leaves—2. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas — 36. Complete.

Subject etc.—Same as No. 1242 A 59.

॥ किरातास्टकम् ॥

1243 P. KIRĀTĀṢṬAKAM.

Substance—Palm leaf. Size—14½" × 2". Leaf—1. 9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—24.

Subject etc.—Same as No. 1210 Z.

॥ माधवस्तवराजः ॥

1243 Q. MĀDHAVASTAVARĀJA.

Substance—Palm leaf. Size—14½" × 2". Leaves—4,

8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—75.

Sbject—Same as No. 1214.

Beginning etc.—Same as No. 1146 F.

॥ कृष्णस्तवराजः ॥

1243 R. KṚṢṆASTAVARĀJA.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—7. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—140.

Subject—Same as No. 1225 I.

Beginning etc.—Same as No. 1146 E.

॥ कृष्णानुस्मृतिः ॥

1243 S. KṚṢṆĀNUSMṚTI.

Substance—Palm leaf. Size—14½ × 2″. Leaves—4. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—80.

Subject—Same as No. 1225 I.

Beginning etc.—Same as No. 1246 C.

॥ कृष्णाष्टकम् ॥

1243 T. KṚṢṆĀṢṬAKAM.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1.

8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—18. Complete.

Subject—Same as No. 1225 I.
Beginning etc.—Same as No. 1213 D.

॥ विष्णुस्तवः ॥

1243 U. VIṢṆUSTAVA.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—18. Complete.

Subject—Same as No. 1214.
Beginning etc.—Same as No. 1154 D.

॥ रामस्तवराजः ॥

1243 V. RĀMASTAVARĀJA.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—4. 9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—90.

Subject—Same as No. 1225 F.
Beginning etc.—Same as No. 1146 M.

॥ रामानुस्मृतिः ॥

1243 W. RĀMĀNUSMṚTI.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1,

8 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject—Same as No. 1225 F.

Beginning etc.—Same as No. 1213 G.

॥ नृसिंहाष्टकम् ॥

1243 X. NṚSIMHĀṢṬAKAM.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject etc.—Same as No. 1172 A 7.

॥ लक्ष्मीनृसिंहस्तवः ॥

1243 Y. LAKṢMĪNṚSIMHASTAVA.

Substance—Palm leaf. Size—14½″ × 2″. Leaf—1. 8 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—22.

Subject etc.—Same as No. 1161 J.

॥ आत्मार्पणस्तवः ॥

1243 Z. ĀTMĀRPAṆASTAVA.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—5. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject etc.—Same as No. 1145.

॥ विष्णुस्तवः ॥

1243 A1. VIṢṆUSTAVA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—3. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—45.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1213 K.

Remarks—The title Nāradastava, as pointed out in RCMPL. is given after the author.

॥ अपामार्जनस्तवः ॥

1243 A2. APĀMĀRJANASTAVA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—7. 8 lines per page and 44 letters per line. Script —Malayāḷam. No. of Granthas—155.

Subject etc.—Same as No. 1213 L.

॥ गोविन्दस्तवराजः ॥

1243 A3. GOVINDASTAVARĀJA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—8. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject etc.—Same as No. 1213 M.

॥ गीतात्रिष्टुप् ॥

1243 A4. GĪTĀTRIṢṬUP.

Substance — Palm leaf. Size—14″ × 2″. Leaf—1. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—10.

Subject—Effects identical with those arising out of the recital of Gīta.

Beginning :

स्थाने हृषीकेश तव प्रवृत्त्या सहस्रारं हुंफट् हृदयाय नमः ।
जगत् प्रहृष्यत्यनुरज्यते च सहस्रारं हुंफट् शिरसे स्वाहा ।
रक्षांसि भीतानि दिशो द्रवन्ति सहस्रारं हुंफट् शिखायै वषट्...

End :

अग्नीषोमात्मकमरिगदाशार्ङ्गखड्गैः सशङ्खै-
रुद्यद्बाहुं हलमुसलशूलैः सदण्डैः सकुन्तैः ।
शक्त्या पाशाङ्कुशकुलिशटङ्कादिभिश्चार्कवह्नि-
द्योतद्वक्त्राङ्घ्रिकसरसिजं तप्तकार्तस्वराभम् ॥

विष्णुं भास्वत्किरीटं मणिमकुटकटीसूत्रकेयूरहार-
ग्रैवेयोर्म्यादिमुख्याभरणमणिगणोल्लासिदिव्याङ्गरागम् ।
आशाकाशावकाशप्रविततमयुतादित्यनीकाशमुद्यद्-
बाह्वग्र्यग्रनानायुधनिकरधरं विश्वरूपं नमामि ॥

Colophon :

Author :

Remarks—Same as No. 1241 E.

॥ विष्णुपञ्जरम् ॥

1243 A5. VIṢṆUPAÑJARAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—2.
8 lines per page and 40 letters per line.
Script—Malayāḷam. No. of Granthas—40.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1064 E.

॥ नृसिंहस्तवः ॥

1243 A6. NṚSIMHASTAVA.

Substance—Palm leaf. Size—14″ × 2″. Leaf—1.
8 lines per page and 40 letters per line.
Script—Malayāḷam. No. of Granthas—15.

Subject etc.—Same as No. 1213 O.

॥ नारायणकवचम् ॥

1243 A7. NĀRĀYAṆAKAVACAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—3.
8 lines per page and 40 letters per line.
Script—Malayāḷam. No. of Granthas—60.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1213 P.

॥ विष्णुनामाष्टोत्तरशतम् ॥

1243 A8. VIṢṆUNĀMĀṢṬOTTARAŚATAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—3. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—45.

Subject etc.—Same as No. 1213 Q.

॥ एकादशीमाहात्म्यम् ॥

1243 A9. EKĀDAŚĪMĀHĀTMYAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—4. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—90.

Subject etc.—Same as No. 1213 R.

॥ विष्णुस्तुतिः ॥

1243 A10. VIṢṆUSTUTI.

Substance—Palm leaf. Size—14″ × 2″. Leaves—2. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—40.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1213 S.

Remarks—In RCMPL this work is not noticed.

॥ नारायणादिध्यानम् ॥

1243 A11. NĀRĀYAṆĀDIDHYĀNAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—3. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—60.

Subject etc.—Same as No. 1213 T.

Remarks—A few Dhyānaślokas are copied in this codex more than once. The verses of meditation on Sadāśiva, Gaurī etc. though separately given in RCMPL are herein brought under a single heading.

॥ द्वादशाक्षरध्यानादि ॥

1243 A12. DVĀDAŚĀKṢARADHYĀNĀDI.

Substance — Palm leaf. Size—14″ × 2″. Leaf—1. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject etc.—Same as No. 1213 U.

॥ गुरुस्तवः ॥

1243 A13. GURUSTAVA.

Substance—Palm leaf. Size—14″ × 2″. Leaf—1. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject etc.—Same as No. 1213 V.

Remarks—The subject A portion is seen in addition to what is furnished in the remarks under No. 1213 V.

॥ रामध्यानादि ॥

1243 A14. RĀMADHYĀNĀDI.

Substance—Palm leaf. Size—14″ × 2″. Leaf—1. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—18.

Subject etc.—Same as No. 1213 X

॥ घण्टाकर्णमन्त्रः ॥

1243 A15. GHAṆṬĀKARṆAMANTRA.

Substance—Palm leaf. Size—14″ × 2″. Leaf—1. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—6.

Subject etc.—Same as No. 1213 Y.

॥ वेदपादस्तवः ॥

1244. VEDAPĀDASTAVA.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—7. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—220.

Subject—A panegyric of Naṭarāja.

Beginning:

श्रीकनकसभापतये नमः ।

पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।
किं चकार महायोगी सूत नो वक्तुमर्हसि ॥

श्रीसूत उवाच—

भगवान् जैमिनिर्धीमान् पुण्डरीकपुरे पुरा ।
महर्षिसिद्धगन्धर्वयक्षकिन्नरसेविते ॥
नृत्याद्भिरप्सरस्संघैर्दिव्यगानैश्च शोभिते ।
नृत्यन्तं परमीशानं ददर्श सदसि प्रभुम् ॥
ननाम दूरतो दृष्ट्वा दण्डवत् क्षितिमण्डले ।
प्रातरुत्थाय देवस्य ताण्डवामृतमङ्गलम् ॥
पार्श्वस्थितां महादेवीं पश्यन्तीं तस्य ताण्डवम् ।
दृष्ट्वा सुसंहृष्टमनाः पपात पुरतो मुनिः ॥
ततः शिष्यान् समाहूय वेदशास्त्रार्थपारगान् ।
अग्निकेशमकेशं च शतयागं जटाधरम् ॥
वक्रनासं समित्पाणिं धूमगन्धिं कुशासनम् ।
एतैः सार्धं महादेवं पूजयामास जैमिनिः ॥

End:

पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
यस्तु वाचयते नित्यं स शिवो नात्र संशयः ॥

इदं कमलसुन्दरं सदसि काञ्चने नृत्यतं
सदञ्चितमुदञ्चितं किमपि कुञ्चितं चञ्चलम् ।

विचिन्तय चिदम्बरे हृदय सम्पदे शाश्वतं
विरिञ्चकरकन्दुकं चरणमिन्दुचूडामणेः ॥

नाहं बिभेमि भुजगान्न च कालकूटा-
न्नाप्यन्तरान्न निरयान्न दरिद्रतायाः ।
तस्माद्बिभेमि नतु हेमसभेश्वरस्य
योऽन्यं सदं कलयते वसुधातलेऽस्मिन् ॥

कमलभवशुकेन्द्रनिर्जरेन्द्र-
स्तुतिनतिसम्भ्रमनृत्तविभ्रमाय ।
अचलपतिसुतासुखाय तुभ्यं
कनकसभापतये नमः शिवाय ॥

मधुरिपुविधिशक्रमुख्यदेवै-
रपि नियमार्चितपादपङ्कजाय ।
कनकगिरिशरासनाय तुभ्यं
रजतसभापतये नमः शिवाय ॥

आनन्दनृत्तसमये नटनायकस्य
पादारविन्दमणिनूपुरशिञ्जितानि ।
आनन्दयन्ति मदयन्ति विमोहयन्ति
रोमाञ्चयन्ति नयनानि कृतार्थयन्ति ॥

पुण्डरीकपुरमध्यवासिनीं
नृत्तराजसह(मध्य?धर्म)चारिणीम् ।
अद्रिराजतनयां दिने दिने
चिन्तयामि शिवकामसुन्दरीम् ॥

श्रीसुन्दरेश्वराय नमः ।
ओं तत्सत् । शिवार्पणमस्तु ।

Colophon :

ओं वेदपादस्तवः सम्पूर्णः । हरिः ओम् ।

Author :

Remarks—The work deals with the glorification of the presiding deity of Puṇḍarīkapura (Vaikam, Travancore).

॥ शनिस्तवः ॥

1245 A. ŚANISTAVA.

Substance—Palm leaf. Size—5" × 1½". Leaves—11. 7 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—65.

Subject etc.—Same as No. 1164 A9.

Remarks—A few leaves in the middle are damaged.

॥ श्यामलादण्डकम् ॥

1245 B. ŚYĀMALĀDAṆḌAKAM.

Substance—Palm leaf. Size—5" × 1½". Leaves—9. 6 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as No. 1224.

Beginning etc.—Same as No. 1168 B.

॥ शिवकवचम् ॥

1245 C. ŚIVAKAVACAM.

Substance—Palm leaf. Size—5" × 1½". Leaves—9.

6—8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—75.

Subject—Same as No. 1147 G.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

ऋषभ उवाच—

नमस्कृत्वा महादेवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये (शिवमयं) वर्म सर्वरक्षाकरं नृणाम् ॥
शुचौ (देशे) समासीनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥

हृत्पुण्डरीकान्तरसन्निविष्टं
स्वतेजसा व्याप्तनभोवकाशम् ।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं
ध्यायेत्परानन्दमयं महेशम् ॥

ध्यानावधूताखिलकर्मबन्धः
(चिरं चि)दानन्दनिमग्नचेताः ।
षडक्ष(रन्यास) समाहितात्मा
शैवेन कुर्यात्कवचेन रक्षाम् ॥

मां पातु देवोऽखिलदेवतात्मा
संसारकूपे पतितं गभीरे
(त्वन्ना)म दिव्यं परमन्त्रमूलं
धुनोतु मे (सर्व)मघं हृदिस्थम् ॥

End:

सर्वदारिद्र्यशमनं सर्वमङ्गलवर्धनम् ।
यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥

महापातकसंघातैर्मुच्यते चोपपातकैः ।
देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ॥

त्वमपि शुद्धया वत्स शैवं कवचमुत्तमम् ।
धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥

ओं परमेश्वराय नमः ।

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महेश्वर ॥

Colophon :

Author :

Remarks—A few leaves are damaged in the middle.

॥ शनिस्तवः ॥

1246. ŚANISTAVA.

Substance—Palm leaf. Size—5″ × 1¾″. Leaves—6. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—60. Complete.

Subject etc.—Same as No. 1164 A9.

Author :

Remarks—The work is employed for expelling the evil influences of Śani. The opening Fol. is numbered 23.

॥ शनिस्तवः ॥

1247. ŚANISTAVA.

Substance—Palm leaf. Size—$3\frac{1}{3}'' \times 1\frac{1}{4}''$. Leaves—15. 6 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—65. Complete.

Subject etc.—Same as No. 1164 A9.

Author:

Remarks—The colophon indicates that the work is borrowed from the Skāndapurāṇa. The leaves are much decayed. After the colophon the following verse is cited:

"अश्वत्थपृष्ठे शरचापहस्तं
तिष्ठन्तमीड्यं वरदं वरेण्यम् ।
शनैश्चरं भूतगणैर्वृतं तं
नमाम्यहं दुःखविनाशनाय ॥

॥ शनिस्तवः ॥

1248. ŚANISTAVA.

Substance—Palm leaf. Size—$7'' \times 1\frac{1}{2}''$. Leaves—6. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—60. Complete.

Subject etc.—Same as No. 1164 A9.

Author :

Remarks—A few variants at the close are noticeable.

॥ शनिस्तवः ॥

1249. ŚANISTAVA.

Substance—Palm leaf. Size—7¼" × 1½". Leaves—6. 7 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—60.

Subject etc.—Same as No. 1164 A9.

Author :

Remarks—The following verse occurs after the colophon :

"गुरुप्रसादेन समस्तविद्या
विद्याप्रसादेन सतां च वृत्तिम् ।
सद्वृत्तियोगेन गिरीशभक्तिं
भक्त्या च मुक्तिं सुधियो लभन्ते ॥'

॥ शास्तृसहस्रनामावलिः ॥

1250 A. ŚĀSTṚSAHASRANĀMĀVALI.

Substance—Palm leaf. Size—11¼" × 1⅛". Leaves—30. 6 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—225. Complete.

Subject—A panegyric of Śāstā.

Beginning:

शिवपुत्राय नमः । महातेजसे नमः । शिवकार्यधुरंधराय नमः । शिवप्रदाय नमः । शिवज्ञानिने नमः । शिवधर्मसुरक्षिताय नमः । शङ्खधारिणे नमः । सुराध्यक्षाय नमः । चन्द्रमौलये नमः । सुरोत्तमाय नमः । कामेशाय नमः । कामतेजस्विने नमः । कामादिफलसंयुताय नमः । कल्याणाय नमः । कोमलाङ्गाय नमः । कल्याणफलदायकाय नमः । करुणाब्धये नमः । कर्मदक्षाय नमः । करुणामृतदायकाय नमः । जगत्प्रियाय नमः ।

End:

हीरसदृशकण्ठाय नमः । हीरसदृशक्षमाय नमः । हीरसदृशस्तवाय नमः । तन्त्रिवादनहस्ताग्राय नमः । सङ्गीतप्रियमानसाय नमः । चिताशमुकुरावासाय नमः । मणिकूटाद्रिसञ्चाराय नमः । लीलासञ्चारतनुकाय नमः । ...ग्याङ्गशास्तप्रदायकाय नमः । नागेन्दुद्युतिसम्पन्नाय नमः । रागकर्मफलप्रदाय नमः । मैनाद्रिगिरिसञ्चाराय नमः । मधुवंशविनाशनाय नमः । तालखण्डपुरवासाय नमः । तमाललतातेजसे नमः ।

ओं श्रीपूर्णपुष्कलाम्बासमेतश्रीहरिहरपुत्रस्वामिने नमः ।

Colophon:

इति शास्तृषड्? स्रष्टोत्तरसहस्रनामानि ॥ शुभम् ।

शास्ता अष्टोत्तरसहस्रनामार्चनं सम्पूर्णम् ॥

Author:

Remarks—The Ms. is somewhat damaged. Only the invocatory mantras are extant herein.

॥ गणपत्यष्टोत्तरशतनामावलिः ॥

1250. B GAṆAPATYAṢṬOTTARA-ŚATANĀMĀVALI.

Substance--Palm leaf. Size—11¼″ × 1⅛″. Leaves—4. 5 lines per page and about 20 letters per line. Script—Malayāḷam. No. of Granthas—25. Complete.

Subject—Mantras pertaining to the worship of Gaṇapaty.

Beginning:

गजाननाय नमः । गणाध्यक्षाय नमः । विघ्नराजाय नमः । विनायकाय नमः । द्वैमातुराय नमः । द्विपमुखाय नमः । प्रमुखाय नमः । सुमुखाय नमः । कृतिने नमः । सुप्रदीपाय नमः । सुखनिधये नमः । सुराध्यक्षाय नमः । सुरारिघ्नाय नमः । महागणपतये नमः । मान्याय नमः । भवात्मजाय नमः । पुराणपुरुषाय नमः । पूष्णे नमः । पुष्करो ... ... रिणे नमः । अग्रगण्याय नमः ।

End:

अभीष्टवरदाय नमः । ज्योतिषे नमः । आक्रान्तचिदचित्प्रभवे नमः । कल्याणगु(णी)रवे नमः । उन्मत्तवेषाय नमः । वरजिते नमः । समस्तजगदाधाराय नमः । सर्वैश्वर्यप्रदाय नमः । श्रीविघ्नेश्वराय नमः ।

Colophon:

गणपत्यष्टोत्तरार्चनं समाप्तम् ।

शुभमस्तु ।

Author :

Remarks—A few leaves are worn out.

॥ लक्ष्म्यष्टोत्तरशतनामावलिः ॥

1250. C LAKṢMYAṢṬOTTARA-ŚATANĀMĀVALI.

Substance—Palm leaf. Size—$11\frac{1}{4}'' \times 1\frac{1}{8}''$. Leaves—$3\frac{1}{2}$. 5 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—22. Complete.

Subject—Glorification of the Goddess Lakṣmi.

Begininng :

प्रकृत्यै नमः । विकृत्यै नमः । विद्यायै नमः । सर्वभूतहितप्रदायै नमः । श्रद्धायै नमः । विभूत्यै नमः । सुरभ्यै नमः । परात्मिकायै नमः । वाचे नमः । पद्मालयायै नमः । पद्मायै नमः । शुचये नमः । स्वाहायै नमः । स्वधायै नमः । सुधायै नमः । धन्यायै नमः । हिरण्मयायै नमः । लक्ष्म्यै नमः । नित्यपुष्टायै नमः । विभावर्य्यै नमः ।

End:

विष्णुपत्न्यै नमः । प्रसन्नाक्ष्यै नमः । नारायणसमाश्रितायै नमः । दारिद्र्यध्वंसिन्यै नमः । देव्यै नमः । सर्वोपद्रववारिण्यै नमः । महाकाल्यै नमः । ब्रह्मविष्णुशिवात्मिकायै नमः । त्रिकालज्ञानसम्पन्नायै नमः । भुवनेश्वर्यै नमः ।

Colophon :

इति श्रीलक्ष्म्यष्टोत्तरशतनामावलिस्समाप्ता ।

Author :

Remarks—Same as No. 1241 E.

॥ शिवकवचम् ॥

1251. ŚIVAKAVACAM.

Substance—Palm leaf. Size—7″ × 1⅝″. Leaves—7. 7--9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—75.

Subject—Beginning—Same as No. 1245 C.

End :

एष शङ्खो मया दत्तस्तपोमन्त्रानुभावतः ।
अस्य शङ्खस्य निर्ह्रादं ये शृण्वन्ति तवाहिताः ॥
ते मूर्छिताः पतिष्यन्ति न्यस्तशस्त्रा विचेतनाः ॥
शङ्खखड्गाविमौ दिव्यौ परसैन्यविघातिनौ ।
आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्धनम् ॥
शङ्खखड्गप्रभावेन शैवेन कवचेन च ।
द्विपट्सहस्रनागानां बलेन महतापि च ।
भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि ।
प्राप्य सिंहासनं (पित्र्यं गोप्तासि पृथिवीमिमाम्) ॥
(इति भद्रायुषं सम्यगनुगृह्य समातृकम्)।
ताभ्यां संपूजितस्सोऽथ योगी स्वैरगतिर्ययौ ।

Colophon :

इति ब्रह्मोत्तरखण्डे शिवकवचं नाम चतुस्त्रिंशोऽध्यायः ।

Author :

Remarks—The Ms. is partly damaged.

॥ शिवकवचम् ॥

1252. ŚIVAKAVACAM.

Substance—Palm leaf. Size—$9\frac{1}{4}'' \times 1\frac{5}{8}''$. Leaves—5. 8—10 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—90. Complete.

Subject—Same as No. 1245 C.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

अस्य श्रीशिवकवचस्तोत्रमहामन्त्रस्य । ऋषभयोगी ऋषिः । अनुष्टुप् छन्दः । श्रीसाम्बसदाशिवो देवता । ओं बीजम् । ह्रीं शक्तिः । श्रीं कीलकम् । मम सर्वाभीष्टसिद्ध्यर्थे सर्वग्रहदोषनिवारणार्थे आयुरारोग्याभिवृद्ध्यर्थे जपे विनियोगः । न्यासं कृत्वा, ओं अङ्गुष्ठाभ्यां नमः । नं तर्जनीभ्यां नमः । मं मध्यमाभ्यां नमः । शिं अनामिकाभ्यां नमः । वं कनिष्ठिकाभ्यां नमः । यं करतलकरपृष्ठाभ्यां नमः । ओं हृदयाय नमः । नं शिरसे स्वाहा । मं शिखायै वौषट् । शिं कवचाय हुम् । वं नेत्रत्रयाय वौषट् । यम् अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम् ।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।

पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं सकलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

अतःपरं सर्वपुराणगुह्यं निःशेषपापौघहरं प्रसन्नम् ।
जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ॥

ऋषभ उवाच

End—Colophon—Same as No. 1251.

Author:

Remarks—The work deals with Aṅganyāsa, Karanyāsa etc.

॥ शिवकेशादिपादस्तवः (सव्याख्यः) ॥

1253. ŚIVAKEŚĀDIPĀDASTAVA
with commentary.

Substance—Palm leaf. Size—8¼" × 2¼". Leaves—32. 10—12 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—700. Complete.

Subject—Same as No. 1215 B.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

यो(गी?हि) शास्त्रार्थसर्वस्वं शुकादिभ्य उपा(वि?दि)शत् ।
दक्षिणामूर्तिरुद्रं तं परं गुरुमुपास्महे ॥

ईशस्य केशपादान्तं गुरूक्तेनैव वर्त्मना ।
समुपास्य यथाशक्ति तत्स्तुतिं व्याकरोम्यहम् ॥

अथ खलु भगवान् शङ्करः स्वयं लोकानुजिघृक्षयावनितलमवतीर्णः परमहंसपरिव्राजको भूत्वा परमशिवं परमात्मानं सच्चिदानन्दैकरसं लोकानुग्रहायेच्छोपात्तविग्रहमनुसन्दधानः कपर्दादिश्रीमत्पादाब्जपर्यन्तं पुरुषार्थप्रेप्सुनामभिध्यानायाभितुष्टाव—देयासुर्मूर्ध्नीत्यादि । तत्र तावज्जाह्नवीचन्द्रकलयोरधिवासभूतं जटामण्डलमभिष्टौति प्रथमश्लोकेन ।

देयासुर्मूर्ध्नि राजत्सरससुरसरित्पारपर्यन्तानिर्य-
त्प्रांशुस्तम्बाः पिशङ्गास्तुलितपरिणतारक्तशालीलता वः ।
दुर्वारावर्तिगर्तश्रितनिखिलजनोत्तारणे रज्जुभूता
घोराघोर्वीरुहालीदहनशिखिशिखाश्शर्म शार्वाः कपर्दाः ॥

End :

"बुद्धिस्तात्कालिकी ज्ञेया प्रज्ञा त्रैकालिकी मता ।
प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः" ॥ इति वचनात् स्मरतीत्यर्थः । चशब्दद्वयमत्र समुच्चयार्थम् । इयमत्र वाक्ययोजना स्मरजयिनः कपर्दभारादारभ्या पादाब्जपांसोरङ्गानामियं स्तुतिर्या कृता भवान्याः स्तुतिश्च या उभयविधयानया स्तुत्या ये भक्ताः पुरुषभक्त्या मुहुर्देवं देवीं च नमन्ति नमस्कुर्वन्ति तान् देवः स्वयं देवी च धिया बुद्ध्या तत्कालोचितार्थविषयया स्मरति न केवलं तान् स्मरत्येव । अपि तु तेषामभिमतं फलं प्रयच्छति चेति द्वितीयचशब्दार्थः ।

Colophon :

श्रीमत्केशादिपादान्तं स्तोत्ररत्नमशेषतः ।

निरमायि मुनीन्द्रेण तद्व्याख्या च परेण तु ॥
केशादिपादस्तुतिरादरेण श्रीशङ्कराचार्यवरप्रणीता ।
मन्दोपकाराय परं विपश्चिता क्षान्तिं भजन्त्वत्र सतां मनांसि ॥
एवं मया कृष्णपुरीति नाम संबिभ्रता भद्रदयैकसिन्धोः ।
श्रीचन्द्रमौलेश्चरणारविन्दसमर्चनायास्तु कृतिः कृतेयम् ॥
गुरोः पादरजः पातु संसारापारसागरात् ।
तारकं नापरं किञ्चित्संसारजलधेरतः ॥
अनेन स्तुतिरिक्थेन स्तुतो योऽसावुमापतिः ।
तं वयं परया भक्त्या नमस्कुर्मो महेश्वरम् ॥
परेशस्य परा शक्तिर्या निर्वाणसुखप्रदा ।
नमामि भवकान्तां तां भक्तानुग्रहलालसाम् ॥

श्रीमहादेवस्य श्रीमत्केशादिपादस्य व्याख्या समाप्ता । श्रीगुरुभ्यो नमः ।

Author—Text: Śrī Śaṅkarācārya.
Com :—Kṛṣṇapurī.

Remarks—According to RCMPL. the name of the author is Pūrṇasarasvatī of Kṛṣṇapurī. But the colophon contains only, "कृष्णपुरीति नाम संबिभ्रता".

॥ शिवकेशादिपादस्तवः ॥

1254. ŚIVAKEŚĀDIPĀDASTAVA.

Substance—Palm leaf. Size—$2\frac{7}{8}'' \times \frac{3}{4}''$. Leaves—41. 4 lines per page and 9 letters per line. Script—Malayāḷam. No. of Granthas—95. Complete.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1154 C.

Remarks—The following verse occurs at the end :

नमः शिवाभ्यां नवयौवनाभ्यां
परस्पराश्लिष्टवपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां
नमो नमः शङ्करपार्वतीभ्याम् ॥

॥ शिवकेशादिपादस्तवः ॥

1255 A. ŚIVAKEŚĀDIPĀDASTAVA.

Substance—Palm leaf. Size—4″ × 1¾″. Leaves—6. 14 lines per page and 15—20 letters per line. Script—Malayāḷam. No. of Granthas—100. Complete.

Subject—Same as No. 1215 B.

Beginning etc.—Same as No. 1154 C.

Remarks—The Ms. is held fast within a couple of ivory plates.

॥ विष्णुपादादिकेशस्तवः ॥

1255 B. VIṢṆUPĀDĀDIKEŚASTAVA.

Substance—Palm leaf. Size—4″ × 1¾″. Leaves—9. 13—15 lines per page and about 18 letters per line. Script—Malayāḷam. No. of Granthas—150. Complete.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1146 H.

॥ विष्णुस्तवः ॥

1255 C. VIṢṆUSTAVA.

Substance—Palm leaf. Size—4″ × 1¾″. Leaves—70.
14 lines per page and 16—20 letters per line.
Script—Malayāḷam. No. of Granthas—1050.

Subject—Same as No. 1214.

Beginning :

भीष्मः ।

इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्तुं
प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥

त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जे
विजयसखे मतिरस्तु मेऽनवद्या ॥

युधि तुरगरजोविधूम्रविष्व-
क्कचलुलितश्रमवार्यलङ्कृतास्ये ।
मम निशितशरैर्विभिद्यमान-
त्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥

End :

मायावलोकलवदर्शितभावहारि-
भ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः ।

पत्न्यस्तु षोडशसहस्रमनङ्गबाणै-
र्यस्येन्द्रियं विमथितुं करणैर्न शेकुः ॥

बिभ्रत्तवामृतकथोदवहास्त्रिलोक्याः
पादावनेजसरितश्शमलानि हन्तुम् ।
आनुश्रवं श्रुतिभिरङ्घ्रिजमङ्गसङ्गै-
स्तीर्थद्वयं शुचिषदस्तु उपस्पृशन्ति ॥

Colophon :

इति श्रीभागवते दशमस्कन्धे एकाशीतितमोऽध्यायः ।

Author :

Remarks—The Ms. deals with stotras recited by Bhīṣma, Brahmā, Dhruva etc. which occur in the Bhāgavata. RCMPL notices Gajendra-mokṣa separately. But since it forms part and parcel of this work a different catalogue is superfluous.

॥ संक्षेपरामायणम् ॥

1255 D. SAMKṢEPARĀMĀYAṆAM.

Substance—Palm leaf. Size—4″ × 1¾″. Leaves—8. 14 lines per page and 16—20 letters per line. Script—Malayāḷam. No. of Granthas—125. Complete.

Subject—A compendium of the Rāmāyaṇa.

Beginning :

अविघ्नमस्तु ।

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।

आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥
वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परां गतिम् ॥
यः पिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥
गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥
अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥
आमिषीकृतमार्तण्डं गोष्पदीकृतसागरम् ।
तृणीकृतदशग्रीवमाञ्जनेयं नमाम्यहम् ॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥

श्रीराघवं दशरथात्मजमप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम् ।
आजानुबाहुमरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि ॥

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥
शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा ।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥

End:

नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः ।
रामस्सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥
प्रहृष्टमुदितो लोकस्तुष्टः पुष्टस्सुधा ... ... ।
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥
न पुत्रमरणं किञ्चिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥
न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः ।
न वातजं भयं किञ्चिन्नापि ज्वरकृतं तथा ॥
न चापि क्षुद्भयं तत्र न तस्करभयं तथा ।
नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥
गवां कोट्ययुतं दत्वा ब्रह्मलोकं प्रयास्यति ।
असंख्येयं धनं दत्वा ब्राह्मणेभ्यो महायशाः ॥
राजवंशान् शतगुणान् स्थापयिष्यति राघवः ।
चातुर्वर्ण्यञ्च लोकस्य स्वे स्वे धर्मे नियोक्ष्यति ॥
दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति ॥
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम् ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥

एतदाख्यानमायुष्यं पठन् रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥

पठन् द्विजो वागृषभत्वमीयात्
स्यात्क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीयात्
जनश्च शूद्रोऽपि महत्त्वमीयात् ॥

Colophon :

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये नारदवाक्ये बालकाण्डे संक्षेपो नाम प्रथमः सर्गः ।

नारदस्य तु तद्वाक्यं श्रुत्वा वाक्यविशारदः ।
पूजयामास धर्मात्मा सहशिष्यो महामुनिः ॥

Author—Vālmīki.

Remarks—The work is borrowed from the Vālmīkirāmāyaṇa.

॥ नृसिंहस्तवः ॥

1255 E. NṚSIMHASTAVA.

Substance—Palm leaf. Size—4″ × 1¾″. Leaf—1. 14 lines per page and 20 letters per line. Script —Malayāḷam. No. of Granthas—17½.

Subject etc.—Same as No. 1172 A7.

॥ लक्ष्मीनृसिंहस्तवः ॥

1255 F. LAKṢMĪNṚSIMHASTAVA.

Substance—Palm leaf. Size—4″ × 1¾″. Leaves—1½,

4 lines per page and 18 letters per line. Script —Malayāḷam. No. of Granthas—20. Complete.

Subject etc.—Same as No. 1164 J.

Remarks—The work is identical with R. No. 324 (p) TCM. Vol. I. A. But the last two verses, one at the end and the other in the colophon are missing therein.

॥ आत्मार्पणस्तवः ॥

1255 G. ĀTMĀRPAṆASTAVA.

Substance—Palm leaf. Size—4″ × 1¾″. Leaves—11. 10—12 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—120.

Subject etc.—Same as No. 1145.

Remarks—The frame of the codex is made of ivory.

॥ शिवधर्मशास्त्रम् ॥

1256 A. ŚIVADHARMAŚĀSTRAM.

Substance—Palm leaf. Size—7″ × 1⅝″. Leaves—33. 6—10 lines per page and 18—22 letters per line. Script—Malayāḷam. No. of Granthas—325.

Subject—Same as No. 1215 B.

Beginning:

नन्दिकेश्वर उवाच—

अतः परमिदं गुह्यं रुद्रेन्द्र..... तं महोदयम् ।

महाविघ्नप्रशमनं महाशान्तिकरं शुभम् ॥
अकालमृत्युशमनं सर्वव्याधिनिवारणम् ।
परचक्रप्र(थम?मथ)नं महाविजयवर्धनम् ॥
स्तम्भनं परसैन्यस्य रिपुसादकरं सदा ।
सर्वदेवग्रहानीकं सर्वाभीष्टावभासकम् ॥
सर्वशान्त्यधिकाराख्यं धर्मं वक्ष्ये शृणुष्व तम् ॥
शशाङ्कशेखरस्त्र्यक्षो नागयज्ञोपवीतवान् ।
चतुर्मुखश्चतुर्बाहुस्सितभस्मावकुण्ठितः ॥
वरो वरेण्यो वरदो देवदेवो महेश्वरः ।
त्रैलोक्यनमितः श्रीमान् शान्तिमाशु करोतु मे ॥
सर्वावयवमुख्येन गात्रेण तनुमध्यमा ।
पीतश्यामातिसौम्येन शिवरूपेण शोभिता ॥
ललाटतिलकोपेता चन्द्रलेखार्धधारिणी ।
दिव्याम्बरधरा देवी सर्वाभरणभूषिता ॥
वरस्त्री सर्वनारीणां शान्ता गुणमहास्पदा ।
भावनामात्रसन्तुष्टा उमा देवी वरप्रदा ॥
साक्षादागत्य रूपेण शान्तेनामिततेजसा ।
शान्तिं करोतु मे प्रीता भक्तानां भक्तवत्सला ॥

End :

जय निर्मलदेहाय जय सर्वार्थकारिणे ।
जय मन्मथनाशाय ईशानाय नमो नमः ॥
इत्येवं शान्तिकार्याय यः पठेच्छृणुयादपि ।
विधूय सर्वपापानि शिवलोके महीयते ॥

कन्यार्थी लभते कन्यां जयार्थी लभते जयम् ।
अर्थकामो लभेदर्थान् पुत्रकामो बहून् सुतान् ॥
विद्यार्थी लभते विद्यां योगार्थी योगमाप्नुयात् ।
गर्भिणी जनयेत् पुत्रं कन्या विन्दति पुङ्गवम् ॥
काम्यान् प्रार्थयते कामान् मानवः श्रवणादिह ।
तत्सर्वं शीघ्रमाप्नोति देवानां च जयो भवेत् ॥
श्रुत्वाध्यायमिमं पुण्यं संग्रामं प्रविशेन्नरः ।
स निर्जित्याशु तच्छत्रून् कल्याणैः परिपूर्यते ॥
अक्षयं मोदते कालमतिरस्कृतशासनः ।
व्याधिभिर्नाभिभूयेत पुत्रपौत्रैः प्रतिष्ठितः ॥
पठ्यमानमिदं सर्वं यमुद्दिश्य तु पठ्यते ।
तस्य रोगा न बाधन्ते वातपित्तादिसम्भवाः ।
नाकाले मरणं तस्य न सर्पैश्चापि दश्यते ।
न विषं क्रमते देहे न जडान्धत्वमूकता ॥
नोपसर्गभयं तस्य न चोत्पातभयं तथा ।
नाभिचारकृतैर्दोषैर्लिप्यते स कदाचन ॥
यत्पुण्यं सर्वतीर्थानां गङ्गादीनां विशेषतः ।
तत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ॥
दशानां राजसूयानामग्निष्टोमशतस्य च ।
श्रवणात्फलमाप्नोति कोटिकोटिगुणोत्तरम् ॥
अवध्यस्सर्वदेवानामन्येषां च विशेषतः ।
जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥
गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गुरुतल्पगः ।
शरणागतघाती च मित्रविस्रब्धघातकः ॥

दुष्टः पापसमाचारो मातृहा पितृहा तथा ।
श्रवणादस्य भावेन मुच्यते सर्वपातकैः ॥
शान्त्यध्यायमिदं पुण्यं न देयं यस्य कस्यचित् ।
शिवभक्ते सदा देयं शिवेन कथितं पुरा ॥
नित्यं खचितभक्तिश्च शक्तिव्या .....तवर्जितः ।
सर्वकामसमृद्धिः स्याद्यः पठेत्तु दिने दिने ॥

Colophon :

इति शिवधर्मशास्त्रे शान्त्यध्यायो नाम षष्ठत यः(?) । हरिः ।
ओम् ।
सीतारामेण लिखितम् ।

Author :

Remarks—The work begins with Śāntyadhyāya in Śivadharma. It is mistitled as Kavaca in RCMPL.

॥ देवीकवचम् ॥

1256 B. DEVĪKAVACAM.

Substance—Palm leaf. Size—7″ × 1⅝″. Leaves—7. 9—10 lines per page and 19 letters per line. Script—Grantha. No. of Granthas—75.

Subject—A panegyric of Devī.

Beginning :

श्रीमार्कण्डेय उवाच ।
यद् गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥

ब्रह्मोवाच—

अस्ति गुह्यतमं विप्र! सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने! ॥

इदं भक्ताय देयं स्यान्नाभक्ताय कदाचन ।
नास्तिकाय च दुष्टाय कृतघ्नाय महामुने! ॥

कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुप् प्रकीर्तितः ।
देवता श्रीर्महालक्ष्मीः श्रामित्यादि षडङ्गकम् ॥

शङ्खं चर्म धनुश्च चारु दधतीं विभ्रामितान्तर्जनीं
वामे चक्रमसिं शरं कलयतीं तिर्यक् त्रिशूलं भुजैः ।
सन्नद्धां विविधायुधैः परिवृतां मन्त्री कुमारीं जनै-
र्ध्यायेदिष्टवरप्रदां त्रिणयनां सिंहाधिरूढां शिवाम् ।

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चण्डखण्डेति कूश्माण्डेति चतुर्थकम् ॥

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनी तथा ।
सप्तमं कालरात्री च महागौरीति चाष्टमम् ॥

नवमं सिद्धिदा प्रोक्तं नवदुर्गाः प्रकीर्तिताः ।
दुर्गाण्येतानि नामानि ब्रह्मणैव महात्मना ॥

End:

देवीप्रसादात्सालोक्यं सामीप्यं लभते नरः ।
सारूप्यं चैव सायुज्यं पठित्वा कवचं नरः ॥

कवचं देवतावासं कवचं पारिजातकम् ।
कवचं कामदं देव्याः कवचं वज्रपञ्जरम् ॥

कवचं श्रीकरं दिव्यं कवचं पितृवत्सदा ।
रक्षते सर्वदा सर्वं सर्वस्मिन् दुर्घटोद्भवे ॥

मित्रवद्भाग्यदं नित्यं बन्धुवत्सुखदं सदा ।
शिरो रक्षतु ब्रह्माणी मुखं माहेश्वरी तथा ॥
कौमारी हृदयं चैव वैष्णवी उदरं तथा ।
कटिं गुह्यञ्च वाराही ऐन्द्री ऊरू तथैव च ॥
चामुण्डा जानुदेशञ्च पादौ रक्षतु चण्डिका ।
अङ्गप्रत्यङ्गकं चैव सर्वं रक्षन्तु मातरः ॥
सर्वं रक्षन्तु मातर ओन्नम इति ।

Colophon :

Author :

Remarks.—The work is not noticed in RCMPL. The following five verses pertaining to Viṣṇu describe the means of achieving salvation :

अशुभमपनयन्तं पक्षजैस्सामघोषै-
रचलमिव सपक्षं हैममारुह्य तार्क्ष्यम् ।
सजल इव पयोदः श्यामलः शार्ङ्गधन्वा
शमयतु परितापं सर्वदा सुप्रसन्नः ॥
मूले कल्पतरोः पयोनिधितटे पक्षीश्वरस्योपरि
ध्यायेत्पद्मरथाङ्गशङ्खगदिनं सुस्निग्धहेमप्रभम् ।
उत्सङ्गे स्थितया सरोजकरया लक्ष्म्या दृढालिङ्गितं
देवं दुर्गतिनाशनं भवभयध्वंसोद्यतं श्रीकरम् ॥
आताम्रपाणिकमलप्रणयिप्रतोद-
मालोलहारमणिकुण्डलहेमसूत्रम् ।
आविःश्रमाम्बुकणमम्बुदनीलमव्या-
दाद्यं धनञ्जयरथाभरणं महो नः ॥

सत्सङ्गाद्भवनिःस्पृहो गुरुमुखाच्छ्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्मशकलं प्रक्षीणकर्मान्तरः ।
न्यासादेव निरङ्कुशेश्वरदयानिर्लूनमायान्वयो
हार्दानुग्रहलब्धमध्यधमनिद्वाराद्बहिर्निर्गतः ॥

मुक्तोऽर्चिर्दिनपूर्वपक्षषडृतुर्मासाब्दवातांशुमद्-
ग्लौविद्युद्वरुणेन्द्रधातृमहितस्सीमान्तसिन्ध्वाप्लुतः ।
वैकुण्ठं समुपेत्य नित्यमजडं तस्मिन् परब्रह्मणः
सायुज्यं समुपेत्य नन्दति समं तेनैव धन्यः पुमान् ॥

॥ रामस्तवः ॥

1256 C. RĀMASTAVA.

Substance—Palm leaf. Size—7″ × 1⅝″. Leaves—5. 9 lines per page and 18 letters per line. Script—Grantha. No. of Granthas—50. Incomplete.

Subject—Same as No. 1225 F.

Beginning:

रामं रत्नकिरीटकुण्डलधरं केयूरहारान्वितं
सतिालङ्कृतवामभागममलं सिंहासनस्थं प्रभुम् ।
सुग्रीवादिसमस्तवानरगणैः संसेव्यमानं सदा
विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं भजे ॥

रामं रत्नकिरीटकुण्डलधरं राकेन्दुबिम्बाननं
क्षौमप्रावृतनीलदेहमरुणप्रान्तेक्षणं दक्षिणम् ।

कामाभीष्टतरामरूपमलिकप्रान्तोल्लसच्चित्रकं
क्षेमायानिशमाश्रमन्तरहितं सीतासमेतं भजे ॥
साकेते शरदिन्दुकुन्दधवले सौधे महामण्डपे
पर्यस्तागरुधूपगन्धललिते कर्पूरदीपोज्ज्वले ।
सुग्रीवाङ्गदजाम्बवत्परिवृतं सौमित्रिणा सेवितं
लीलामानुषविग्रहं रघुपतिं सीतासमेतं भजे ॥

End :

नमः कोदण्डहस्ताय सन्धीकृतशराय च ।
दण्डिताखिलदैत्याय रामायापन्निवारिणे ॥
प्राच्यां रक्षतु श्रीरामो याम्यां रक्षतु लक्ष्मणः ।
प्रतीच्यां भरतो रक्षेदुदीच्यां शत्रुमर्दनः ॥
ऐशान्यां जानकी रक्षेदाग्नेय्यां सूर्यनन्दनः ।
विभीषणस्तु नैर्ऋत्यां वायव्यां वायुनन्दनः ॥
मध्यं रक्षेन्महाविष्णुरूर्ध्वं रक्षेन्नृकेसरी ।
चतुर्द्वारं सदा रक्षेच्चतुर्भिः कपिपुङ्गवैः ।
तच्चक्रं कपिसेनोच्चैर्महामर्कटनायकैः ॥

Colophon :

Author :

Remarks—The two leaves at the close are missing. The closing portion in this work is identical with that of Rāmamahādurga, No. 1210 S.

[विष्णु]। मानसिकपूजा ॥

1256 D. MĀNASIKAPŪJĀ.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—2.

9 lines per page and 18 letters per line. Script—Grantha. No. of Granthas—20.

Subject—A stotra relating to psychic worship.

Beginning:

देहो देवालयः प्रोक्तो जीवो देवस्सदाशिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥

हृदयकमलमध्ये सूर्यबिम्बासनस्थम्
आखिलभुवनबीजं सृष्टिसंहारहेतुम् ।
निरतिशयसुखाढ्यं ज्योतिषां हंसरूपम्
अमितभुवनभासं चिन्तयेदात्मरूपम् ॥

आराधयामि मणिसन्निभमात्मलि(ङ्गं)
मायापुरीहृदयपङ्कजसन्निविष्टम् ।
श्रद्धानदीविमलचित्तजलाभिषेकै-
र्नित्यं समाधिकुसुमैरपुनर्भवाय ॥

हृदिस्थितं पङ्कजमष्टपत्रं
सकर्णिकाकेसरमध्यसंस्थम् ।
अङ्गुष्ठमात्रं मुनयो वदन्ति
ध्यायन्ति विष्णुं पुरुषं पुराणम् ॥

End:

सौवर्णे नवरत्नखण्डखचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानेकविधोपदंशरुचिरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा चिराचितमिदं पूजां जुषस्व प्रभो ॥

छत्रं चामरयोर्युगं व्यजनकं चा(च्छा)दनं मद्दलं
भेरीशङ्खमृदङ्गकाहलकलद्गीतं च नृत्तं तथा ।

साष्टाङ्गं प्रणतिः स्मृतिश्च विविधैरेतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो सन्तुष्टये कल्प्यताम् ॥

Author :

Remarks—The title is inferred from the subject-matter of the work. The worship pertains to Viṣṇu.

॥ शूलिनीस्तवः ॥

1256 E. ŚŪLINĪSTAVA.

Substance—Palm leaf. Size—7" × 1⅝". Leaves—3. 2 lines per page and 20 letters per line. Script—Grantha. No. of Granthas—25.

Subject—Beginning—Same as No. 1171 C.

End :

खट्वादिपट्पदक्रूरे खट्वाङ्गमुपलायुधे ।
वरदे शूलिनीदुर्गे महाभैरवि! पाहि माम् ॥
गर्वोद्धतारिहरणे गम्भीरे गगनाकृते ।
वरदे शूलिनीदुर्गे महाभैरवि पाहि माम् ॥
घर्मठे घार्णनादेष्टे घट्टाविंशाहुतिप्रिये ।
वरदे शूलिनीदुर्गेमहाभैरवि पाहि माम् ॥
चण्डोच्चण्डबलप्रौढे चतुर्वर्गफलप्रदे ।
वरदे शूलिनीदुर्गे महाभैरवि पाहि माम् ॥
छन्नभक्तिप्रियेच्छायी छत्रचामररोहिते ।
वरदे शूलिनीदुर्गे महाभैरवि पाहि माम् ॥

जङ्गमाजङ्गमाकारे जगज्जननि जागरे ।
वरदे शूलिनीदुर्गे महाभैरवि पाहि माम् ॥

Colophon :

Author :

Remarks—This is identical with No. 10833, DCSM. Vol. XIX wherein it is named Śūlinīviśvarūpastotram.

॥ शिवाष्टोत्तरशतनामावलिः ॥

1257. ŚIVĀṢṬOTTARAŚATANĀMĀVALI.

Substance—Palm leaf. Size—11¼" × 1¾". Leaves—3. 10—12 lines per page and 29 letters per line. Script — Grantha. No. of Granthas — 55. Complete.

Subject—Same as No. 1215 B.

Beginning :

हरिः ओम् ।

महाकैलासशिखरनिलयाय नमो नमः ।
हिमाचलेन्द्रतनयावल्लभाय नमो नमः ॥
वामभागकलत्रार्धशरीराय नमो नमः ।
विलसद्दिव्यकर्पूरदिव्याङ्गाय नमो नमः ॥

कोटिकन्दर्पसदृशलावण्याय नमो नमः ।
रत्नमौक्तिकवैडूर्यकिरीटाय नमो नमः ॥
मन्दाकिनीजलोपेतमूर्धजाय नमो नमः ।
चारुशीतांशुशकलशेखराय नमो नमः ॥
त्रिपुण्ड्रविलसत्फालफलकाय नमो नमः ।
सोमपावकमार्तण्डलोचनाय नमो नमः ॥

End :

ज्योतिषामुत्तमज्योतिरूपदाय नमो नमः ।
अनौपममहासौख्यपदस्थाय नमो नमः ।
अचिन्त्यदिव्यमहिमारञ्जिताय नमो नमः ॥
अनित्यदेहविभ्रान्तिभर्जिताय नमो नमः ।
सकृत्प्रपन्नदौर्भाग्यभेदनाय नमो नमः ॥
षट्त्रिंशत्तत्त्वप्रासादभूनाथाय नमो नमः ।
आदिमध्यान्तरहितदेहस्थाय नमो नमः ॥
परानन्दस्वरूपार्थबोधकाय नमो नमः ।
ज्ञानशक्तिक्रियाशक्तिनियुक्ताय नमो नमः ॥
पराशक्तिसमायुक्तपरेशाय नमो नमः ॥

Colophon :

श्रीशिवनामाष्टोत्तरशतं समाप्तम् ।

Author :

Remarks—The work is identical with No. 9313, DCSM, Vol. XVII. The evils befalling those who take meals before the usual chanting of "Śivanāma" are thus set forth immediately after the colophon:

अनुक्त्वा शिवनामानि भुङ्क्ते पिबति खादति ।
स मांसमूत्ररुधिरं भुङ्क्ते पिबति खादति ।
अन्तर्नेच्छन्ति ये रुद्रं भवानीसहितं प्रभुम् ।
पुरीषमेव गृह्णन्ति जिह्वया ते न संशयः ॥
देवयोग्यं फलं तच्च योग्यं स्यान्मर्त्यजातये ।
यो विस्मृत्य महादेवं गृहीत्वाम्रफलं नरः ।
भुनक्ति कृमियुक्तं स्यादग्निपाकेन पच्यते ॥

॥ शिवमहिमकालिकास्तवः (विवृतिसहितः) ॥

1258. ŚIVAMAHIMAKALIKĀSTAVA with commentary.

Substance—Palm leaf. Size—9½" × 2". Leaves—46. 12 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1400. Complete.

Subject—Same as No. 1215 B.

Beginning:

श्रीगुरुभ्यो नमः । अविघ्नमस्तु । श्रीमरकतवल्लीसमेतमार्ग-सहायेश्वराय नमः । श्रीगणेशाय नमः ।

शिवमहिमपूर्वकलिकास्तुतिरनवद्या सुमङ्गलविधेया ।
यस्माद् दीक्षितरचिता प्रचिचारयिषुः करोमि तां विवृताम् ॥
यद्यपि दीक्षितवर्यैरनतिस्फुटभावसङ्ग्रहस्वकृतिः ।
स्वयमेव व्याख्याता हि तथा...शिखरिणीमाला ॥
सम्भाव्यमेवमस्याः स्तुतेरपि स्यात्तु विवरणं रुचिरम् ।
चतुरुत्तरशतसङ्ख्याग्रन्थकृतां किन्नु दुष्करं तेषाम् ॥

तथापि प्रचरत्स्वेषां ग्रन्थेष्वेतन्न गण्यते ।
मूलं तु स्फुटमेवैषां कृतिः स्यान्नेतरस्य तु ॥
ईदृङ्मूलं सुपात्रेषु निक्षेप्तुमहमुद्यतः ।
प्रसादं परमेशस्य प्राप्नुयां तज्जुषामपि ॥
दीक्षितानां वचः सत्यं सत्याश्च वयमीदृशाः ।
तथापि तद्विवरणं भक्त्यैव करवाण्यहम् ॥
तदिदं साधुभिर्वीक्ष्यं गुणदोषविवेचकैः ।
भक्त्या वा भवपादाब्जे मय्यनुग्रहणेन वा ॥

तस्याः स्तुतेरयमाद्यश्लोकः—

यत् सर्वं क्रतुकन्दं यदधिरयज्ञादितामहितम् ।
यत् सकलदेवरूपं ज्योतिस्तदुपास्महे सोमम् ॥

यदिति । यत् ज्योतिः शिवनामधेयं परं ज्योतिः तद्धि ज्योतिषामपि ज्योतिः । तं देवं ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् । अथ यदतः परो दिवो ज्योतिर्दीप्यते इत्यादिश्रवणात् । कीदृशम् । सोमम् उमासहितमुपास्महे ध्यायामः ।

End:

मूलम्—

नाथ तव महिमकलिका ककुभश्रुत्यन्तपारिजातभवा/ ।
सुरभयतु करुणया तव मीमांसान्यायपरिमलोल्लासैः ॥

व्याख्यानम्—

नाथेति । नाधृ नाधृ याच्ञोपतापैश्वर्येषु इत्यनुशासनाद् ऐश्वर्यवाचिनाथतेः पचाद्यच् । हे ईश्वर! तव महिमकलिका महिमलेशप्रतिपादकस्तुतिः सैव फुल्लत्कुसुमकलिका सा कीदृशी श्रुत्यन्तः वेदान्तः स एव पारिजातः देवतरुविशेषः नन्दनोद्यानगतः सकलसमीहितफलसाधनत्वात् तद्भवा तदुद्भवा वेदान्तरहस्यप्रमेयसंग्रहा-

त्मकत्वात् ककुभः दशा(शा) विदिशः सुरभयतु सुरभीकरोतु। सुरभि-शब्दात् सुगन्धिवाचकात् करोतीत्यर्थे प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्चेति णिच्प्रत्यये इष्ठवद्भावेन टिलोपे च णिजन्तात् धातोर्लकारादयः सुरभिकरणोपयोगिपरिमलोल्लासाः मीमांसा-न्याया इह कलिकायाः विवक्षिताः इति सर्वमनवद्यम्।

Colophon :

शिवमहिमपूर्वकलिकास्तुतिमेतां निर्मितां तु मखिराजैः।
व्याकार्षं परमेशप्रसादसिद्ध्यै यथा समेहायै ॥
श्रीमदप्पयमखीन्द्रवंशजत्यागराजमखिनाविनिर्मिता।
स्वान्वयाम्बुनिधिकौस्तुभोदितस्तोत्ररत्नविवृतिर्मतां मुदे ॥
अस्त्विति शेषः।
श्रीरुद्रसंहिताव्याख्या निर्मिता येन चन्द्रिका।
त्यागराजस्तवस्तस्य व्याख्यानं च विनिर्मितम्।
सद्विद्याया विलासश्च विदुषां हृदयङ्गमः।
रचितः पद्यरूपेण व्याख्यैषा तेन निर्मिता ॥

इति श्रीशिवमहिमकलिकाविवृतिः सम्पूर्णा।
हरिः। ओम्। श्रीमरकतवल्लीसमेतमार्गबन्धवे नमः
श्रीगुरुभ्यो नमः।

Author—Text: Appayyadikṣita.
Commentary: Tyāgarāja Makhi.

Remarks—The following works are referred to by the coinmentator in the colophon:
1. Candrikā, commentary on Rudra Samhitā.
2. Tyāgarājastava with commentary.
3. Sadvidyāvilāsa.

॥ शिवसहस्रनामस्तवः ॥

1259. ŚIVASAHASRANĀMASTAVA.

Substance — Palm leaf. Size—4" × 1½". Leaves—35. 6 lines per page and 10 letters per line. Script —Malayalam. No. of Granthas—125. Complete.

Subject—Same as No. 1215 B.

Beginning :

अस्य श्रीशिवसहस्रनामस्तोत्रमहामन्त्रस्य नारायणो भगवान् ऋषिः । अनुष्टुप् छन्दः । साम्बसदाशिवो देवता । भवशिवो रुद्रहर इति बीजम् । सर्वतत्त्वावलम्बन इति शक्तिः । गायत्रीवल्लभः प्रांशुरिति कीलकम् । श्रीसाम्बसदाशिवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ओं भवाय भस्मोद्धूलितविग्रहाय निवृत्तिकलात्मने हृदयाय नमः ।

नं धर्मपुञ्जाय धन्विने महात्साहाय प्रतिष्ठाकलात्मने शिरसे स्वाहा ।

मं महाबलाय यज्ञपतये यज्ञाङ्गाय विद्याकलात्मने शिखायै वषट्

शिं यज्ञवाहनाय सहस्रमूर्ध्ने सहस्रबाहवे शान्त्यात्मने कवचाय हुम् ।

वां सर्वेश्वराय त्र्यम्बकाय धूर्जटये शान्त्यतीताय नेत्रत्रयाय वौषट् ।

यं अखण्डपरशुखड्गिने आश्रितवत्सलाय सत्त्वतत्त्वावलम्बनाय अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ।

ध्यानम् ।

सूर्यकोटिप्रतीकाशं त्रिणेत्रं चन्द्रभूषणम् ।
शूलखड्गगदाचक्रध्वजपाशधरं विभुम् ।
* * * * * * * *
भवश्शिवो हरो रुद्रो मङ्गलं पुष्कलोज्वलः ।
अग्रगण्यस्सदाचारश्शर्वश्शम्भुर्महेश्वरः ॥

End :

प्रशान्तमुष्टिरक्षुद्रो क्षुद्रहा नित्यसुन्दरः ।
धुर्योऽग्रधुर्यो धात्रीशश्शाकल्यो शर्वरीपतिः ॥
परमार्थगुरुर्व्याप्तश्शुचिराश्रितवल्लभः ।
रसो रसज्ञस्सारज्ञस्सर्वतत्त्वावलम्बनः ॥

Colophon :

शुभम् ।

Author—Vyāsa.

Remarks—The Ms. is in neat legible hand.

॥ देवीस्तवः ॥

1260. DEVĪSTAVA.

Substance—Palm leaf. Size—9½" × 2". Leaves—2. 9 lines per page and 32 letters per line. Script — Malayāḷam. No. of Granthas—35. Complete.

Subject—A panegyric of Devī.

Beginning :

कल्लोलोल्लसितामृताब्धिलहरीमध्ये विराजन्मणि-
द्वीपे कल्पकवाटिकापरिवृते कादम्बवाटद्युज्ज्वले
रत्नस्तम्भसहस्रनिर्मितसभामध्ये विमानोत्तमे ।
चिन्तारत्नविनिर्मितं जननि ते सिंहासनं भावये ॥

एणाङ्कानन भानुमण्डललसच्छ्रीचक्रमध्ये स्थितां
बालार्कद्युतिसन्निभां करतलैः पाशाङ्कुशौ बिभ्रतीम् ।
चापं बाणमतिप्रसन्नवदनां कौसुम्भवर्णांशुकां
तां त्वां चन्द्रकलावतंसमकुटां चारुस्मितां भावये ॥

End :

लक्ष्मीमौक्तिककलक्षकलितमितच्छत्रं सुधत्ते सदा
इन्द्राणी च रती च चामरवरे धत्ते स्वयं भारती ।
वीणामेणविलोचना सुमनसां नृत्यन्ति सद्रागवद्
भव्यैरिङ्गितमात्यकैः स्फुटलसन्मातस्तदालोक्यताम् ॥

ह्रींकारत्रयसम्पुटेन मनुनोपास्यैस्त्रिभिर्मौक्तिभि-
र्वाक्यैर्लक्ष्यतनो तव स्तुतिविधौ को वा क्षमेताम्बिके ।
सल्लापाः स्तुतयः प्रदक्षिणशतं सञ्चार (ये?ए) वास्तु मे
संवेशो मनसां सहस्रमखिलं त्वत्प्रीतये कल्प्यताम् ॥

Colophon :

गुरवे शरणम् ।

Author :

Remarks—A few verses quoted below occupy the closing portion of the codex:

कैलासशैलशिखरे त्रिजगज्जनित्रीं
गौरीं निवेश्य कनकाञ्चितरत्नपीठे ।

नृत्तं विधातुमभिवाञ्छति शूलपाणौ
देवाः प्रदोषसमये नु भजन्ति सर्वे ॥
वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पङ्कज-
स्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता ।
विष्णुस्सान्द्रमृदङ्गलम्भनपटुर्देवाः समन्तात् स्थिताः
सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥
पदे पदे सर्वतमोनिकृन्तनं पदे पदे सर्वशुभप्रदायकम् ।
प्रदक्षिणं भक्तियुतेन चेतसा करोमि मृत्युञ्जयपादपङ्कजम् ॥
आत्मा त्वं गिरिजा मतिः परिजनाः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणवि(धी?वि)धिः स्तोत्राणि सर्वा गिरो
यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥
मा तं यान्तं त्रिवारं प्रणवकसहितं यं ब्रवीमि प्रदोषे
पश्यन् देवेशलिङ्गं वृषवृषणकरः श्यामसध्ये च दृश्याम् ।
सर्वे वेदा अधीताः क्रमपदसहिता मन्त्रकोट्यश्च जप्ताः
त्रैलोक्यं तस्य वश्यं भवति...स शिवो धूतपापोऽनवद्ये ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाविधिं न जानामि क्षमस्व परमेश्वर ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽहमिति मत्वा तत् क्षमस्व परमेश्वर ॥

श्रीवासुदेवाय नमः । श्रीपरमेश्वराय नमः । श्रीषण्मुखाय नमः । गुरवे शरणम् ।

तिष्ठत्येवानिलोऽपि प्रचलति गिरिरप्याज्ञया यस्य राज्ये
शत्रोस्सर्वाभिसारे सति रचयति यस्तस्य सर्वापहारम् ।

सोऽयं निश्शेषशास्त्रश्रुतिनिवहकलानाटकेष्वद्वितीयो
भाति श्रीदेवनारायणधरणिपतिर्मग्नचेता मुकुन्दे ॥

The reference made by Melpattūr Bhaṭṭatiri to the ruler, Devanārāyaṇa of Ambalapuzha discloses the transcription of the work by a native of that place. And so the Ms. is less than 300 years old.

॥ श्यामलादण्डकम् ॥

1261. ŚYĀMALĀDAṆḌAKAM.

Substance — Palm leaf. Size—5″ × 2″. Leaves—4. 12—14 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—65. Complete.

Subject etc.—Same as No. 1168 B.

Remarks—The following two verses in praise of Kāḷi and Gaṇapaty are cited after the close of the work:

कालीं मेघसमप्रभां त्रिनयनां वेतालकण्ठस्थितां
खड्गप्रोतनिकृत्तदारितशिरःप्रोद्रक्तपानाशनाम् ।
भूतप्रेतपिशाचमातृसहितां मुण्डस्रजालङ्कृतां
वन्दे दुष्टमसूरिकादिसकलां संहारिकामेश्वरीम् ॥

षट्पदमुखारितगण्डं कोटीरभरावबद्धशशिखण्डम् ।
पदकमलप्रणत.....सकलसुरषण्डम् ॥

शुभमस्तु । श्रीगणपतये नमः । विघ्नारिश्रीगणपतये नमः ।
अविघ्नमस्तु । अविघ्नमस्तु ।

॥ श्रीस्तुतिः ॥

1262. ŚRĪSTUTI.

Substance—Palm leaf. Size—14½" × 2". Leaves—2½. 7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as No. 1219 A.

Beginning :

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं
तद्वक्षःस्थलनित्यवासरसिकां तत्क्षान्तिसंवर्धनीम् ।
पद्मालंकृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां
वक्षःपीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये ॥

आविर्भावः कलशजलधावध्वरे वापि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा ।
भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरमितविभवा स्तूयसे सा कथं त्वम् ॥

End :

माता देवी त्वमसि भगवान् वासुदेवः पिता मे
जातः सोऽहं जननि युवयोरेकलक्ष्यं दयायाः ।

दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं
किन्ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि ॥

कल्याणानामविकलनिधिः कापि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
संपद्दिव्या मधुविजयिनः सन्निधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थनाकामधेनुः ॥

Colophon :

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशात्
कलिकलुषनिवृत्त्यै कल्पमानं प्रजानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत्पठन्तः
सकलकुशलसीमाः सार्वभौमा भवन्ति ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ।

श्रीस्तुतिः संपूर्णा ॥

Author—Venkaṭeśa *alias* Vedāntadeśika.

Remarks—The laudatory verses on Vedāntācārya quoted at the beginning and end of the Ms. appear to have been composed by the scribe. The work is identical with R. No. 160 (e) TCM. Vol. I. Part I A. But the first two verses herein are additional, the first of which occurs in No. 9779, DCSM. Vol. XVIII and the second in No. 9776 of the same volume.

॥ सुदर्शनशतकम् ॥

1263. SUDARŚANAŚATAKAM.

Substance — Palm leaf. Size—7″ × 1½″. Leaves—55. 4—5 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—275.

Subject—A Panegyric of Sudarśana.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सौदर्शिन्युज्जिहाना दिशि विदिशि तिरस्कृत्य सावित्रमार्चि-
र्बाह्याबाह्यान्धकारक्षतजगदगदङ्कारभूम्ना स्वधाम्ना ।
दोखर्ज्जूदूर(?)गर्जद्विबुधरिपुवधूकण्ठकैवल्यकल्या
ज्वाला जाज्वल्यमाना वितरतु भवतां वीप्सयाभीप्सितानि ॥

प्रत्युद्यातं मयूखैर्नभसि दिनकृतो वृत्तसेवं प्रभाभि-
र्भूमौ सौमेरवीभिर्दिवि वरिवसितं दीप्तिभिर्देवधाम्नाम् ।
भूयस्यै भूतये वः स्फुरतु सकलदिग्भ्रान्तसान्द्रस्फुलिङ्गं
चाक्रं जाग्रत्प्रतापं त्रिभुवनविजयव्यग्रमुग्रं महस्तत् ॥

End:

प्राणे दत्तप्रयाणे मुषितदृशि दृशि त्यक्तसारे शरीरे
मत्यां व्यामोहवत्यां सतमसि मनसि व्याहृतौ व्याहते च ।
चक्रान्तर्वर्तिमृत्युप्रतिभयमुभयाकारचित्रं पवित्रं
तेजस्तत्तिष्ठतां वस्त्रिदशकुलधनं त्रीक्षणं तीक्ष्णदंष्ट्रम् ॥

यस्मिन्विन्यस्य भारं विजयिनि जगतां जङ्गमस्थावराणां
लक्ष्मीनारायणाख्यं मिथुनमनुभवत्यत्युदारान् विहारान् ।

आरोग्यं भूतिमायुः कृतमिह बहुना यद्यदास्थापदं व-
स्तत्तत्सद्यः समस्तं दिशतु स पुरुषो दिव्यहेत्यक्षवर्ती ॥

Colophon :

पद्मानां तत्त्वविद्याद्रुमणिगिरिशविध्यङ्गसंख्याधराणा
मध्विस्वङ्गेषु नेम्यादिषु च परमतः पुंसि षड्विंशतेश्च ।
संख्यैः सौदर्शनं यः पठति कृतमिदं कूरनारायणेन
स्तोत्रं निर्विष्टभोगो भजति स परमांचक्रमायुग्यलक्ष्मीम् ॥

श्रीकृष्णाय नमः ।

Author—Kūranārāyana.

Remarks—The Ms. is noticed as No. 10648 in DCSM. Vol. XIX.

॥ सूर्यशतकम् ॥

1264 A. SŪRYAŚATAKAM.

Substance—Palm leaf. Size—14⅓"×2". Leaves—9. 9 lines per page and 52 letters per line, Script—Malayāḷam. No. of Granthas—260.

Subject etc.—Same as No. 1147 T.

Remarks—The leaves are much decayed.

॥ विष्णुपादादिकेशस्तवः ॥

1264 B, VIṢṆUPĀDĀDIKEŚASTAVA.

Substance—Palm leaf. Size—14⅓" × 2". Leaves—5.

8—9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject—Same as No. 1214.

Beginning etc.—Same as No. 1146 H.

Remarks—The verse beginning with "मृद्वङ्घ्रि" and occurring in No. 1146 H is missing herein.

॥ शिवपादादिकेशस्तवः ॥

1264 C. ŚIVAPĀDĀDIKEŚASTAVA.

Substance—Palm leaf. Size—14½" × 2". Leaves—4. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject etc.—Same as No. 1215 B.

Beginning etc.—Same as No. 1154 C.

॥ सूर्यशतकम् ॥

1265. SŪRYAŚATAKAM.

Substance—Palm leaf. Size—7"×1¼". Leaves—34. 6—7 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—265. Complete.

Subject etc.—Same as No. 1147 T.

॥ सूर्यशतकम् ॥

1266. SŪRYAŚATAKAM.

Substance—Palm leaf. Size—9¾" × 1⅛". Leaves—38.

4 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—265. Complete.

Subject etc.—Same as No. 1147 T.

॥ सूर्यशतकम् ॥

1267. SŪRYAŚATAKAM.

Substance—Palm leaf. Size—13¾″ × 1¾″. Leaves—7. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—190. Incomplete.

Subject etc.—Same as No. 1147 T.

Remarks—The work commences on the latter hemistich of the 31st śloka. The leaves are much worn out. The first three leaves are missing. The opening page is numbered "൪൬(3)".

॥ सूर्यशतकम् (सव्याख्यम्) ॥

1268. SŪRYAŚATAKAM with commentary.

Substance—Palm leaf. Size—7⅛″ × 1½″. Leaves—108. 9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1450. Complete.

Subject--A panegyric of Sūrya.

Beginning:

श्रीमद्गणपतये नमः ।

वन्देऽरविन्ददलकोमलशीतलाक्षं
वक्षःस्थलाङ्कि धृतशङ्खरथाङ्गचक्रम् ।
श्रीवत्समुद्रितमधिष्ठितभोगिभोगं
ज्योतिः परं परमपूरुषनामधेयम् ॥

वन्देऽरविन्दजमुकुन्दकरेन्दुमौलीन्
विश्वो(ङ्क)त्थितिविपत्तिकृतात्मभेदान् ।
(वे?ये)षां कमण्डलुपदाब्जकपर्दसंगाद्
गङ्गाभवद् भुवनकल्मषमोक्षदक्षा ॥

कश्चिज्जगत्प्रथितवंशभवोऽग्रजन्मा
श्रीरङ्गदेव इति विश्रुतनाम.....।
.....पलमिमां सुधियां विधत्ते
व्याख्यां स्म सूर्यशतकस्य विमूढबुद्धिः ॥

दूरापेतपरस्परान्वयामिदं हास्यं दधत्येतरं ?
व्याख्याच्छद्म बहुप्रलापरचितं सन्तः सहन्तां मम ।
यस्मादाप्तितरां परम्परवशः क्षोदीयसीं शेमुषीं
बिभ्राणोऽपि मतिभ्रमेण कविताश्रद्धासवोल्लासिनाम् ॥

सन्तस्सन्तु महागुणा यदि गुणा दोषेषु भूरिष्वपि
ग्रन्थेऽस्मिन् कतिचित्तदेकमनसो नान्येषु विद्वेषिणः ।
आनायेन समं हृतेषु मणिभिश्शम्बूकयूथेष्वपि
स्वीकुर्वन्ति परं मणिं मणिभृतो भिन्दन्ति नैवेतरान् ॥

जम्भारातीभकुम्भोद्भवमिव दधतस्सान्द्रसिन्दूररेणुं
रक्तास्सिक्ता इवौघैरुदयगिरितटीधातुधारागणस्य ।
आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥

भानवीया भानवो वो विभूत्यै भूयासुरिति सम्बन्धः । कीदृग्भूताः । अभिनवाः प्रातःकालीनाः अत एव रक्ताः । कथं कथमिवेति । जम्भो नाम कश्चिदसुरः तस्य अरातिरिन्द्रः तस्य इभो गज ऐरावत इत्यर्थः । तस्य कुम्भौ मस्तकपिण्डौ उद्भव उत्पत्तिस्थानं यस्य तं जम्भारातीभकुम्भोद्भवं सान्द्रसिन्दूररेणुं सिन्दूरः पाटलवर्णो द्रव्यविशेषः तस्य रेणुः परागः सान्द्रो बहलः सान्द्रश्चासौ सिन्दूररेणुश्चेति सान्द्रसिन्दूररेणुः । तं दधत इव रक्ताः रेणुमिति जातावेकवचनम् ।

End :

देवः किं बान्धवः स्यात् प्रियसुहृदथवाचार्य आहोस्विदर्यो
रक्षाचक्षुर्न दीपो गुरुरुत जनको जीवितं जीवमोजः ।
एवं निर्णीयते यः क इति न जगतां सर्वदा सर्वदायी
सर्वाकारो दिनेशो दिशतु दशशताभी शुरभ्यर्थितं वः ॥

अयं देवः किं स्याद् बान्धवः स्वजनः अथवा प्रियसुहृत् । आहोस्विदिति पक्षान्तरपरिग्रहे । आचार्यः आहोस्वित् अर्यः स्वामी आहोस्वित् रक्षाचक्षुर्नेत्रं नन्वशब्दो वितर्के । दीपो नु गुरुरुत ज्येष्ठादिः । उत जनकः पिता उत जीवितं प्राणाः बीजं विश्वस्य कारणं उत ओजः बलं इत्येवं यः क इति(न) निर्णीयते कर्तव्यानि करोतीति तेष्वन्यतम (एष(ए?क) इति नाध्यवसीयते । अत एव सर्वदा सर्वकालेषु उपकार(कः) सर्वेषामाकारेणोपकारी दशशताभीशुः सहस्ररश्मिः वः अभ्यर्थितं दिशतु ।

Colophon :

इति सूर्यशतकं समाप्तम् ।

Author—Text: Same as No. 1147 T. Mayūra.
Com: Raṅgadeva.

Remarks—Same as No. 1259.

॥ सूर्यशतकं (सव्याख्यम्) ॥

1269. SŪRYAŚATAKAM
with commentary.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—50. 7—9 lines per page and 50—60 letters per line. Script—Malayāḷam. No. of Granthas—1400. Complete.

Subject etc.—Same as No. 1268.

Remarks—The Ms. is much decayed.

॥ सूर्यसहस्रनामस्तवः ॥

1270. SŪRYASAHASRANĀMASTAVA

Substance—Palm leaf. Size—12″ × 1¼″. Leaves—11. 6 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—165. Complete.

Subject—Same as No. 1268.

Beginning :

अस्य श्रीसूर्यनारायणसहस्रनाममन्त्रस्य कण्वप्रकण्व ऋषिः अनुष्टुप् छन्दः । श्रीसूर्यनारायणो देवता । वेदादि बीजम् । माया शक्तिः सङ्कल्पिताभीष्टसिद्ध्यर्थे सहस्रसंख्यामुकद्रव्यसमर्पणे विनियोगः ।

ध्यानम् ।

ध्यायेत्तुङ्गरथस्थितं युगयुजं सच्छङ्खचक्रान्वितं
तेजोराशिवरं किरीटकटकाद्यैर्भूषणैरञ्चितम् ।
वेदैर्देवगणैर्नुतं मुनिवरैर्वन्दारुवृन्दार्चितं
भक्ताभीष्टकरं रुजां क्षयकरं श्रीसूर्यनारायणम् ॥

विश्वजिद् विश्वजित् कर्ता विश्वात्मा विश्वतोमुखः ।

End :

निराधारो निराहारो नयवान् निपुणोऽनघः ।
परमब्रह्मचारी च चराचरपुरोहितः ॥
स्वदीपकोऽमितत्राणः परत्राणः प्रमाणकृत् ।
शुक्रः शुक्लप्रभास्वामी रत्नाङ्गः सूर्यदैवतम् ॥
नाम्नां सहस्रेणैतेन योऽर्चयेत् प्रत्यहं रविम् ।
आयुर्विजयसौभाग्यभोगभाङ्ग मोदते नरः ॥

Colophon :

शुभमस्तु । श्रीसूर्यसहस्रनाम संपूर्णम् ।

ശ്രീസൂര്യനാരായണസ്വാമി സഹായം. ശ്രീകൃഷ്ണായ നമഃ ശ്രീശിവായൈ നമഃ.

Author :

Remarks—Same as No. 1259.

॥ सौन्दर्यलहरी ॥

1271 A. SAUNDARYALAHARĪ.

Substance — Palm leaf. Size—6¾″×1¼″. Leaves—25. 6 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—210. Complete.

Subject—Same as No. 1256 B.
Beginning—Same as No. 1171 G.

End :

सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा ।
चिरं जीवन्नेव क्षपितपशुपाशव्यतिकरः
परब्रह्माभिख्यं रसयति रसां त्वद्भजनवान् ॥

प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चन्द्रोपलजललवैरर्घ्यरचना ।
स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियम् ॥
शुभमस्तु ।

Colophon :

Author—Śaṅkarācārya.

Remarks—The work has been published with commentary in MOLS. The Ms. of the commentary Sudhāvidyotinī on the work, borrowed from the Library of Nārāyaṇabhaṭṭatiri, Kuzhikkāttillam, Tiruvalla, Travancore, has been transcribed

and preserved in the Curator's Office, Trivandrum. Its introductory portion discloses that the author of the text is Pravarasena. A detailed inquiry on the subject will be made in the prefatorial note to that volume shortly to be published.

॥ ललितासहस्रनामस्तोत्रम् ॥

1271 B. LALITĀSAHASRANĀMASTOTRAM.

Substance—Palm leaf. Size—$6\frac{3}{4}'' \times 1\frac{1}{4}''$. Leaves—45. 6 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—330.

Subject—Same as No. 1220.

Beginning:

निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे
निराघातं जाने नियमपरचित्तैकनिलये ।
नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतिपदे
निरातङ्के नित्ये निशमय ममापि स्तुतिमिमाम् ॥

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुण्डसंभूता देवकार्यसमुद्यता ॥

उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता ।
रागस्वरूपपाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ॥

End—Colophon—Same as No. 1222 A.

Author:

Remarks—The following lines occur after the colophon:

वोषट् अनन्तशक्तये हृः अस्त्राय फट् । आनन्दभैरव ऋषिः । दैवी गायत्री छन्दः । श्रीमहात्रिपुरसुन्दरी देवता ।

हेमाद्रौ हेमपीठस्थितमखिलसुरैरीड्यमानां विराज-
त्पुष्पेष्विक्ष्वासपाशाङ्कुशकरकमलां रक्तवेषाधिरक्ताम् ।
भिक्षु(?)र्दिग्भिश्चतुर्भिर्मणिमयकलशैः पञ्चशक्त्यञ्चितैः स्व-
र्वृक्षैः क्लृप्ताभिषेकां भजतु भगवतीं भूतिदामन्त्ययामे ॥

वन्दे सिन्दूरवर्णां कनकमणिमुचः स्वस्तरोर्मूलसंस्था-
माद्यैर्देवैरधीशैर्हरिदधिपतिभिर्दिग्गजैः रुद्रसंघैः ।
नागश्रेष्ठैर्नदर्शैः कनकजलधरैरिन्दुसूर्यानलाद्यै-
रूढस्वर्णाभिषेकां करधृतकनकां पूर्णकामां भवानीम् ॥

मातङ्ग ऋषिः । गायत्री छन्दः । अमृतस्वरमातङ्गी देवता । ऐं नमो भगवति अमृतस्वरमातङ्गी मम हृदयनाडीं प्रवेशय प्रवेशय कुरु कुरु स्वाहा । श्रीगुरुभ्यो नमः ।

॥ सौन्दर्यलहरी ॥

1272 A. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—19. 10—12 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—210.

Subject—Same as No. 1260.

Beginning etc.—Same as No. 1271 A.

Remarks—Only six works are noticed in RCMPL. whereas the Ms. contains 15. They are separately catalogued in alphabetical order.

॥ चर्चास्तवः ॥

1272 B. CARCĀSTAVA.

Substance — Palm leaf. Size—5″ × 2¼″. Leaves—4. 10 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—45. Complete.

Subject—Same as No. 1224.

Beginning etc.—Same as No. 1147 X.

॥ पञ्चाक्षरबालास्तवः ॥

1272 C. PAÑCĀKṢARABĀLĀSTAVA.

Substance—Palm leaf. Size—5″ × 2¼″. Leaf—1. 11 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—10.

Subject etc.—Same as No. 1242 A49.

। नवरत्नमालिका ॥

1272 D. NAVARATNAMĀLIKĀ.

Substance—Palm leaf. Size—5″ × 2¼″. Leaf—1. 9—10 lines per page and 16 letters per line,

Script — Malayāḷam. No. of Granthas—12. Complete.

Subject etc.—Same as No. 1242 Q.

॥ विंशतिस्तवः ॥

1272 E. VIMŚATISTAVA.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—5. 10 lines per page and 16 letters per line. Script — Malayāḷam. No. of Granthas — 50. Complete.

Subject—Same as No. 1224.

Beginning etc.—Same as No. 1147 W.

॥ श्रीविद्यास्तोत्रम् ॥

1272 F. ŚRĪVIDYĀSTOTRAM.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—4. 10 lines per page and 16 letters per line. Script — Malayāḷam. No. of Granthas—40. Incomplete.

Subject—Same as No. 1256 B.

Beginning :

कल्लोलोल्लसितामृताब्धिलहरीमध्ये विराजन्माणि-
द्वीपे कल्पकवाटिकापरिवृते कादम्बवाट्युज्ज्वले ।
रत्नस्तम्भसहस्रनिर्मितसभामध्ये विमानोत्तमे
चिन्तारत्नविनिर्मितं जननि ते सिंहासनं भावये ॥

ण्णाङ्कानलभानुमण्डललसच्छ्रीचक्रमध्यस्थितां
बालार्कद्युतिमम्बिकां करतलैः पाशाङ्कुशौ बिभ्रतीम्
चापं बाणमतिप्रसन्नवदनां कौसुम्भवर्णांशुकां
तां त्वां चन्द्रकलावतंसमकुटां चारुस्मितां भावये ॥

End :

ह्रींकारत्रयसंपुटेन मनुनोपास्यैस्त्रिभिर्मौलिभि-
र्वाक्यैर्लक्ष्यतनोस्तव स्तुतिविधौ कः वा क्षेमताम्बिके ।
सल्लापाः स्तुतयः प्रदक्षिणशत सञ्चारमेवास्तु मे
संवेशो नमतां सहस्रमखिलं त्वत्प्रीतये कल्प्यताम् ॥

श्रीमन्त्राक्षरमालया विरचितं यः पूजयेच्चेतसा
सन्ध्यासु प्रतिवासरं सुनिहितं तस्यामरस्याचिरात् ।
चित्ताम्भोरुहमण्डपे गिरिसुता नित्यं विधत्ते लस-
द्वाणीवक्त्रसरोरुहे जलधिजागेहे जगन्मङ्गला ॥

Colophon :

Author :

Remarks—Same as No. 1241 E.

॥ सर्वशान्तिस्तवः ॥

1272 G. SARVAŚĀNTISTAVA.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—6. 10 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject etc.—Same as No. 1171 C.

॥ विश्वरूपस्तुतिः ॥

1272 H. VIŚVARŪPASTUTI.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—8. 10 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—70.

Subject etc.—Same as No. 1171 D.

॥ सुमुखीकरणस्तुतिः ॥

1272 I. SUMUKHĪKARAṆASTUTI.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—4. 10 lines per page and 14 letters per line. Script — Malayāḷam. No. of Granthas—35. Complete.

Subject etc.—Same as No. 1171 E.

॥ सर्वग्रासिनीमहामन्त्रः ॥

1272 J. SARVAGRĀSINĪMAHĀMANTRA.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—12. 10 lines per page and 14 letters per line. Script — Malayāḷam. No. of Granthas—120. Complete.

Subject—Same as No. 1260.

Beginning:

हरिः ।

सर्वग्रासिनीमहामन्त्रस्य ब्रह्मा ऋषिः गायत्री छन्दः शूलिनी दुर्गा देवता । दुं बीजं । स्वाहा शक्तिः । ह्रीं कीलकं । अभीष्टप्राप्तिद्वयर्थे जपे विनियोगः । ज्वलज्वलहृदयाय नमः । शूलिनि शिरसे स्वाहा । दुष्टग्रह शिखायै वषट् । हुं कवचाय हुं फट् नेत्रत्रयाय वौषट् ।

End:

द्रमां ओं नमो भगवति दुष्टग्रहस्य पंडग्रासिनीरूपेण ज्वलज्वलदुष्टग्रहदर्पभेदन शूलिनि दुष्टग्रहस्य पंडग्रासाय हुंफट् स्वाहा द्रम्यां ओं नमो भगवति दुष्टग्रहस्य समस्तग्रासिनीरूपेण ज्वलज्वलदुष्टग्रहदर्पभेदन शूलिनि दुष्टग्रहस्य हृदयाभीष्टं ग्रासय हुंफट् स्वाहा ।

Colophon:

द्ण्यां द्नां द्न्यां द्मां द्म्यां द्म्रां द्म्रयां द्म्वां द्म्त्र्यां ഇങ്ങു് അതു് അവുത്തി द्ण्यां द्नां द्न्यां द्मां द्म्यां ആകെ ശ്ലോകം അറുപത്തഞ്ചു്.

Author:

Remarks—Same as No. 1259.

॥ कनकधारास्तवः ॥

1272. K. KANAKADHĀRĀSTAVA.

Substance—Palm leaf. Size—5" × 2¼". Leaves—5. 10 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as No. 1219 A.

Beginning etc.—Same as No. 1147 D.

॥ शूलिनीकवचम् ॥

1272. L. ŚŪLINĪKAVACAM.

Substance—Palm leaf. Size—5" × 2¼". Leaves—5. 10 lines per page and 16 letters per line. Script — Malayāḷam. No. of Granthas—50. Complete.

Subject—Same as No. 1260.

Beginning—Same as No. 1074.

End :

पावनं परमायुष्यं विजयश्रीविवर्धनम् ।
अभेद्यमतुलं चैव भूतप्रेतनिबर्हणम् ॥
सर्वव्याधिहरं नित्यं सर्वक्षुद्रहरं परम् ।
धर्मार्थिकाममोक्षैकसिद्धिदं बलवर्धनम् ॥
त्रिसन्ध्यं यो जपेन्नित्यं न्यासभावयुतं शिवे ।
तस्य सर्वभयं नास्ति विजयः श्रीः पदे पदे ॥
शूलिन्याः कवचेनैव सांप्रतं पूजितोऽखिलैः ।
अनेनैव शर्वी(र्वाणि?र्ण) जीवन्मुक्तो भवेच्छिवे ।

Colophon :

श्रीमहाशैवतन्त्रे शूलिनीकवचम् ।

Author :

Remarks—The work is borrowed from the Mahā-śaivatantra.

॥ वागीश्वरीस्तवः ॥

1272. M. VĀGĪSVARĪSTAVA.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—2. 11 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—16.

Subject etc.—Same as No. 1147 C.

Remarks—The following verses of meditation on Bhadrakāḷī occur after the close:

श्रीगणपतये नमः ।
ध्यायेत् समस्तशत्रुघ्नीं सर्वसौख्यदयालयाम् ।
कालीं करालवदनां कालजीमूतसन्निभाम् ॥
भीमदंष्ट्रां ज्वलन्नेत्रां त्रयोज्वालाशिखोज्ज्वलाम् (?)
अष्टनागकृताकल्पामष्टदिक्पूर्णविग्रहाम् ॥
सहस्रभुजदण्डोद्यन्महस्रायुधशोभिताम् ।
सहस्रकिङ्किणीमालामापादतलमम्बिकाम् ॥
समस्तशत्रुरुधिरपानोन्मत्तां परां शिवाम् ।
परप्रयोगकर्मघ्नीं परराज्यप्रदायिनीम् ॥
परप्रयोगयन्त्रघ्नीं परमन्त्रांश्च भक्षिणीम् ।
एवं ध्यात्वा महादेवीं सर्वरोगनिवर्तिनीम् ॥
सर्वशत्रुनिवृत्तिनीं... ... ...
कृष्णाम्बरां कृष्णवर्णां मुग्धाकारां गदाधराम् ।
पञ्चशूलधरां वन्दे परमन्त्रस्य भक्षिणीम् ॥

॥ इन्द्राक्षीस्तवः ॥

1272. N. INDRĀKṢĪSTAVA.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—3. 10 lines per page and 16 letters per line. Script —Malayāḷam. No. of Granthas—30.

Subject—Same as No. 1260.

Beginning :

नेत्राणां दशभिः शतैः परिवृतामत्युग्रचर्माम्बरां
हेमाभां महतीं विलम्बितशिखामामुक्तकेशान्विताम् ।
घण्टामण्डितपादपद्मयुगलां नागेन्द्रकुम्भस्तनी-
मिन्द्राक्षीं परिचिन्तयामि सततं कल्पोक्तसिद्धिप्रदाम् ॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥
इन्द्राक्षीं सहयुवतीं नानालङ्कारभूषिताम् ।
प्रसन्नवदनाम्भोजामप्सरोगणसेवितम् ॥

End :

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्मितभ्रूभ्रलोचनवधे हे चण्डमुण्डादिनि ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निसुम्भापहे
सुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

रोगानशेषानपहंसि तुष्टा
कामानभीष्टानखिलान् ददासि ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

Colophon :

Author :

Remarks—Same as No. 1241 E.

॥ नवरत्नमालिका ॥

1272 O. NAVARATNAMĀLIKĀ.

Substance—Palm leaf. Size—5″ × 2¼″. Leaves—2. 10 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—20.

Subject—Same as No. 1260.

Beginning :

कुन्दसुन्दरमन्दहासविराजिताधरपल्लवा-
मिन्दुबिम्बनिभाननामरविन्दचारुविलोचनाम् ।
चन्दनागरुपङ्करूपिततुङ्गपीनपयोधरां
चन्द्रशेखरवल्लभां प्रणमामि शैलसुतामुमाम् ॥

डाडिमीकुसुममञ्जरीनिकरसुन्दरीमदनमन्दिरे
यामिनीरमणखण्डमाण्डितशिखण्डिके तरलकुन्तले ।
पाशमङ्कुशमुदञ्चितं दधति कोमले कमललोचने
तावके वपुषि सन्ततं जननि मामकं भवतु मानसम् ॥

End :

कालिकातिमिरकुन्तलान्तघनभृङ्गमङ्गलविहारिणीं
चूलिकाशिखरिमालिकामलयमल्लिकाकुसुमसौरभाम् ।

मालिकाचतुरगण्डमण्डलमनोहरानन्मरोरुहा-
मम्बिकामखिलनायकीं मनसि भावयामि परदेवताम् ॥

माणिक्यकुण्डालितमौक्तिकपालिकेन
मन्दस्मितेन वदनारुणपङ्कजेन ।
कालान्तदीर्घमांणिमङ्गलसूत्रकण्ठी
माता विशालनयना मम सन्निधत्ताम् ॥

नित्यमेव नियमेन पूजिता
भक्तिमुक्तिरिह मस्तु सिद्धये ।
शङ्करेण रचितां सदा जपे-
न्नाम एव नवरत्नमालिका ॥ (?)

Colophon :

Author—Śaṅkarāchārya.

Remarks—This work is identical with No. 1172 C.

॥ सौन्दर्यलहरी ॥

1273. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—5″ × 2″. Leaves—17. 10—12 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—210.

Subject—Same as No. 1260.

Beginning etc.—Same as No. 1271 A.

Remarks—The following lines are embodied in one of the leaves at the end ;

भानौ रेखाद्वयाग्रं स्पृशतु भृगुजसूत्रस्य मध्ये सुसूक्ष्म-
मिन्दोः केतौ तदूर्ध्वं महिजमपि नयेद् बाधरेखां फणीन्द्रे ।
जीवं मन्दे च काव्यं शशिनि रविसुतं प्रापयेदूर्ध्व(वृत्तौ?त्ते)
राहुं भानौ च केतुं नयतु महिसु(तौ?ते)चक्रराजं तदाभूत् ॥

व्यासे देवीकृते तत्तमललविगते चापभागे च सूत्रान्
कृत्वा पौरीदलान्ते पवनमुभयतो वातयोस्तोयभागान् ।
धान्यांशान्मे विमार्ज्य प्रथयतु वरुणाग्राणि सूत्रद्वयाग्रं
प्राक् प्रोतं रोधिगानं विहिमसि धुनिगं दिव्यमनुः सुरं प्राक् ॥

विन्दुत्रिकोणवसुकोणदशारयुग्मं
मन्वश्रनागदलषोडशसंवृतारम् ।
वृत्तद्वयं च धरणीसदनत्रयं च
श्रीचक्रमेव कथितं परदेवतायाः ॥

तस्य तुष्यति सुन्दरी ।

बहुनात्र किमुक्तेन लोपामुद्रापते शृणु ।
भक्तश्रेष्ठेभिता देव्यास्त्ववश्यं कीर्तयेदिदम् ॥
नान्यथा प्रीयते देवी कल्पकोटिशतैरपि ।
तस्माद् रहस्यनामानि श्रीमातुः प्रीतये पठेत् ॥
इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम् ।
आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत् ॥
नामाद्यक्षरमारभ्य यावन्मन्त्रादिदर्शनम् ।
सिद्धसाध्यसुसिद्धारिप्रादक्षिण्येन योजयेत् ॥

॥ सौन्दर्यलहरी ॥

1274. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—8″ × 2″. Leaves—14 10—13 lines per page and 21 letters per line. Script—Malayāḷam. No. of Granthas—210.

Subject—Same as No. 1256 B.

Beginning etc.—Same as No. 1271 A.

Remarks—The words "श्रीगणपतये नमः" are noted in Telugu script after the colophon.

॥ सौन्दर्यलहरी ॥

1275. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—7½″ × 2″. Leaves—19. 7 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—210.

Subject—Same as No. 1256 B.

Beginning etc.—Same as No. 1271 A.

॥ सौन्दर्यलहरी ॥

1276. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—5¼″ × 1″. Leaves—33. 5 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—125. Incomplete.

Subject—Same as No. 1256 B.

Beginning etc.—Same as No. 1271 A.

Remarks—The work extends up to the 58th verse. The following verse enlogistic of Ganapati occurs at the beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
श्रीमत्काञ्चनपर्वताग्रविलसन्मन्दाकिनीमङ्गल-
स्नानप्राप्तगिरीन्द्रजास्तनगलत्स्तन्यं पिबन्तं मुहुः ।
मातुर्गण्डसुदर्पणे हरमुखश्रीभस्मसंमार्जितं
वीक्षन्तं निजमाननं गणपतिं वन्दे किशोराकृतिम् ॥

॥ सौन्दर्यलहरी ॥

1277. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—5″ × 1¼″. Leaves—24. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—210. Complete.

Subject—Same as No. 1256 B.
Beginning etc.—Same as No. 1271 A.

Remarks—The first Fol. contains only 4 lines. The second Fol. begins with the letter-numerals, "सहा" (46) and so it is presumed that the former is a later addition to the manuscript. The following verses, in addition to those in No. 1271A are seen at the close:

निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे
निराघातज्ञाने नियमपरचित्तैकनिलये ।

नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतिपदे
निरातङ्के नित्ये निशमय ममापि स्तुतिमिमाम् ॥

मनोवाग्दुस्पर्शे मधुरिपुविधात्रोरपि तव
स्वरूपे जात्यन्धः कथय कथयामि स्तुतिमहम् ।
दिशो लक्षीकृत्य प्रहित इव वाणोऽयमथवा
मदीयो वाग्बन्धस्त्वयि जननि सर्वान्मवपुषि ॥

॥ सौन्दर्यलहरी ॥

1278. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—$3\frac{3}{4}'' \times 1\frac{1}{4}''$. Leaves—22. 8 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—125. Incomplete.

Subject—Same as No. 1256 B.

Beginning:

* * * *
* * * *

... .भ्यो भीता सरसिरुहसौभाग्यजननी
सखीषु स्मेरा ते जननि दृष्टिः सकरुणा ॥

गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तुश्चित्तप्रशमरसविद्रावणफले ।
इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके
तवाकर्णाकृष्टस्मरशरविलासं कलयतः ॥

End etc.—Same as No. 1271 A.

Remarks—The first 21 leaves are missing.

॥ सौन्दर्यलहरी ॥

1279. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—8″ × 1¼″. Leaves—12. 8—11 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—210.

Subject—Same as No. 1256 B.

Beginning etc.—Same as No. 1271 A.

Remarks—The last verse beginning with "प्रदीपज्वा-लाभिः" is missing in the Ms.

॥ सौन्दर्यलहरी ॥

1280. SAUNDARYALAHARĪ.

Substance—Palm leaf. Size—5″ × 1¼″. Leaves—11. 7 lines per page and 14 letters per line. Script — Malayāḷam. No. of Granthas—70. Incomplete.

Subject—Same as No. 1256 B.

Beginning—Same as No. 1171 G.

End :

चतुःषष्ट्या तन्त्रैः सकलमतिसन्धाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः पशुपतिः ।

पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटना-
स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम् ॥

शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परामारहरयः ।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजन्ते वर्णास्ते त... ... ॥

Author—Same as No. 1271 A.

Remarks—The Ms. is very old and decayed. It comprises 30 verses only.

॥ सौन्दर्यलहरी (लक्ष्मीधरोपेता) ॥

1281. SAUNDARYALAHARĪ
with the commentary, Lakṣmīdharā.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—125. 9 lines per page and 23 letters per line. Script—Malayāḷam. No. of Granthas—2675. Complete.

Subject—Same as No. 1256 B.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
सोऽयं लक्ष्मीधरः प्राह टीकां लक्ष्मीधराभिधाम् ।
एनां समाहितस्वान्ताः सेवन्तां सततं बुधाः ॥

स्यादेव मेऽलमनया मतिमान्द्यतो वा
दोषः क्वचित् क्वचिदथापि न कापि शङ्का।
नैसर्गिकी खलु गुणीकरणप्रवीणा
शक्तिः सदा विजयते खलु सज्जनानाम् ॥

इह खलु शङ्करभगवत्पूज्यपादाः समयतत्त्ववेदिनः समयाख्यां चन्द्रकलां श्लोकशतेन प्रस्तुवन्ति—

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥

शिवः सर्वमङ्गलोपेतः सदाशिवतत्त्वम् । वश कान्ताविति यस्माद्धातोः शिवशब्दो निष्पन्नः।

End:

तथा वाचां तवेयं स्तुतिः। स्वकीयाभिर्वाग्भिरेव अत्रेयं स्तुतिर्यदा पूर्वोक्तम् । अस्मिन् सौन्दर्यलहरीश्लोकशतके समानीतः पञ्चामिति समुद्भूतस्थूलस्तनभरमिति निधे नित्यस्मेरे इति श्लोकत्रयं वर्तते। तत्तु भगवत्पादकृतं न भवति केनचित् प्रक्षिप्तमिति नं व्याख्यातम् ।

Colophon:

इति श्रीमल्लोल्लकुलसंप्रदायप्रवर्तकभ्रमराम्बिकाप्रसादसमुल्लसितमहासारस्वतभट्टलोल्लटादिग्रन्थविवरणकर्तृश्रीमहोपाध्यायमहादेवाचार्यसप्तमेन साहित्यपारिजातकल्पतरुप्रबन्धूलक्ष्मीधराचार्यषष्ठेन भरतार्णवपोताख्यसाहित्यमीमांसाग्रन्थद्वयप्रणेतृविरिञ्चिमिश्रपञ्चमेन मीमांसाद्वयजीवातुपुरुषोत्तममहोपाध्याय-

नप्त्रा प्रभाकरामृतवाहिनीप्रभावखण्डनखण्डनाद्यनेकप्रबन्धप्रवर्तक-
विमदमहोपाध्यायलक्ष्मणाचार्यपौत्रेण नयविवेकदीपिका-
प्रबन्धसंविधातृमहोपाध्यायविद्वत्सार्वभौमनूतनव्यासा-
द्यनेकविरुदाङ्कितश्रीविश्वनाथभट्टारकतनयेनाधीतदशशत-
नयेन पार्वतीगर्भशुक्तिमुक्तारत्नेन बहूकृतवीचीरत्नेन (?)लोल्लकुल-
वंशाम्बुधिसुधांशुना (शयः?यशः)प्रांशुना हरीतगोत्रकल्पशाखि-
ना आपस्तम्बशाखिना षड्दर्शनीपारदृश्वना प्रतिपक्षझञ्झामातरिश्व-
ना भ्रमराम्बिकाप्रसादसमासादितप्रतिभाविशेषेण भ्रूविशेषेण(?) निखि-
लयामलतन्त्रार्णवावगाहनरुद्रेण आश्रयीकृतगजपतिवीररुद्रेण नील-
गिरिसुन्दरचरणारविन्दचञ्चरीकेण वाणीसहचरीकेण सरस्वतीवि-
लासाद्यनेकस्मृतिनिबन्धनलक्ष्मीधराद्यनेकसाहित्यनिबन्धननयवि-
वेकभूषणाद्यनेकगुरुमतनिबन्धनयोगदीपिकाद्यनेकपातञ्जलम-
तनिबन्धनमानवधर्मशास्त्रटीकावतंसाद्यनेककाव्यकल्पेन आश्रित-
जनकल्पकेन निग्रहानुग्रहकौशिकेन श्रीमहोपाध्यायलक्ष्मी-
धरदेशिकेन कृतेयं लक्ष्मीधराख्या सौन्दर्यलहरीस्तुति-
व्याख्या । अनया सन्तुष्टा भगवती अस्मदीयानां लक्ष्मीधरा-
चार्याणामवाद्यम् ? ।

वयमिह पदविन्या(?)तन्त्रमान्वीक्षिकीं वा
यदि पथि विपथे वा वर्तयामः स पन्थाः ।
उदयति दिशि यस्यां भानुमान् सैव पूर्वा
नहि तरणिरुदीते दिक्पराधीनवृत्तिः ॥

सायंसंफुल्लमल्लीसमसुरभिसुधामाधुरीसाधुरीति-
प्रेंखत्पुंखानुपुंखस्फुरदमरसरिद्वीचिवाचालवाचः ।
लोल्लश्रीलक्ष्मणाख्यो गुणमणिजलधिर्भासते भूसुराली-
केलीनालीकपालीदशशतकिरणो विद्वदग्रेसरोऽसौ ॥

(यस्य समाप्तः ?)

यः कर्णाटका...धिपमहास्थाने सुपर्णायितो
यो विद्यानिकषायितो नृपगृहे मेद्धपृथ्वीशितुः (?) ।
श्रीमल्लोल्लटभट्टशिष्य इति यो लोल्लाप्य यः स्तूयते
श्रीशेषान्वयशेखरः स हि महानुभावो विपश्चिन्महान् (?) ॥

तस्योक्तिं निकषायितुमीहे निकषा नह्यलंक्रिया(?)

समानीतः पद्भ्यां मणिमुकुरतामम्बरमणि-
र्भयादन्तर्बद्धस्तिमिरकिरणश्रेणिमसृणम् ।
दधाति त्वद्वक्त्रं प्रतिफलितमश्रान्ति विकच-
न्निजाम्भोजव्याजात्तव हृदयपङ्केरुहमिव ॥

समुद्भूतस्थूलस्तनभरमुरश्चारु हसितं
कटाक्षाः कन्दर्पाः कतिचन कदम्बद्युति वपुः ।
हरस्य त्वद्भ्रान्तिं मनसि जनयन्ती समदनो
भवत्यां ये भक्ताः परिणतिरमीषामियमुमे ॥

निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे
निराघाटज्ञाने नियमपरचित्तैकनिलये ।
नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतिपदे
निरातङ्के नित्ये निशमय ममापि स्तुतिमिमाम् ॥
एवं सौन्दर्यलहरीव्याख्यानं समाप्तम् ।

शुभमस्तु ।

श्रीदेव्यै नमः ।

ആയിരത്തിഅറുപത്തിനാലാമാണ്ടു് ആവണിമാസം ൧൦൧൪-
രാമശാസ്ത്രിയൾ എഴുതിതീൎത്തു് .

Author—Text : Śaṅkarācārya.
Com : Lakṣmīdhara.

Remarks—The work is identical with No. 10866 DCSM. Vol. XIX excluding the verses occuring after the colophon. It has been published in MGOLS. The colophon furnishes an account of the commentator's life and of the works composed by his seven successive ancestors.

॥ सौन्दर्यलहरी (लक्ष्मीधरोपेता) ॥

1282. SAUNDARYALAHARĪ
with the commentary, Lakṣmīdharā.

Substance—Palm leaf. Size—$7\frac{3}{4}'' \times 2''$. Leaves—68. 12—13 lines per page and 24 letters per line. Script—Grantha. No. of Granthas — 1275. Incomplete.

Subject—Same as No. 1256 B.

Beginning :

ओम् ।

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥
श्रीमात्म्बदक्षिणामूर्तये नमः । ओम् ।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
गुरुभ्यो नमः । महागणेशाय नमः । श्रीमहात्रिपुरसुन्दर्यै नमः । श्रीवेदव्यासाय नमः । ओम् ।

शिवः शक्त्या युक्तो

End :

कटाक्षव्याक्षेपभ्रमरकलभौ कटाक्षावेव व्याक्षेपो व्याजः ययोस्तयोस्तौ च तौ भ्रमरकलभौ चेति समासः । भ्रमरकलभौ द्विरेफडिम्भौ अत्र यद्यपि कलभशब्दः करिडिम्भवचनः महाकविप्रयोगप्राचुर्यवशाद्विशेषसामान्यलक्षणौ भ्रमरकलभाविति । कर्णयुगलम् ।

Colophon :

Author—Same as No. 1281.

Remarks—The opening Fol. is numbered 16.

॥ स्कन्दकवचम् ॥

1283 A. SKANDAKAVACAM.

Substance—Palm leaf. Size—4½″×2″. Leaves—4. 6 lines per page and 12 letters per line. Script —Malayāḷam. No. of Granthas—18.

Subject—A panegyric of Subrahmanya.

Beginning :

हरिः ।

श्रीसुब्रह्मण्यकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । श्रीसुब्रह्मण्यो देवता ।

स्फुरन्मकुटपत्रकुण्डलविभूषितं चम्पक-
स्रजाकलितकन्धरं करयुगेन शक्तिं पविम् ।
दधानमथवा कटीकलितवामहस्तेष्टदं
गुहं घुसृणभासुरं स्मरत पीतवासोवसम् ॥

सुब्रह्मण्योऽग्रतः पातु सेनानीः पातु पृष्ठतः ।
गुहो दक्षिणतः पातु स्वयम्भूः पातु वामतः ॥

End :

यत्र यत्र जपेत्तत्र तत्र सन्निहितो गुहः ।
पूजाप्रतिष्ठाकाले च जपकाले पठेदिदम् ॥
तेषामेवं फलावाप्तिः महापातकनाशनम् ।
यः पठेच्छृणुयाद् भक्त्या नित्यं देवस्य सन्निधौ ।
सर्वान् कामानवाप्नोति सोऽन्ते स्कन्दपुरं व्रजेत् ॥

Colophon :

सुब्रह्मण्यकवचं समाप्तम् ।

Author :

Remarks—Same as No. 1241 E.

॥ षण्मुखषट्कम् ॥

1283 B. ṢAṆMUKHAṢAṬKAM.

Substance—Palm leaf. Size—4½" × 2". Leaves—2½. 7 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—10.

Subject—Same as No. 1283 A.

Beginning etc.—Same as No. 1242 A11.

॥ कुजस्तवः ॥

1283 C. KUJASTAVA.

Substance—Palm leaf. Size—4½" × 2". Leaves—1½.

7 lines per page and 16 letters per line. Script —Malayāḷam. No. of Granthas—10.

Subject—A eulogy of Kuja.

Beginning:

अङ्गारक महीपुत्र भगवन् भक्तवत्सल ।
नमोऽस्तु ते ममाशेषमृणमाशु विनाशय ॥
मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।
स्थिरासनो महाकायः सर्वकर्मविरोधकः ॥
लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धर्मात्मजः कुजो भौमो भूमिजो भूमिनन्दनः ॥

End :

एकविंशतिनामानि पठित्वा च तदन्तिके ।
ताश्च प्रमार्जयेत्पश्चात् वामपादेन संस्पृशेत् ॥
एवं कृते न सन्देहः ऋणहर्ता धनी भवेत् ।

Colophon :

Author :

Remarks—Same as No. 1259.

॥ पञ्चायुधस्तुतिः ॥

1283 D. PAÑCĀYUDHASTUTI.

Substance—Palm leaf. Size—4⅕" × 2". Leaf—1. 6 lines per page and 16 letters per line. Script — Malayāḷam. No. of Granthas — 6. Incomplete.

Subject—Same as No. 1146 P.

Beginning :

करे मुरारेस्सततं वसन्तं
सुरद्विषः प्राणगणान् हरन्तम् ।
निजस्वभावेन समुज्ज्वलन्तं
भजस्व हे चित्त सुखाय नन्दकम् ॥

End :

रणे रिपूणां रुधिरस्य पानात्
उच्छूनदेहे वननामभासा (?) ।
गदा मदीये (मम ? हृदि) सन्निधत्तां
कौमोदकी संप्रति कंसशत्रोः ॥

Colophon :

पञ्चायुधस्तुतिः ।

Author :

Remarks—The work is almost identical with No. 1146 P.

॥ वज्रपञ्जरम् ॥

1283 E. VAJRAPAÑJARAM.

Substance—Palm leaf. Size—$4\frac{1}{2}'' \times 2''$. Leaves—3. 6 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject etc.—Same as No. 1210 R.

Remarks—The following stanza is quoted after the end :

"किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।
चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान् परमतं ज्योतिस्तदस्मि प्रभो" ॥

This verse is noticed in RCMPL. as a separate work.

॥ अद्वैतपञ्चरत्नम् ॥

1283 F. ADVAITAPAÑCARATNAM.

Substance—Palm leaf. Size—4½" × 2". Leaves—2½. 7 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject—Same as No. 539.

Beginning—Same as No. 1160 D.

End :

जाग्रत्युद्भूतबाह्येन्द्रियविषयसमुल्लाससाक्षी शिवोऽहं
स्वप्ने दृष्टप्रपञ्चप्रतिफलनमहामोहसाक्षी शिवोऽहम् ।
सुप्तौ चित्ते प्रलीने प्रबलतरमहामोहसाक्षी शिवोऽहं
नित्यानन्दस्तुरीये वितथकलिमलः सर्वसाक्षी शिवोऽहम् ॥

सदाशिवब्रह्मशुभम् ।

Colophon :

Author : Śaṅkarācārya

Remarks—Same as No. 1259.

॥ स्तोत्ररत्नम् ॥

1284. STOTRARATNAM.

Substance—Palm leaf. Size—15″ × 2″. Leaves—5. 7 lines per page and 48 letters per line. Script —Malayâlam. No. of Granthas—100.

Subject—Same as No. 1214.

Beginning :

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥
नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ॥
नमोऽचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ॥

तस्मै नमो मधुजिदङ्घ्रिसरोजतत्त्व-
ज्ञानानुरागमहिमातिशयान्तमग्नि ।
नाथाय नाथमुनयेऽत्र परत्र चापि
नित्यं यदीयचरणौ शरणं मदीयम् ॥

भूयो नमोऽपरिमिताच्युतभक्तितत्त्व-
ज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः ।
लोकेऽवतीर्णपरमार्थसमग्रभक्ति-
योगाय नाथमुनये यमिनां वराय ॥

तत्त्वेन यश्चिदचिदीश्वरतत्स्वभाव-
भोगापवर्गतदुपायगतस्तुदारः ।

संदर्शयन्निरमिमीत पुराणरत्नं
तस्मै नमो मुनिवराय पराशराय ॥

माता पिता युवतयस्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं
श्रीमत् तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥

End :

रघुवर यदभूस्त्वं तादृशो वायसस्य
प्रणत इति दयालुर्यस्य चैद्यस्य कृष्ण ।
प्रतिपदमपराद्धुर्मुग्धसायुज्यदोऽभू-
र्वद किमपदमागस्तस्य तेऽस्ति क्षमायाः ॥

ननु प्रपन्नः सकृदेव नाथ
तवाहमस्मीति च याचमानः ।
तवानुकम्प्यः स्मरतः प्रतिज्ञां
मदेकवर्जं किमिदं (वितर्वे) (?) ।

अकृत्रिमत्त्वच्चरणारविन्द-
प्रेमप्रकर्षावधिमात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य
प्रसीद मद्वृत्तमचिन्तयित्वा ।

Colophon :

यत्पदाम्बुरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनार्यं नमाम्यहम् ॥

Author—Yāmunamuni.

Remarks—The work is printed with a commentary in the Viśiṣṭādvaitagrantha series, Madras,

The name of the author is based on that edition.

॥ नीतिः ॥

॥ अर्थशास्त्रम् (चाक्षुषीयम्) ॥

1285. ARTHAŚĀSTRAM.

Substance—Palm leaf. Size—$2\frac{1}{8}'' \times 1\frac{1}{8}''$. Leaves—21. 5—7 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—250. Incomplete.

Subject—Politics.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नेन परिसमाप्तिरस्तु ।

शक्यमेकशरीरेण नीतिमार्गानुसारिणा ।
व्यवसायद्वितीयेन शक्या जेतुं वसुन्धरा ॥

अथातः पुरुषार्थसाधनमर्थशास्त्रं प्रवक्ष्यामि । तद्यथा । सप्त प्रकृतयः । सप्तविधा प्रवृत्तिः । सप्त व्यसनानि । सप्त क्षमाकालाः । तिस्रो विद्याः । चत्वारो भोगसङ्ग्रहाः । त्रयो विजिगीषवः । चतुर्विधा राजप्रकृतिः । षट्त्रिंशद्गुणो राजा । पञ्चविंशतिगुणोऽमात्यः । षड्विंशतिगुणः सेनापतिः । द्वाविंशतिगुणो राजाध्यक्षः । षोडशगुणो दूतः । द्वादशगुणः सांवत्सरिकः । एकादशगुणः पुरोहितः । पञ्चदशगुणो वैद्यः । नवगुणो नागरिकः ।

दशगुणोऽन्तःपुरपालकः। द्वादशगुणं मित्रम्। षड्गुणा यात्रा। विंशतिगुणं दुष्टलिङ्गज्ञानम्।

End:

एवमेभिर्गुणैर्युक्ता राज्ञो भूमिः प्रशस्यते।
आसाद्येमां नृपः काले भुञ्जात् कामानतन्द्रितः॥
चतुर्विधं त्यागस्थानं धर्महेतोर्यद्भृत्यानां भरणाय च (?)।
आपदर्थं च संरक्ष्यः कोशः कोशवता सदा॥
धर्मोत्सवे तथापत्सु सम्पसु च यथाहितम्।
कुर्यात् त्यागं नृपः स्वार्थं राज्यमासाद्य योगतः॥
चतुर्विधा भृत्यसम्पत्।
बुद्धिमाननुरक्तश्च शूरो वाक्यगुणान्वितः।
यस्य स्यान्नृपतेर्भृत्यस्तस्य सर्वमिदं जगत्॥
चतुर्वि..... ....
न विश्वसेदविश्वस्तं विश्वस्तं नातिविश्वसेत्।
विश्वस्तः क्षयमाप्नोति सर्वान् स.....दबुधः॥
विप्रान् विहाय यः पश्येत्कार्याणि नृपतेः सह।
तस्य सङ्ग.....शश्च नश्यति॥
इति चिन्त्यं राज्ञा।
षट्कर्णश्छिद्य.....विद्यते।
कुमुदस्यैव राजत्वं राजा पाषण्डमा.....
महिष्योपायनीतित्वात्कुमुदश्शुकमाप्नुयात्।
राजा पाषण्डकं त्यक्त्वा पूर्वं.....

Colophon:

इति चाक्षुषीये तृतीयः पटलः॥

Author:

Remarks—The work breaks off on a fragment of the 4th *paṭala*. The leaves are decayed. A lacuna is marked after the 21st folio.

॥ अर्थशास्त्रम् (केरलभाषाव्याख्योपेतम्) ॥

1286. ARTHAŚĀSTRAM
with Malayāḷam commentary.

Substance—Palm leaf. Size—$26\frac{1}{2} \times 2''$. Leaves—190. 8 lines per page and 112 letters per line. Script—Malayāḷam. No. of Granthas—10600. Incomplete.

Subject—Same as No. 1285.

Beginning:

... ...

ധികാരം ചൊല്ലീതു പരവിഷയത്തിലുള്ളകാ.....

....

... ...

റു തന്നെ രക്ഷിക്കവേണ്ടും മാകിൻറമയാൽ രാജപുത്രരക്ഷണ
മെന്നും സൂത്രമൊലിതു രാജപുത്രനെ രക്ഷിച്ചാൽ അവൻ
രാജാവിനിക്കു ഒരു പിഴയുമൊന്നാൻ. തന... ... ...

....

... ...പിഴചെയ്യുവും ചടാതായിട്ട ക്ഷേമാവിതു
തുണ്ടീം ദണ്ഡകരപുറത്തുവച്ചു രക്ഷിപ്പിതു താൻ ചെയ്യിതു.
പുറത്തുവച്ചു രക്ഷിക്കുമാറും ഒരുകാര്യം കാട്ടിത്തിൻ അദ്ധ്യരാജ്യ
ത്തുക്കു അർഹനാക്കി വൈപ്പിതു ചെ ... ...

... ...കികിൻറ രാജപുത്രൻ ഇളംകൊട്ടപ്പട്ട മുടെയവൻ എങ്ങനെ രാജാവിനോടു ഇയംകുമാമു എിന്നമ ത്ഥത്തെ കാട്ടി അവരുദ്ധവൃത്തമെന്നും സൂത്രഞ്ചൊല്ലിത്ര.

End :

സാത്ഥമറിയുമവൻ അത്ഥയുക്ത്യാ ... ...
പൊവാനുള്ളുവിനെ ക്കൊടുപ്പിത്ര പലനെൻറവാറു വിജിഗീ
ഷു ശക്തിചുരുംകുകിൽ ശത്രുവിനൊടു കൂടു ... ...
ഗീഷുവിന്മെൽ വെല്ലുമൊട്ടായ്ക്കാള്ളുമവൻ അങ്ങനെ ശാ
നായിരുന്ന മിത്രനെ ശത്രുവിൽ നിൻറു ഭേദിപ്പി ... ...

Colophon :

പതിനെട്ടാമദ്ധ്യായമും സന്ധിമോക്ഷമാകിൻറ സൂത്രമു ടിഞ്ഞിത്ര.

Author—Text: Kauṭalya.

Remarks—The work extends up to the 7th Adhikaraṇa. It is a commentary on Arthaśāstra in old Malayāḷam. The first three leaves and the last are missing. Vinayādhikārika alone is published as No. 12. in SVSLS.

॥ जयमङ्गला (नीतिसारपञ्जिका) ॥

1287. JAYAMAṄGALĀ.

A commentary on Nītisāra.

Substance—Palm leaf. Size—20″ × 1½″. Leaves—84.

7—9 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—3000. Complete.

Subject—Exposition of *Nītisāra* of Kāmandaka.

Author — Śaṅkarāya

Remarks—The following statement discloses the names of scribe and of the owner of the Ms:—

ईश्वरेण लिखितमिदं पुस्तकम् । चम्पकश्रेणीकृष्णस्यायं ग्रन्थः ।

॥ जयमङ्गला (नीतिसारपञ्चिका) ॥

1288. JAYAMAṄGALĀ.

A commentary on Nītisāra.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—129. 8—9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—3000. Complete.

Subject—Same as No. 1287.

Remarks—The colophon furnishes the following information :

"श्री कण्ठेन लिखितम् । शेषं तत्पुत्रेण चक्रपाणिना लिखितम्" ।

॥ जयमङ्गला (नीतिसारपञ्चिका) ॥

1289. JAYAMAṄGALĀ.

A commentary on Nītisāra.

Substance—Palm leaf. Size—14¾″ × 2″. Leaves—47.

14—16 lines per page and 64—70 letters per line. Script—Malayāḷam. No. of Granthas—3000. Complete.

Subject etc.—Same as No. 1287.

॥ जयमङ्गला (नीतिसारपञ्चिका) ॥

1290. JAYAMAṄGALĀ.

A commentary on Nītisāra.

Substance — Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves —111. 10—11 lines per page and 42—44 letters per line. Script—Malayāḷam. No. of Granthas—3000. Complete.

Subject etc.—Same as No. 1287.

॥ जयमङ्गला (नीतिसारपञ्चिका) ॥

1291. JAYAMAṄGALĀ.

A commentary on Nītisāra.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—183. 6—8 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—3000. Complete.

Subject etc.—Same as No. 1287.

॥ नीतिवाक्यामृतम् ॥

1292. NĪTIVĀKYĀMṚTAM.

Substance—Palm leaf. Size—21″ × 2″. Leaves—40. 6 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—775. Incomplete.

Subject—Same as No. 1285.

Beginning :

.....युज्यते । मन्त्रपूर्वः सर्वोऽप्यारम्भः क्षितिभृताम् । अनुपलब्धस्य ज्ञानमुपलब्धस्य निश्चयगणिश्चितस्य(?)वलाधानमर्थ-द्वैतस्य.....लब्धिरिति मन्त्र.....प्यमेनं अळत..... मारब्धस्यानुष्ठानमनुष्ठितस्य विशेषं विनियोगसम्पदश्च कर्मसु ये कुर्युस्ते मन्त्रिणः कर्मणा भार.....पुरुषदूत्यसंपदेशकाल...भागो विनिपातप्रतीकारः कार्यसिद्धेश्चेति पञ्चाङ्गो मन्त्रः । आकाशे प्रतिशब्दवति नानाश्रये च मन्त्रयेत् । मुखविकारकराभिनयाभ्यां प्रतिध्वानेन वा मनःस्थमप्यर्थं व्यूहन्ति विचक्षणाः ।

End :

मत्तवारणारोहिणो जितव्ये(?)सन्देहो निश्चितश्चापायाः । अत्यर्थं भयविनोदानाङ्ग.....पाद्य तिष्ठति । ऋणमनोदासकर्मणा निर्हरेत् । अन्यत्र यि(?)ब्राह्मणक्षत्रियेभ्यः(.....) हतप ननु वैरी यस्य यथालाभमशनं शयनञ्च न सहते । तस्य किमसाध्यनाम यो महामुनिरिव सर्वान्नीनस्सर्वक्लेशसहस्सर्वत्र सुखशायी च । स्त्रीप्रीतिरिव कस्य नाम स्थिरेयं लक्ष्मीः । परपैशून्यो धनेन प्रायेण श...

Colophon :

इति विवाहसमुद्देशः ।

Author—Somadevasūri (Vide p. 299. CC. Vol. I).

Remarks—The Ms. is much worn out. The first nine leaves are missing. The work extends from Mantrī to Prakīrṇaka Samuddeśa. It is identical with No. 3879, DCSM, Vol. VIII. and printed in Bombay.

॥ नीतिसारः ॥

1293. NĪTISĀRA.

Substance—Palm leaf. Size—20″ × 2″. Leaves—60. 6 lines per page and 52—64 letters per line. Script—Malayāḷam. No. of Granthas—1325.

Subject—Same as No. 1285.

Author—Kāmandaka.

Remarks—A leaf at the beginning is missing. Most of the leaves are decayed. The work is printed with the commentary Jayamaṅgalā by Śaṅkarārya as No. 14 in TSS.

॥ नीतिसारः ॥

1294. NĪTISĀRA.

Substance—Palm leaf. Size—10$\frac{1}{3}$″ × 1$\frac{1}{3}$″. Leaves—85. 7 lines per page and 85 letters per line. Script —Malayāḷam. No. of Granthas—1350.

Subject etc.—Same as No. 1293.

॥ नीतिसारः ॥

1295. NĪTISĀRA.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—52. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject etc.—Same as No. 1293.

Remarks—The Ms. is much injured.

॥ नीतिसारः ॥

1296. NĪTISĀRA.

Substance—Palm leaf. Size—5½″ × 1½″. Leaves—69. 11 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject etc.—Same as No. 1293.

Remarks—At the end occur the words: "രാമൻ സ്വഹസ്തലിഖിതം".

॥ नीतिसारः ॥

1297. NĪTISĀRA.

Substance—Palm leaf. Size—11⅓″ × 1½″. Leaves—75. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject etc.—Same as No. 1293.

Remarks—A few leaves in the middle are much injured.

॥ नीतिसारः ॥

1298. NĪTISĀRA.

Substance—Palm leaf. Size—7″×1½″. Leaves—74. 8—10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject etc.—Same as No. 1293.

॥ नीतिसारः ॥

1299. NĪTISĀRA.

Substance—Palm leaf. Size—13½″×2″. Leaves—49. 8—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject etc.—Same as No. 1293.

Remarks—Many leaves in the middle are written in Grantha script. The following sentence occurs after the colophon:

"൯൦൨-ാമാണ്ടു ഇടവവ്യാഴം കക്കടകമാസൊന്നാവിംശ
തിവസെ രവിവാരെ അമ്പകൊട്ടർ കുമാരേണ ലിഖിതം"

॥ नीतिसारः ॥

1300. NĪTISĀRA.

Substance—Palm leaf. Size—16″×2″. Leaves—31. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject etc.—Same as No. 1293.

Remarks—The Ms. contains 16 *Sargas* only.

॥ नीतिसारः ॥

1301. NĪTISĀRA.

Substance—Palm leaf. Size—17½″×2″. Leaves—20. 8 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—660.

Subject etc.—Same as No. 1293.

Remarks—The Ms. abruptly ends on the 22nd verse of the 11th *Sarga*.

॥ नीतिसारः ॥

1302. NĪTISĀRA.

Substance—Palm leaf. Size—13½″×2″. Leaves—10. 11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—385.

Subject etc.—Same as No. 1293.

Remarks—The work commences from the 16th *Sarga* only.

॥ नीतिसारः ॥

1303. NĪTISĀRA.

Substance—Palm leaf. Size—$3\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—10. 10—11 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—70.

Subject etc.—Same as No. 1293.

Remarks—The Ms. contains only the 1st *Sarga*.

॥ नीतिसारसंग्रहः ॥

1304. NĪTISĀRASAṄGRAHA.

Substance—Palm leaf. Size—$6\frac{1}{2}'' \times 2''$. Leaves—41. 6 lines per page and 12—22 letters per line. Script—Malayāḷam. No. of Granthas—250.

Subject—Same as No. 1285.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।
यस्य प्रभावाद् भुवनं शाश्वते पथि तिष्ठति ।
देवः स जयति श्रीमान्दण्डधारो महीपतिः ॥
वंशे विशालवंश्यानामृषीणामिव भूयसाम् ।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥

जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः ।
योऽधीतवान् सुचतुरश्चतुरोऽप्येकवेदवत् ॥
यस्याभिचारवज्रेण वज्रज्वलनतेजसः ।
पपात मूलतः श्रीमान्सुपर्वा नन्दपर्वतः ॥
एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
उद्ध्रे यन्नमस्तस्मै विष्णुगुप्ताय वेधसे ॥

End :

दद्याद्वस्त्वनुरूपं वा हृष्टो योधान्प्रहर्षयेत् ।
पञ्चारत्निधनुस्थाने धन्विनं स्थापयेद् युधि ॥
त्रिगुणेऽश्वे गजरथौ योज्यौ पञ्चसु पञ्चसु ।
शमान्तरस्तु पुरुषस्तुरङ्गस्त्रिशमान्तरम् ॥
कुञ्जरः स्यन्दनश्चैव सूतौ पञ्चशमान्तरौ ।
तथा वा खलु युध्येरन् पत्त्यश्वरथदन्तिनः ॥
यथा भवेदसंबाधो व्यायामविनिवर्तने ।
असंकरेण युध्येरन्संकरस्संकुलावहः ॥
महासंकुलयुद्धे च संश्रयेरन् महागजान् ।

Colophon :

Author :

Remarks—This is an abridgment of the Nītisāra of Kāmandaka.

॥ नीतिसूत्रम् ॥

1305. NĪTISŪTRAM.

Substance—Palm leaf. Size—8″×2″. Leaves—15.
7—8 lines per page and 27—28 letters per line.
Script—Malayāḷam. No. of Granthas—200.

Subject—Same as No. 1285.

Beginning :

हरिः । श्रीगणपतये नमः ।

सुखस्य मूलं धर्मः । धर्मस्य मूलमिन्द्रियजयः । इन्द्रियजयस्य मूलं विनयः । विनयस्य मूलं वृद्धोपसेवा । वृद्धोपसेवाया मूलं विज्ञानम् । विज्ञानेनात्मानं सम्पादयेत् । संपादितात्मा जितात्मा भवति । जितात्मा सर्वार्थैः संयुज्यते । स्वामिसंपत्प्रकृतिसम्पदः करोति । प्रकृतिसंम्पदा ह्यनायकमपि राज्यं नीयते । प्रकृतिकोपः सर्वकोपेभ्यो गरीयान् । अविनीतस्वामिलाभादस्वामिलाभः श्रेयः । सम्पादितात्मानमन्वि ....सहायवान् । नासहायस्य मन्त्रव.... ....निश्चयः । नैकञ्चक्रं परिभ्रमति । सहायकृत्समदुःख-सुखः मानी प्रतिमानिनमात्मनि द्वितीयं मन्त्रिणमुत्पादयेत् । अविनीतं स्नेहमात्रेण न.... ....मन्त्रे कुर्वीत । श्रुतवन्त-मुपधा....शुद्धं मन्त्रिणं कुर्वीत ।

End :

यदकृतन्तदपि प्रच्छन्नमात्मनः आकारसंवरणं देवैरप्यशक्यम् । आकारसंवरणमकारणा वाचो राजपुरुषेभ्यो नित्यं रक्षेत् । दुर्दर्शना हि राजानः प्रजा विनाशयति । न्यायवर्तिनं राजानं स्वमातरमिव

मन्यन्ते प्रजाः। चोरांश्च सततं नाशयेत्। स्वधर्मानुष्ठानादिहैव सुखमवाप्यते। स्वर्गमाप्नोति। अहिंसालक्षणो धर्मः। स्वशरीरमिव परशरीरं मन्येत साधुः। एपातिबालिशः (?) मांसभक्षणमयुक्तं सर्वेषाम्। न संसारवतां भयं ज्ञानवताम्। ज्ञानेन संसारं निवर्तयेत। कर्मारम्भोपायः पुरुषद्रव्यसंपत् देशकालविभागः विनिपातप्रतीघातः कार्यसिद्धिश्च।

श्रीगुरुभ्यो नमः।

Colophon :

Author—Cāṇakya.

Remarks—The Ms. is much damaged.

॥ नीतिसूत्रम् ॥

1306. NĪTISŪTRAM.

Substance—Palm leaf. Size—4″ × 2″. Leaves—23. 8—11 lines per page and 11—15 letters per line. Script—Malayāḷam. No. of Granthas—200.

Subject—Same as No. 1285.

Beginning—Same as No. 1305.

End :

न संसारभयं ज्ञानिनाम्। विज्ञानप्रदीपेन संसारभयं निवर्तयेत्। सर्वमनित्यमध्रुवञ्च। सदेहदेहिनामतिमहती कृमिशकृन्मूत्रभाजनं शरीरम्। पुण्यपापमेव जन्महेतुः। जन्म मरणादपि दुःखम्। तपसा

स्वर्गमाप्नोति। क्षमायुक्तस्य तपो वर्धते । विहितेषु तदन्येषु मनो-वाक्कायकर्मभिः प्रवृत्तौ वा निवृत्तौ वा एकरूपत्वमार्जवम् । अश्वा नागाः स्यन्दनाश्च संघा मन्त्रश्शुद्धो दैवतञ्चानुकूलम्। एतान्याहुः साधनानि स्म राज्ञां तेभ्योऽपीयं बुद्धिरुत्कृष्यते मे ।

इति चाणक्यवाक्यम् ।

बुद्धिरेव जयत्येका पुंसः सर्वार्थसाधनी ।
यद्बलोदेव किं किं न चक्रे चाणक्यभूसुरः ॥

Colophon:

चाणक्यसूत्रं समाप्तम् ।

Author—Same as No. 1305.

Remarks—A few lines in addition to the portion in No. 1305 are quoted at the end.

॥ नीतिसूत्रम् ॥

1307. NĪTISŪTRAM.

Substance—Palm leaf. Size—10″ × 2½″. Leaves—13. 8 lines per page and 27—32 letters per line. Script—Malayāḷam. No. of Granthas—200.

Subject—Same as No. 1285.

Beginning—Same as No. 1305.

End:

मन्युवर्जितं राजानं स्वमातरमिव मन्यन्ते प्रजाः। चोरांश्च कण्टकांश्चैव सततन्नाशयेत् । स्वधर्मानुष्ठानादिहैव सुखमाप्यते सततं

स्वर्गवाप्नोति स्वशरी.....रशरीरं मन्यते साधुः सर्वत्र मान्यं... शयति बालिशः .....रभयं ज्ञानवताम् । एतच्छ्रुत्वा ।

Colophon :

नारायणाय नमः । नीलकण्ठेन लिखितमिदं पुस्तकम् ।

Author—Same as No. 1305.

Remarks—The leaves are much decayed. The scribe's name occurs in the colophon.

॥ नीतिसूत्रम् ॥

1308. NĪTISŪTRAM.

Substance—Palm leaf. Size—$5\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—21. 7—9 lines per page and 17—18 letters per line. Script—Malayāḷam. No. of Granthas—175.

Subject—Same as No. 1285.

Beginning—Same as No. 1305.

End :

आशया...सा जनाः आशा दासी येषां पूजयेत् नित्यं संविभागी स्यात्सद्भिस्सह वासः स्व .....वास.....हृद्गतमाच्छाद्य यो वदति स पिशाचादनन्यः असहायः पन्था(नां?नं) नानुगच्छेत् । सर्वावस्थास्वपि स्वामी न निन्दनीयः स्वाम्यनुग्रहं ? धर्मकृत्यं भृत्यानां यद्यथा स्वामिना विज्ञापितं तथैव चमत्कारेण कुर्यात् शत्रून्न निन्देत्सर्षपमात्रमात्मच्छिद्रं न प्रकाशयेत् । सदसि स्थित्वा किमपि न वदेत् । कर्णेऽनुजीविनामुपदिश्य तैरेव व्यवहारः कर्तव्यः । शत्रोः क्षमा श्लाघनीया । क्षमावानेव जयति लोकम् । क्ष-

मायुक्तास्सर्वं साधयन्ति । आपत्प्रतीकारार्थं धनमिष्यते। धर्मार्थञ्च सहसा सतां प्रियं कर्तव्यं तत्त्वज्ञानेनाशक्तास्सर्वं साधयन्ति सर्वशास्त्रज्ञो अलोका.....ज्ञा मूर्खादनन्यः शास्त्रप्रयोजनं तत्त्वज्ञानं धर्मादपि शास्त्रज्ञानं गरीयान् । आत्मा शास्त्रव्यवहारस्य साक्षी न कूटसाक्षी स्यात्पितृभिस्सह कूटसाक्षी नरके निमज्जति पुण्यपापानाम् ।

Colophon :

Author—Same as No. 1305.

Remarks—Same as No. 1241 E.

॥ नीतिसूत्रम् ॥

1309. NĪTISŪTRAM.

Substance—Palm leaf. Size—15″ × 2¼″. Leaves—8. 8—9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—200.

Subject—Same as No. 1285.

Beginning—Same as No. 1305.

End—Colophon : Same as No. 1306.

Author—Same as No. 1305.

Remarks—The leaves 25—32 are missing. The script is legible.

॥ पञ्चतन्त्रम् ॥

1310. PAÑCATANTRAM.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—97.

7—8 lines per page and 22—27 letters per line.
Script—Malayāḷam. No. of Granthas—1300.

Subject—Same as No. 1285.

Beginning :

श्रीगणपतये अविघ्नमस्तु ।

मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।
चाणक्याय विदुषे नमोऽस्तु नानार्थशास्त्रकर्तृभ्यः ॥

ग्रन्थविस्तारभीरूणां बालानामल्पचेतसाम् ।
बोधाय पञ्चतन्त्रोऽयं मया संक्षिप्य वर्ण्यते ॥

अन्यदीयोऽपि लिखितश्लोकोऽयः प्रक्रमोद्धृतः ।
अल्पत्वाद्ग्रन्थविस्तारदोषस्तेन न जायते ॥

अस्ति हि सकलदेवताधिष्ठानं पाटलीपुरं नाम नगरम् । तत्र सकलगुणोपेतः सुदर्शनो नाम राजासीत् । स चात्मीयपुत्राणामनधीतशास्त्राणाम् अनुष्ठानेनोद्विग्नमनाश्चिन्तयामास ।

कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ।
तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी ॥

कोऽर्थोऽस्ति बहुभिः पुत्रैर्गणनापूरणात्मकैः ।
वरमेकः कुलालम्बी यत्र.....मते कुलम् ॥

End :

मया भिक्षार्थमागतं भिक्षुकत्रयं व्यापाद्य निधित्रयं सम्पाद्यमिति । अथ स भिक्षुकत्रयं दृष्ट्वा लगुडमादाय प्रहर्तुमुद्युक्तः ।

तदाक्रोशं श्रुत्वा सोऽपि नापितो राजपुरुषैर्गृहीतो व्यापादितश्च । अतोऽहं ब्रवीमि कुदृष्टमिति ।

मूढो नष्टमतिश्चैव धनहीनश्च यो नरः ।
निस्रपश्चपलस्रस्तो भस्मन्याहुतयो यथा ॥

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥

Colophon :

समाप्तमसंप्रेक्ष्यकारित्वं नाम पञ्चमतन्त्रम् ।

Author—Viṣṇuśarma.

Remarks—Same as No. 1259.

॥ पञ्चतन्त्रम् ॥

1311. PAÑCATANTRAM.

Substance—Palm leaf. Size—15″ × 2″. Leaves—31.
9—12 lines per page and 50—60 letters per line.
Script—Malayāḷam. No. of Granthas—1300.

Subject—Same as No. 1285.

Beginning etc.—Same as No. 1310.

॥ पञ्चतन्त्रम् ॥

1312. PAÑCATANTRAM.

Substance—Palm leaf. Size—9½″ × 1½″. Leaves—57.
9—10 lines per page and 32—35 letters per line.
Script—Malayāḷam. No. of Granthas—1300.

Subject—Same as No. 1285.

Beginning etc.—Same as No. 1310.

॥ पञ्चतन्त्रम् ॥

1313. PAÑCATANTRAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—55. 9 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject—Same as No. 1285.

Beginning etc.—Same as No. 1310.

Remarks—The following verses occur after the close:

व्यासतुल्योऽपि यो मर्त्यः सर्वशास्त्रार्थपारगः ।
स मुह्यति लिखन् प्रायः किं पुनः स्वल्पधीर्जनः ॥
अनलस्य समिद्धतेजसो वनदाहेषु सखा समीरणः ।
प्रतिहन्ति च दीपिकागतं विपरीता हि कृशस्य बान्धवाः ॥
नानाभेदमनुष्यजन्मनि महावंशे जनिर्दुर्लभा
सा चेदस्ति न वित्तमेतदपि चेद्विद्या न सा यद्यपि ।
आचारोऽपि च सोऽपि चेन्न करुणा सा चेन्न विश्राणनं
तच्चेन्नो सुमुखत्वमेतदखिलं भाग्योदयाल्लभ्यते ॥
एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये
सामान्यास्तु परोपकारनिरताः स्वार्थाविरोधेन ये ।
ते वै मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं के ते न जानीमहे ॥

यदीयमङ्घ्रिं भजते विशुद्धं
मुनीन्द्रचित्तं स्फटिकच्छलेन ।

कुमृत्तिकापत्तनमावसन्तं
समृद्धतेजस्कमजं नमामि ॥
श्रीमदस्मद्गुरुपादपङ्केरुहपरमाणुभ्यो नमः ।

॥ पञ्चतन्त्रम् ॥

1314. PAÑCATANTRAM.

Substance—Palm leaf. Size—9½″ × 1¾″. Leaves—64. 7—11 lines per page and 30—33 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject etc.—Same as No. 1310.

॥ पञ्चतन्त्रम् ॥

1315. PAÑCATANTRAM.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—60. 10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1200.

Subject etc.—Same as No. 1310.

॥ पञ्चतन्त्रम् ॥

1316. PAÑCATANTRAM.

Substance—Palm leaf. Size—9½″ × 1½″. Leaves—54. 8—10 lines per page and 30—34 letters per line. Script—Malayāḷam. No. of Granthas—975, Incomplete.

Subject—Same as No. 1285.

Beginning—Same as No. 1310.

End :

ब्राह्मण्याह —

कुदृष्टिं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।
पुरुषेण न कर्तव्यं नापि तेन यथा कृतम् ॥

ब्राह्मणः—कथमेतत् ।

सात्रवीत्—अस्ति कस्मिन्नगरे कश्चिद्वणिक्सुतः । स जातमात्र एव संस्थितसकलस्वजनोऽपि कुलवृद्धया दास्या कथं कथं संवर्द्धितः । स कदाचिद्दारिद्र्यदुःखितः खिन्नहृदयो दीर्घं निश्वस्य निशि प्रसुप्तः निशावसाने स्वप्नं दृष्टवान् ।

Remarks—The Ms. contains four Tantras and a fragment of the 5th.

॥ पञ्चतन्त्रम् ॥

1317. PAÑCATANTRAM.

Substance—Palm leaf. Size—6½″ × 1½″. Leaves—36 6—8 lines per page and 16—20 letters per line Script—Malayāḷam. No. of Granthas—500. Incomplete.

Subject—Same as No. 1285.

Beginning—Same as No. 1310.

End :

अथ सुहृल्लाभो नाम द्वितीयतन्त्रमारभ्यते ।

अत्रायमाद्यश्लोकः—

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः ।
साधयन्त्याशु कर्माणि काककूर्ममृगा(खगाःखुवत्) ॥

पुत्राः—कथमेतत् । सोऽब्रवीत् ।

महिळारूप्यनगरे शाल्मलीवृक्षो महानस्ति । तत्र लघुपतनको
ना ... ...

Colophon :

इति मित्रभेदः ।

Remarks—The Ms. contains the opening Tantra and a portion of the next.

॥ पञ्चतन्त्रसंग्रहः ॥

1318. PAÑCATANTRASAṄGRAHA.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—22. 9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—300. Complete.

Subject—Same as No. 1285.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

जयत्येकरदं धाम दधत्करिकरेणुताम् ।
अर्धनारीश्वरविभुस्पर्धयेव निजे मुखे ॥

शङ्खकुन्देन्दुधवलामिन्दुरेखावतंसकाम् ।
पुण्डरीकासनासीनां वन्दे वाङ्मयसुन्दरीम् ॥

व्यासाय परमेशाय (सर्व)ज्ञाय महात्मने ।
नमामि प्रभवे तुभ्यं पराशरसुताय च ॥
ग्रन्थविस्तारभीरूणां बालानामल्पचेतसाम् ।
बोधाय पञ्चतन्त्रोऽयं मया संक्षिप्य वर्ण्यते ॥
अन्यदीयोऽपि लिखितः श्लोको यः प्रक्रमोद्धृतः ।
अल्पत्वाद् ग्रन्थविस्तारदोषस्तेन न जायते ॥
कोऽर्थः पुत्रेण जातेन यो विद्वान् न च धार्मिकः ।
तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी ॥
कोऽर्थोऽस्ति बहुभिः पुत्रैर्गणनापूरणात्मकैः ।
वरमेकः कुलालम्बी यत्र विश्रमते कुलम् ॥

वरं गर्भस्रावो वरमृतुषु नैवाभिगमनं
वरं जातः प्रेतो वरमपि च कन्यैव जनिता ।
वरं वन्ध्या भार्या वरमगृहवासे निवसनं
न चेद्विद्वान् रूपद्रविणबलयुक्तोऽपि तनयः ॥

End :

प्राप्तमर्थन्तु यो मोहात् सन्ततं प्रतिमुञ्चति ।
स तेन वञ्चितो मूढो जलजः कपिना यथा ॥
प्रयोजनवशाल्लोके प्रीतिस्समनुवर्तते ।
त्वं तु वानरशार्दूल निष्प्रयोजनवत्सलः ।
लोकारातिभयत्राणं प्रीतिविस्रम्भभाजनम् ।
केनेदं सृष्टममृतं मित्रमित्यक्षरद्वयम् ।
उपलनिकषं स्वर्णं पुरुषो व्यवहारनिकषकः साधुः ।
निकषो गोर्वृषभः स्यात् स्त्रीणान्तु न विद्यते निकषः ॥

वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।

अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनम् ॥

धर्ममर्थञ्च कामञ्च त्रितयं योऽभिवाञ्छति ।
न पश्येद् रिक्तपाणिः सन् स्त्रीं नृपं ब्राह्मणान् शिशून् ।
आगतञ्च गतं चैव यो गत्वा पुनरागतम् ।
एतं तन्त्रमविज्ञाय वंशः क्रोधस्य गच्छति ।
पश्चाद्भवति सन्तप्तो ब्राह्मणो नकुलादिव ।
अनागतवति चिन्तां यो नरः कर्तुमिच्छति ।
धूलीधूसरितः शेते सोमशर्मपिता यथा ॥

Colophon :

इति पञ्चतन्त्रप्रकारेण असंप्रेक्ष्यकारित्वं समाप्तम् ।

Author :

Remarks—This is a compendium of Pañcatantra.

॥ छन्दः ॥

॥ वृत्तप्रकाशिका (वृत्तरत्नाकरव्याख्या) ॥

1319. VṚTTAPRAKĀŚIKĀ.

Commentary on Vṛttaratnākara.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 2''$. Leaves—22. 14 lines per page and 34 letters per line. Script—Grantha. No. of Granthas—650.

Subject—Prosody.

Beginning :

गणपतये नमः ।

भजमानजनाज्ञानपिधानविहितव्रतम् ।
नमामि दक्षिणामूर्तिं महामोहाप(नु)त्तये ॥
यं प्राहुरखिलानर्थपञ्जरस्य विदारणम् ।
वन्दे तं पञ्जराकारं कुञ्जराननमञ्जसा ।
नरीनरीति या नित्यं मुखरङ्गे सरस्वती ॥
चरीकरीतु मेऽभीष्टं भारती बोधरूपिणी ।
मदीयमानसाम्भोजविकासनविचक्षणम् ॥
उपासे सततं भक्त्या भारतीतीर्थभास्करम् ।
क्रियते कृष्णसारेण सम्प्रदायानुसारतः ।
वृत्तरत्नाकरस्येयं व्याख्या वृत्तप्रकाशिका ॥

वृत्तरत्नाकराख्यं वृत्तादिविभवपरिज्ञानासाधारणकारणं छन्दश्शास्त्रं चिकीर्षुराचार्यश्चिकीर्षितस्य शास्त्रस्याविघ्नपरिसमाप्तये शिष्टाचारपरिपालनाय विशिष्टदेवताप्रणतिं मङ्गलाचरणपूर्वकमुद्देश्यं प्रतिजानीते--सुखेत्यादिभिस्त्रिभिः श्लोकैः ।

End :

प्रतता विस्तीर्णा मतिर्बुद्धिर्येषां ते तथोक्तास्तैः पण्डितैरित्यर्थः । किंविशिष्टं तत् प्रथमाङ्घ्रिकृतयति प्रथमाङ्घ्रौ प्रथमपादे कृता यतिर्यस्य तत् तथोक्तम् । प्रथमपादावसाने यत्या भवितव्यमित्यर्थः । अन्यत्र न विधिर्न प्रतिषेध इत्यर्थः । अस्मिन्नेवोपस्थितप्रचुपिते (?) तृतीय .....के पादे । एवमन्यत्र .....तगणजगणरगणाः स्युः । प्रथमेऽक्षरे विरतिश्च ....रार्षभं वदन्ति । तच्छुद्धविराट्पु ....

Colophon :

इति वृत्तरत्नाकरव्याख्यायां वृत्तप्रकाशिकायां जात्यध्यायो द्वितीयः ।

इति समवृत्ताध्यायस्तृतीयः ।
उद्गताप्रकरणम् ।

Author—Kṛṣṇasāra.

Remarks—The Ms. comprises five chapters only.

॥ वृत्तरत्नाकरः ॥

1320. VṚTTAKATNĀKARA.

Substance—Palm leaf. Size—8″ × 2″. Leaves—7. 12—14 lines per page and 30 letters per line. Script—Grantha. No. of Granthas — 170. Complete.

Subject—Same as No. 1319.

Beginning :

गणपतये नमः । अविघ्नमस्तु ।
सुखसन्तानसिद्ध्यर्थं (नत्वा ?नौमि) ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शङ्करं लोकशङ्करम् ॥
वेदशास्त्रार्थतत्वज्ञः पौव्वेकोऽभूद् द्विजोत्तमः ।
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥
तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां सुखबुद्धये ॥
पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णप्रभेदेन छन्दस्तदपि कथ्यते ॥

End :

प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया ।
संख्यानमध्वयोगश्च षडेते प्रत्यया मताः ॥

वंशेऽभूत्काश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता
विप्रः पौण्ड्येकनामा विमलतरमतिश्शैवतत्त्वावबोधी ।
केदारस्तस्य पुत्राश्शिवचरणयुगाराधनैकाग्रचित्त-
श्छन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥

पादे सर्वगुरावाद्यान् लघूकृत्य गुरून् क्रमात् ।
अर्वाचीनान् गुरून् कुर्यात् सर्वानेव लघून् मुहुः ॥
एवं लघुषु सर्वेषु प्रस्तारः प्रसमाप्यते ।
अत्र वृत्तान्यतीतानि स्वधिया धारयेत्सुधीः ॥
द्विचतुर्द्वीपभूपाद्याः क्रमेण द्विगुणोत्तराः ।
उक्तात्युक्तादिषु ज्ञेया वृत्तसंख्या विपश्चिता ॥

Colophon :

इति वृत्तरत्नाकरे षष्ठोऽध्यायः ।

Author—Kedārabhaṭṭa.

Remarks—The following two verses occur after the end :

धात्री मास्त्रिगुरुः श्रियं मुखगुरुर्भः कान्तिमत्तां शशी
जोऽन्तर्गुस्सविता रुजं चरमगुः सो विप्रवासं मरुत् ।
लैनोद्यैर्न श्वित् जीवितं (?)मुखलघुर्यस्तोयमृद्धिं शिखी
रोऽन्तर्ल्लो मरणं खमन्यलघुतश्शून्यं विधत्ते फलम् ॥

मो भूमिस्त्रिगुरुः श्रियं वितनुते भः पूर्वगुश्चन्द्रमाः
कीर्तिं योऽभ्युदयं यः प्रथमलो न स्वश्चिरायुस्त्रिलः ।

वायुस्सोऽन्तगुरुर्विदेशगमनं शून्यं नभस्तोऽन्त्यलो
रोर्निर्मध्यमधुर्धृतिं दिनमणिर्मध्ये गुरुर्जो रुजम् ॥

हरिः । श्रीगुरुभ्यो नमः ।

॥ वृत्तरत्नाकरः ॥

1321. VṚTTARATNĀKARA.

Substance—Palm leaf. Size—8″ × 1″. Leaves—14. 6 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—170. Complete.

Subject—Same as No. 1319.

Beginning etc.—Same as No. 1320.

Remarks—The three ślokas occurring after the stanza beginning with "वंशेऽभूत् काश्यपस्य" in No. 1320 are missing herein.

॥ वृत्तरत्नाकरः ॥

1322. VṚTTARATNĀKARA.

Substance—Palm leaf. Size—9″ × 2″. Leaves—13. 8 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—170. Complete.

Subject—Same as No. 1319.

Beginning etc.—Same as No. 1320.

Remarks—The Ms. is much worn out. Two or three

leaves in the middle are much injured. The following lines occur after the close :

नीलकण्ठनाम्ना लिखितमिदं पुस्तकम् ।

एकक्रियानुषङ्गेण पद्यानां घटनां विदुः ।

कुलकं तत् त्रिधान्तादिमध्यगैः स्यात् क्रियापदैः ॥

अनुस्वारविसर्जनीयजिह्वामूलीयोपध्मनीयपरः युक्तहल्परः केवलहल्परो वा पादान्तः दीर्घः प्लुतः नव गुरवः । उदाहरणम्—केवाछि तत् पादान्ते?

कल्याणमावहतु वः शिवयो शरीरम् । इति ।

.....इति किराते । न इति लघुः । उद्भटका.....

॥ वृत्तरत्नाकरः (मणिमञ्जरीसहितः) ॥

1323. VṚTTARATNĀKARA
with Maṇimañjarī.

Substance—Palm leaf. Size—13½″ × 2″. Leaves—57. 10—11 lines per page and 44—48 letters per line. Script — Grantha. No. of Granthas — 1725. Complete.

Subject—Same as No. 1319.

Beginning :

वेदार्थशैवशास्त्रज्ञः पञ्चेकोऽभूद् द्विजोत्तमः ।

तस्य पुत्रोऽस्ति केदारः शिवपादार्चनेरतः ॥

स्पष्टम् ।

तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ।

वृत्तरत्नाकरं नाम बालानां सुखसिद्धये ॥

तेन केदारेण । इदं छन्दः । ननु छन्दांसि तावदुक्तादिभेदेन षड्विंशतिर्भवन्ति । तत् कथमेकवचननिर्देश इति चेत् । न । जात्येकवचनमिदम् । अथवा छन्दश्शब्देन शास्त्रं लक्ष्यते । इदं छन्दश्शास्त्रमित्यर्थः । लक्ष्यलक्षणसंयुतं वृत्तरत्नाकरं नामेत्यन्वयः ।

End :

रतयना गणास्तद्वल्लघवः । यथा मध्यलघू रगणः अन्तलघुस्तगणः । आदिलघुर्यगणः । सर्वलघुर्नगणः । एतेषां यथासङ्ख्यं पूर्ववद्ह्वयम्बराम्भोदिवो देवाः । यथा रगणस्याग्निः । तगणस्याकाशः । यगणस्य जलम् । नगणस्य स्वर्गः । तदेवामृतिशून्यतेति वृत्तादौ रगणे प्रयुक्ते मृतिं तगणे शून्यतां यगणे चेत्ताम समृद्धिं ... गणे चायूंषि तन्वत इति ॥

Colophon :

इति नारायणभट्टपुरोहितविरचितायां मणिमञ्जर्यभिधायां वृत्तरत्नाकरव्याख्यायां षष्ठोऽध्यायः ।

Author—Nārāyaṇabhaṭṭapurohita, Son of Nrsimhayajvan.

Remarks — The Ms. is in good condition. It is identical with No. 1793, DCSM. Vol. III. which furnishes the title, Maṇimañjarī. The following verse occurring in the beginning shows that the author was the son of Nṛsimhayajvan :

"नृसिंहयज्वनः पुत्रो नारायणपुरोहितः ।
वृत्तरत्नाकरव्याख्यां व्याकरोति यथामति ॥"

॥ अलङ्कारः ॥

॥ अलङ्कारकौस्तुभः ॥

1324. ALAṄKĀRAKAUSTUBHA.

Substance—Palm leaf. Size—15½″ × 2″. Leaves—94. 7—8 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—1400.

Subject—Definition of Alaṅkāras with illustrations.

Beginning:

शुभमस्तु । हरिः । ओम् ।

यन्नाभीजलजोदितः समजनि स्रष्टाखिलानां ... ...

... ... ।

.... भवनेन्दिरा परिणता विश्वाधिकैश्वर्यदा-

... ... ॥

... ...मं प्रारिप्सितग्रन्थनिर्विघ्नपरिस

माप्तये मङ्ग ... ...

... ...यत्करोपीत्यादिभगवद्वचनेन तं ग्र.... ....

... ...नाभाय समर्पयति ।

श्रीकञ्जनाभकरु ... ...

... ... र्णकान्तम् । तद् भूरिभासुरगभीरगु...

... ... न यद्वचश्चित्रपदमित्यादि-

श्रीमद्भागवत... ... ...

... ...मं गुणग्रथनमन्तरेण क(ण्ठे?र्ण)नार्यते त-

.... द्व्यानया ...रयन्ती-

त्याह ।

End :

निरतिशयवितरणोत्कर्षपर्यवसायिनो हेत्वलङ्कारस्यात्यद्भुतात-
थ्यौदार्यवर्णनात्मिकयात्युक्त्या सहैकवाचकानुप्रवेशसङ्करः ।
तन्मूलकस्याप्रस्तुतप्रशंसालङ्कारस्य प्रस्तुताङ्कुरस्य वा विद्वत्सम्प-
त्समृद्धिवर्णनात्मकोदात्तालङ्कारेण सह एकवाचकानुप्रवेशसङ्करः ।
वाचकशब्दस्य प्रतिपादकमात्रपरतया व्यञ्जकसाधारण्यात् एषां
च त्रयाणामेकवाचकानुप्रवेशसङ्कराणां समप्राधान्यसङ्करः । न
ह्येतेषां परस्परमन्यत्र वाङ्गत्वमस्ति ए... ... ...
भावसन्देहैकवाचकानुप्रवेशसमप्राधान्यसङ्कराणां चतुर्णां यथा-
योग्यं सङ्करः । एवमन्यत्राप्युदाहरणान्तराण्यूह्यानि ।

राराजन्मधुराधरां प्रविलसच्चोळां कनत्कुन्तलां
काश्मीराङ्गविभूषणातिललितां काञ्चीगुणालंकृताम् ।
क्षोणीं श्रीरघुरामवर्म्मनिरुपमां रत्नाकरोर्मिका-
जालान्तामनुरञ्जयत्वनुदिनं श्रीरामवर्मप्रभुः ॥

श्रीमद्वह्निकुलाम्बुधिर्विजयतामाचन्द्रतारं बुधा-
धारा वह्निधरा श्रियानुपमया देदीप्यतामन्वहम् ।
सत्कल्याणकवेः कृतिर्विततनुतामानन्दमन्तस्सतां
चित्ते खेलतु रामवर्मनृपतेः श्रीपद्मनाभः सदा ॥

Colophon :

इति श्रीमत्पेरूरुकुलजलधिचन्द्रश्रीरामचन्द्रचरणारविन्दमिलि-
न्दायमानमानसगोपालविपश्चित्पौत्रेण सुब्रह्मण्यसुधीमणि-
पुत्रेण कल्याणसुब्रह्मण्यसूरिणा विरचिते अलंकारकौस्तुभे

संसृष्टिप्रकरणम् । शुभमस्तु । श्रीगुरुभ्योनमः । श्रीगोपीजनवल्लभाय नमः । श्रीसरस्वत्यै नमः ॥

Author—Kalyāṇasubrahmaṇyasūri, son of Subrahmaṇyasudhimaṇi and grandson of Gopālavipaścit.

Remarks—The leaves are much decayed. The first 42 leaves are much injured. Most of the illustrative verses are composed in the glorification of Śrī Rāmavarmā and Anantapadmanābha, in imitation of the Pratāparudrīya. This work is referred to as No. 31 in Mr. Śeṣagiri Śāstrī's Report No. 2. wherein he observes :—"The work was composed in 1798 A. D. or a few years later, as the king of Travancore of the above name ruled in 1798—1810 A. D." For further information refer to page 80 of the report.

॥ अलङ्कारसर्वस्वविवृतिः ॥

1325. ALAṄKĀRASARVASVAVIVṚTI.

Substance—Palm leaf. Size—15×2″. Leaves—84. 7—9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—2100.

Subject—Explication of Alaṅkārasarvasva.

Author—Samudrabandha.

Remarks—The work has been published as No. 40 in TSS. One leaf at the close contains copy of a horoscope and another a few isolated verses from the Mahābhārata.

॥ अलङ्कारसर्वस्वविवृतिः ॥

1326. ALAṄKĀRASARVASVAVIVṚTI.

Substance—Palm leaf. Size—8½" × 1¾". Leaves—6. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Same as No. 1325.

Beginning :

... ... भेदतुला ... साधर्म्यमुपमोच्यते ।
धर्मविच्छित्तिवशतस्त्रैविध्यमु .... ति सा ॥
वि ....धर्मसंसर्ग .... गताद .... यततस्तदा ।
या भ ....थम् उप .... रमय .... ॥

End :

चतुष्टयमिदं ज्ञेयं सम्भूयाक्षे .... ।
(अ)नुक्तस्य निषेधस्य विध्याभासेन सूचनम् ॥
आक्षेपो वक्ष्यमाणैकविषयस्त्वेष सम्मतः ।
....धस्तु तदाभासो जात्याद्यर्थसमाश्रयः ॥
तद्वैचित्र्यादृशविधो विषयैक्ये व्यवस्थितः ।
प्रासि.... .... रणाभा .... र्योत्पत्तिविभावना ॥

कार्योत्पादनवैशिष्ट्याद् द्विधा चे... मित्तः ।
कार्या ... स्य यदा भावाभावौ वक्तुमपेक्षितौ ॥
विभावनाविशेषोक्त्योस्तदा सन्देहसङ्करः ।
यः कौमारहरेत्यादौ विशेषोक्तिर्भवेत् ... ... ॥
.... र्पशेषः । शिव ....

Colophon :

Author—Śrīvidyācakravartin.

"He appears to be a South Indian writer, belonging to the Sampradāya sect. The reference (to this commentary Sañjīvini) by Mallināṭha should place him chronologically earlier than the end of the 14th century." (Vide p. 201, HSP, by Dr. S. K. De, Vol. I).

Remarks—The work is composed in anuṣṭup metre. The introductory portion is not discernible from this decayed Ms. It is identical with No. 12799, DCSM. Vol. XXII.

॥ अलङ्कारसूत्रं (सवृत्तिकम्) ॥

1327 A. ALAṄKĀRASŪTRAM with Vṛtti.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—$21\frac{1}{2}$. 14—16 lines per page and 75 letters per line. Script—Grantha. No. of Granthas—1500.

Subject—Same as No. 1325.

Author—Mańkhuka.

Remarks—The opening Fol. is missing and the next is numbered 712. Fol. 732 discloses the beginning of Kāvyaprakāśa. The work has been published with a commentary, as No. 40 in TSS. The names of certain Alańkāras are thus noted after the end :

पुनरुक्तवदाभासः प्रासगच्छेकवृत्तिगः ।
यमकं च तथा लाटानुप्रासश्चित्रमेव च ॥
उपमानन्वयस्त(द्य?द्व)दुपमेयोपमापि च ।
स्मरणं रूपकं चापि परिणामस्तथा परः ॥
ससन्देहभ्रान्तिमन्तावुल्लेखोऽपह्नुतिस्तथा ।
उत्प्रेक्षातिशयोक्तिश्च तुल्ययोगोऽथ दीपकम् ॥
प्रतिवस्तूपमा साकं दृष्टान्तेन निदर्शना ।
व्यतिरेकस्सहोक्तिश्च विनोक्तिश्च यथाभिधा ॥
समासोक्तिः परिकरः श्लेषोऽप्यप्रस्तुतस्तुतिः ।
भवेदर्थान्तरन्यासः पर्यायोक्तेन सङ्गतः ॥
व्याजस्तुतिरथाक्षेपो विरोधश्च विभावना ।
विशेषातिशयोक्तीचासङ्गतिर्विषमं समम् ॥
विचित्रेणाधिकं साध्यमन्योन्यं सविशेषकम् ।
व्याघातः कारणानाञ्च मालैकावलिसारकौ ॥
काव्यलिङ्गं सानुमानं यथासंख्यं तथैव च ।
पर्यायः परिवृत्तिश्च परिसंख्या ततः परम् ॥
सहार्थापत्त्या विकल्पसमुच्चयसमाधयः ।
प्रत्यनीकं प्रतीपञ्च मीलितेन सहापरम् ॥

सामान्यं तद्गुणश्चैवातद्गुणेन सहोत्तरम् ।
सूक्ष्मं व्याजोक्तिवक्रोक्ती स्वभावोक्तिश्च भाविकम् ॥
उदात्तं रसवत्प्रेय ऊर्जस्वी ससमाहितम् ।
संसृष्टिस्सङ्करश्चेति प्रोक्तालङ्कारसन्ततिः ।
समाप्तमलङ्कारसर्वस्वम् ।

॥ काव्यप्रकाशः ॥

1327 B. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—$32\frac{1}{2}$. 11—16 lines per page and 68 letters per line. Script—Grantha. No. of Granthas—1900. Incomplete.

Subject—Same as No. 1324.

Author—Mammaṭabhaṭṭa.

Remarks—The text alone is extant in the Ms. It has been published in two parts with a couple of commentaries as Nos. 88 and 100 in TSS. The figure "समासोक्ति" is described with illustrations at the end. The leaves are partly damaged.

॥ अलङ्कारसूत्रं (सवृत्तिकम्) ॥

1328. ALAṄKĀRASŪTRAM with Vṛtti.

Substance—Palm leaf. Size—$8'' \times 1\frac{1}{4}''$. Leaves—

101. 7—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1500. Complete.

Subject etc.—Same as No. 1327 A.

॥ अलङ्कारसूत्रं (सवृत्तिकम्) ॥

1329. ALAṄKĀRASŪTRAM with Vṛtti.

Substance—Palm leaf. Size—14½″ × 1¾″. Leaves—55. 9 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—1500. Complete.

Subject—Same as No. 1325.

Author etc.—Same as No. 1325 A.

॥ एकावली ॥

1330. EKĀVALĪ.

Substance—Palm leaf. Size—7¼″ × 2″. Leaves—157. 8—9 lines per page and 25—28 letters per line. Script—Malayāḷam. No. of Granthas—2105. Complete.

Subject:—Explication of the principles of poetics.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रालेयाचलकन्यकाकुचतटीपत्रावलीशिल्पिनः
प्रेङ्खत्फालविलोचनानलशिखानिष्पीतचेतोभुवः ।

देवस्येन्दुविभूषणस्य रुचिरं पादारविन्दद्वयं
युष्मान् पातु सुरासुरेश्वरशिरोरत्नांशुकिञ्जल्कितम् ॥

ननु नमस्कारात्मकं यत् कर्म तत् किं शास्त्रस्याङ्गमिति प्रथमत एव क्रियते प्रधानमिति वा। अङ्गतयाङ्गीक्रियमाणेऽपि सन्निपत्योपकारत्वेनेदमभिहितम् आरादुपकारकत्वेन वा । नादिमः पक्षः द्वाराभावात्। शास्त्रप्रतिबन्धकदुरितोच्छेद एवास्य द्वारमिति चेन्न । उच्छेद्यस्य सन्देहास्पदत्वे उच्छेदकानुष्ठानाभावप्रसङ्गात् ।

End :

चिन्तामणिरित्यनेन सह नरसिंहदेवस्यैकतयाध्यवसितत्वादतिशयोक्तिरित्यनयोरन्यतरनिश्चयाभावात्सन्देहेन सङ्करः ।

प्रतिभटकान्ताकुचतटमकरीलुण्टाकचापटङ्कारः ।

वीरनृसिंह इवादौ धीरनृसिंहश्चिरं जयति ।

अत्र लाटानुप्रासेन सहान्वयस्य एकवाचकानुप्रवेशेन सङ्करः ।

Colophon :

इति श्रीमतो महामाहेश्वरस्य कवेर्विद्याधरस्य कृतावेकावलीनाम्न्यलङ्कारशास्त्रेऽर्थालङ्कारनिरूपणं नामाष्टम उन्मेषः ।

Author—Vidyādharācaryā. His date is assigned to a period between the first quarter of the 13th and that of the 14th century. (Vide p. 227. HSP. by Dr. S. K. De. Vol. I.)

Remarks—The work has been published in the Bombay Sanskrit Series. The following additional verses are quoted after the close :

एनामेकावलीमेव कण्ठे धत्त कवीश्वराः ।
अः किमन्यैरलङ्कारैरसारैर्भारदायिभिः ॥
उपमा सोपमेयोपमा स्यात् तद्वदनन्वयः ।
स्मरणं रूपकं चापि परिणामस्तथा मतः ॥
सन्देहो भ्रान्तिमांस्तद्वदुल्लेखोऽपह्नुतिस्तथा ।
उत्प्रेक्षातिशयोक्ती च तुल्ययोगित्वदीपके ॥
प्रतिवस्तूपमा चैव दृष्टान्तश्च निदर्शना ।
व्यतिरेकः सहोक्तिश्च विनोक्तिश्च तथा स्मृता ॥
समासोक्तिः परिकरश्लेषौ परिकराङ्कुरः ।
अप्रस्तुतप्रशंसार्थान्तरन्यासस्तथा मतः ॥
पर्यायोक्तं तथा चैव व्याजस्तुतिरपि स्मृता ।
आक्षेपश्च मतोऽविद्धव्याभासो विरोधकः ॥
विभावना विशेषोक्त्यतिशयोक्ती तथा स्मृते ।
असङ्गतिश्च विषमं समं चैव विचित्रकम् ॥
अधिकं तद्वदन्योन्यं विशेषोऽपि तथा मतः ।
व्याघातस्तावदपरस्तथा .... ॥

॥ काविकल्पलता ॥

1331. KAVIKALPALATĀ.

Substance—Palm leaf. Size—10″ × 2″. Leaves—74. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—1250.

Subject—Elucidation of the principles of dramatic art and rhetoric.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गङ्गावारिभिरुक्षिताः फणिफणैरुत्पल्लवास्तच्छिरो-
रत्नैः कोरकितास्सितांशुकलया स्मेरैकपुष्पश्रियः ।
आनन्दाश्रुपरिप्लुताक्षिहुतभुग्धूमैर्मिलद्दोहदा
नाल्पं कल्पलता फलं ददतु वोऽभीष्टं जटा धूर्जटेः ॥

मालवेन्द्रमहामान्यः श्रीमद्दाहटनन्दनः ।
देवेश्वरः प्रतनुते कविकल्पलतामिमाम् ॥

प्रतिभाभावितात्मानः कवित्वं के न कुर्वते ।
अन्यत्र कविताधानकुशला विरलाः पुनः ॥

यदन्यैर्वर्त्म न क्षुण्णं तत्र सञ्चरतो मम ।
पदे पदे प्रस्खलतः सन्तस्सन्त्ववलम्बनम् ॥

कविशिक्षाशतं वीक्ष्य कवीन्द्रानुपजीव्य च ।
निबद्धेयं मया धीरास्त्वरितश्लोकसिद्धये ॥

सुवृत्तरम्यस्तवका सदालिपरिशीलिता ।
कविकल्पलता चेयममला परिशील्यताम् ॥

End :

स्वर्धेनुदुग्धसवयांसि वचांसि वाणी-
मञ्जीरमञ्जुलनिदानसहोदराणि ।
एतां निषेव्य कवयः कवितामृतानि
विद्वत्सभासु सविलासमुदीरयध्वम् ॥

मदकलकलकण्ठीकेलिवादानुवादाः
परिणतसहकारस्वादसुस्वादभाजः ।
अभिनवमधुधारावन्धवः काव्यबन्धा
विधुतविधुरुचोऽस्यास्सेवयाविर्भवन्ति ॥

सर्वं विनश्यति विहाय कवित्वमेकं
कायेन सङ्क्रमति कस्य हि न प्रसिद्धः ।
एतद् विमृश्य कविकल्पलताशु काव्य-
सम्पत्तये सुमतिभिः सततं निषेव्या ॥

आविष्कृता वसुमतीसुमतीश्वरेण
देवेश्वरेण कविना कविनामकेन ।
वाच्यज्ञमानसमुदे समुदेतु भूमा-
वाकल्पमेव कविकल्पलतावतारः ॥

Colophon:

इति मालवेन्द्रमहामात्यस्य श्रीमद्वाहटनन्दनस्य देवेश्वरस्य कृतौ कविकल्पलतायां चतुर्थस्तबके समस्यापूरणं नाम सप्तमं कुसुमम् ।

श्रीगुरुभ्यो नमः ।

शुभम् ।

117ാമാണ്ടുകുംഭമാസം 10ാനു-എഴുതിതീൎന്നു.

Author—Deveśvara, son of Vāhaṭa, the prime minister to the king of Mālava. His date may be fixed between the middle of the 13th centuary and that of the 14th. (Vide p. 213. HSP. Vol. I.)

Remarks—The first Fol. furnishes the table of contents of this work.

॥ कविकल्पलता ॥

1332. KAVIKALPALATĀ.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—13,

9—11 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—325.

Subject—Same as No. 1331.

Beginning :

....

जम्बूतरुप्रसवलग्नमधुव्रतेषु ।
एते च चञ्चुपुटकेषु विशन्ति तेषां
तां तां पलाशकुसुमावलिमाकलय्य ॥
....कार्यप्रवृत्तौ साफल्यं जायते क्वचित् ।
तव यथा (?)
विधुविधुमणिसौधप्राङ्गणे चन्द्रबिम्ब-
प्रतिकृतिमनुकूलत्कैरवभ्रान्तिभाजः ।
असकृदमृताबिन्दुस्पन्दमानेन भृङ्गैः
प्रसृमरमकरन्दास्वादसौख्यं लभन्ते ॥
इति चतुर्थस्तवके रूपकादिकं नाम पञ्चमं कुसुमम् ।

End etc.—Same as No. 1331.

Remarks—The Ms. contains the whole of the fourth Stabaka. It is identical with No. 32 referred to in Mr. Śeṣagiri's report on Sanskrit and Tamil Manuscripts, No. 2.

॥ काव्यदर्पणः ॥

1333. KĀVYADARPAṆA.

Substance—Palm leaf. Size—18½″ × 2″. Leaves—176. 10 lines per page and 46 letters per line. Script—Grantha. No. of Granthas—7000.

Subject—Same as No. 1324.

Beginning :

श्रीगुरुभ्यो नमः ।

भव्यारम्भाय वो भूयादव्याजकरुणानिधिः ।
सव्यार्द्रालोकने नम्रा दिव्या या कापि देवता ॥

काव्यदर्पणाख्यग्रन्थमारभमाणो ग्रन्थकारः विघ्नविघाताय स्वेष्टदेवतां स्तुवन्नभिधेयमप्यर्थादभिधत्ते—

नियत्यविषयां ह्लादमयीं नवरसोज्ज्वलाम् ।
कृतिं स्वतन्त्रां कुर्वाणा कवेर्जयति भारती ॥

End :

श्लोकैः स्ववंशसंक्षेपं कविर्यत्र प्रशंसति ।
मुख्यार्थस्यावतारय भवेद्यत्र कथान्तरम् ॥
परिच्छेदो न यत्र स्याद् भवेच्चालम्भकं क्वचित् ।
सा कथा नाम तद् गद्यैर्निबध्नीयाच्चतुष्पदाम् ॥

इत्युक्तलक्षणायां बृहत्कथादिरूपायां कथायां शाकुन्तलादिनाटक आदिपदाद्भाणप्रहसनादौ च रौद्रेऽपि रसे व्यङ्ग्येनात्यन्तमुद्धता रचनादयो भवन्ति । एवं चम्पूप्रबन्धादावपि वक्त्राद्यनुसारेण औचित्यमूह्यम् इति दिक् ।

Colophon :

इति श्रीराजचूडामणिदीक्षितस्य कृतिषु काव्यदर्पणे अष्टमोल्लासः ।

श्रीचरणारविन्दाभ्यां नमः । शुभमस्तु । अविघ्नमस्तु ।
श्रीपद्मनाभोऽवतु दैवतं नः ।
श्रीगोमतीविजयतां कुलदैवतं नः ।
श्रीरामोऽवतु ।

Author—Rājacūḍāmaṇidīkṣita, son of Satyamaṅgala Ratnakheṭa Śrīnivāsadīkṣita and Kāmākṣī and a disciple of Ardhanārīśvara Dīkṣita. (Vide p. 308 HSP. Vol. I.)

Remarks—The work comprises the first 8 Ullāsas. It is identical with No. 12809 DCSM. Vol. XXII, the concluding portion of which contains the names of the other works ascribed to the author.

॥ काव्यदर्पणः ॥

1334. KĀVYADARPAṆA.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—160. 7—8 lines per page and 52—56 letters per line. Script—Malayāḷam. No. of Granthas—4100.

Subject—Same as No. 1324.

Beginning:

... ... नैयायिकादयो वाक्यार्थोऽपि शक्य एवेत्यन्विताभिधानवादिनः प्राभाकराः वाक्यार्थो लक्ष्य इति भट्टा वेदान्तिनश्चाहुः। वस्तुतस्तु वाक्यार्थो न शक्यो नापि लक्ष्य इति पञ्चमे वक्ष्यते। नचैवं विभागन्यूनतेति वाच्यं, शक्यपदेन वृत्त्यन्तरं विना शक्तिप्रयुक्तोपस्थितिविषयत्वस्य विवक्षितत्वादिति दिक्।

End:

लक्षणीयार्थस्य नानात्वेऽपि मुख्यार्थो नियतसंबन्ध्येव प्रतीयते। न त्वनियतसंबन्ध्यपि। प्रतीयमानस्तु नियतसंबन्धोऽनियतसंबन्धश्च प्रकरणादिविशेषवशेन द्योत्यत इति व्यङ्ग्यस्य सर्वस्य न लक्ष्यता। यद्यपि चाविवक्षितवा.... ....

Colophon:

इति राजचूडामणिदीक्षितस्य कृतिषु काव्यदर्पणे तृतीयोल्लासः।

Author—Same as No. 1333.

Remarks—The opening 13 leaves are missing. The work extends up to a fragment of the 4th Ullāsa. The leaves are decayed.

॥ काव्यदर्पणः ॥

1335. KĀVYADARPAṆA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—98. 10 lines per page and 64—72 letters per line. Script—Malayāḷam. No. of Granthas—4200.

Subject—Same as No. 1324.

Beginning:

हरिः। श्रीगणपतये नमः।

शब्दालङ्कारनिरूपणम्। अथ प्राप्तावसरतया अलङ्कारं निरूपयन्नभ्यर्हितशब्दगतत्वात् शब्दालंकारान् प्रथमं निरूपयति—

अथ शब्दैकविषयानलंकारान् प्रचक्ष्महे।
यावतः प्राहुराचार्याः संक्षेपेण चिरन्तनाः॥
तानेव शब्दालंकारानुद्दिशति—

ते च वक्रोक्त्यनुप्रासौ यमकं श्लेष इत्यपि ।
चित्रं च पञ्चमः षष्ठोऽप्याभासः पुनरुक्तवत् ॥

End :

अत्रेदं प्रतिभाति—पस्पशायां अधिपरी अनर्थकौ इत्यत्र नञ्सूत्रे अव्ययं विभक्तीति सूत्रे च निपातानां द्योतकत्वं वाचकत्वञ्चेत्येव भाष्यकृतां स्वरसः । अत एव निर्मक्षिकमित्यादौ पूर्वपदार्थप्राधान्यं भाष्योक्तं संगच्छते । अत एव संकट उत्कट इत्यादौ उत्समादेः उद्गतसंगतरूपक्रियाविशिष्टसाधनवाचकतोक्ता भाष्ये । तस्मात् तटिद्गौरित्यादेः वाचकलुप्तोदाहरणत्वं सङ्गच्छत इति ।

Colophon :

इति राजचूडामणिदीक्षितस्य कृतिषु काव्यदर्पणे नवम उल्लासः ।

Author—Same as No 1333.

Remarks—The Ms. is a continuation of No. 1133 containing as it does the 9th and 10th Ullāsas.

॥ काव्यदर्पणः ॥

1336. KĀVYADARPAṆA.

Substance—Palm leaf. Size—12″ × 2″. Leaves—12. 10—12 lines per page ane 42 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject—Same as No. 1324.

Beginning—Same as No. 1333.

End :

वस्तुतस्तु वाक्यार्थो न शक्यः नापि लक्ष्य इति पञ्चमे वक्ष्यते। नचैवं विभागन्यूनतेति वाच्यं । शक्यपदेन वृत्त्यन्तरं विना शक्तिप्रयुक्तोपस्थितिविषयत्वस्य विवक्षितत्वादिति दिक् ।

अथार्थव्यञ्जकतामाह--

वाच्यादयस्त्रयोऽप्यर्थाः प्रायशो व्यञ्जका मताः ।

जयत्यधिवसन् गङ्गां देव... .... ॥

Colophon :

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्कमत्यमङ्गलरत्नखेटश्रीनिवासदीक्षितनन्दनस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारीश्वरगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु काव्यदर्पणे प्रथम उल्लासः ।

Author—Same as No. 1333.

Remarks—The Ms. contains the first Ullāsa and a portion of the next.

॥ काव्यदर्पणः ॥

1337. KĀVYADARPAṆA.

Substance—Palm leaf. Size—10″ × 2″. Leaves—48. 8—12 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1075.

Subject—Same as No. 1324.

Beginning :

... ...प्रथमोल्लासे हि गुणादिविशिष्टं शब्दार्थयुगलं काव्यमित्युक्तम्। तत्र शब्दार्थयोः प्राधान्यात् प्रथमं तयोः स्वरूपं

प्रदर्शयिष्यन् अर्थापेक्षया शब्दस्य प्राधान्यात् शब्दस्वरूपं तावद्विभजन्नेव निर्दिशति

शब्दोऽत्र त्रिविधः शक्तलक्षकव्यञ्जकात्मना ।
शक्तलक्षकव्यञ्जकभेदेन शब्दोऽत्र काव्ये त्रिविधः ।

End:

एकार्थपरनानार्थस्थले मैन्धवमानयेत्यादावेवार्थान्तरस्मृतिप्रतिबन्धार्थत्वेन तत्कल्पनस्यार्थवत्त्वात् । तत्र च नानार्थस्थलत्वावच्छेदेन सामान्यतोऽभिधानियामकत्वेन कल्पस्य प्रकरणस्यानेकार्थपरनानार्थस्थलेऽप्यभिधानियामकत्वे सिद्धेऽनुभूयमानस्यार्थान्तरप्रत्ययस्य व्यञ्जनामन्तरेण निर्वाहात् तत्कल्पनावश्य...

Colophon :

Author—Same as No. 1333.

Remarks—The work contains only a portion of the 2nd Ullāsa.

॥ काव्यप्रकाशः ॥

1338. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—12½" × 1¾". Leaves—90. 7—8 lines per page and 48—52 letters per line. Script—Malayāḷam. No. of Granthas—2100. Complete.

Subject—Same as No. 1324.

Author—Same as No. 1327 B.

Remarks—The leaves are partly damaged.

॥ काव्यप्रकाशः ॥

1339. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—9½″ × 1¼″. Leaves—151. 6—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—2100. Complete.

Subject—Same as No. 1324.

Author—Same as No. 1327 B.

Remarks—The Ms. is much injured.

॥ काव्यप्रकाशः ॥

1340. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—9½″ × 1½″. Leaves—134. 8 lines per page and 32—40 letters per line. Script—Malayāḷam. No. of Granthas—2350. Complete.

Subject—Same as No. 1324.

Author—Same as No. 1327 B.

Remarks—The Ms. is much worn out. The aphorisms are noted separately in ten leaves towards the close.

॥ काव्यप्रकाशः ॥

1341. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—155. 5—8 lines per page and 30—32 letters per line. Script—Malayāḷam. No. of Granthas—2100. Complete.

Subject—Same as No. 1324.

Author—Same as No. 1327 B.

Remarks—The Ms. is much injured.

॥ काव्यप्रकाशः ॥

1342 A. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—$10\frac{3}{8}'' \times 1\frac{3}{4}''$. Leaves—126. 8—9 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Subject—Same as No. 1324.

Author—Same as No. 1327 B.

Remarks—A few leaves at the close are missing. The work concludes with the exemplification of Saṅkara. The leaves between 'मप्र' (17) and "मद्दे" (109) are extant herein.

॥ कविताविचारः ॥

1342 B. KAVITĀVICĀRA.

Substance—Palm leaf. Size—$10\frac{3}{8}'' \times 1\frac{3}{4}''$. Leaves—10.
9—11 lines per page and 32 letters per line.
Script—Malayāḷam. No. of Granthas—200.

Subject—Exposition of the characteristics of poetry.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

इह तावदधिसभं कश्चित् कविपाशः काञ्चन चतुष्पदीं गायं गायं मया किमपि काव्यं कृतमिति तत्रत्योऽयं श्लोकः समाकर्ण्यतामिति प्रगल्भमभ्यधात् । तत्र कोऽपि सविनयमनुयुङ्क्ते अहो खलु भोः साधीयानयं श्लोकः । अत्र भवता किमत्र कृतं, किं शब्द उतार्थः अथवा तत्सम्बन्धः । न खलु किमपि । नित्यत्वात् । नित्याः किल शब्दार्थसंबन्धाः । तेषां कीदृशं करणम् । अथ करणमित्यपूर्वोत्पादनं नोच्यते, अपि तर्हि उच्चारणम् । कस्योच्चारणम् । शब्दस्य । कीदृशस्य । अर्थप्रतिपादकस्येति । एवं तर्हि गामानयेत्यादि व्यवहरन्नपि कविः स्यात् । उच्चारितश्शब्दः श्लोकः । श्लोकः काव्यं वा स्यादिति तत्कारी कविर्भवेत् ।

End:

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥

नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ॥

इत्यादि । सति कारणसामग्र्ये कार्यस्याभावाद् विषादो युज्यते। यत्किञ्चिदेव श्रितम् । काव्यज्ञशिक्षा दरिद्रप्राया। बुद्धिरपि प्रायः सामान्यग्राहिणीति सति को विषादः । का वात्मश्लाघा का वान्यनिन्दा को वा काव्यकरणोद्यमः । किन्नाम काव्यव्याक्रियावैयात्यम् । किन्तु महतां काव्यानि ज्ञातुमेव मतिमाननवरतं प्रयत्नं कुर्यादिति शिवम् । श्रीगुरुभ्यो नमः । श्रीगोविन्दाय नमः । श्रीमद्दक्षिणामूर्तये नमः ।

Colophon :

Author :

Remarks—The work is in prose. The Ms. is preserved in good condition. Since the main theme deals with the characteristics of poetry the title Kāvyalakṣaṇa would have been more appropriate.

॥ कविविभागः ॥

1342 C. KAVIVIBHĀGA.

Substance—Palm leaf. Size—$10\frac{3}{8}'' \times 1\frac{3}{4}''$. Leaves—6. 10 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject—Disquisition on the classification of poets.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

इह महाकविः, प्रतिभानकवि, र्व्युत्पत्तिकविश्चेति त्रयः कवयः ।

तत्र 'शक्तिर्निपुणते'त्यादिनोक्तैः प्रतिभानिपुणताभ्यांसस्तत्र तर्कत-
क्वादिपरिचयेन चतुर्भिरपि समप्रधानैस्समुदितः सन्दर्भे विचारणे
च पटुतमो महाकविः कालिदासश्रीहर्षभोजदेवादिः । प्रधानेन
प्रतिभायुक्तेन प्रधानाश्रुतादिकिञ्चित्परिशोधनीयमूक्तिः स्वस्या-
न्यस्य वा पदबन्धविमर्शने प्रसक्तविद्याविकल्पोपन्यासेषु प्र.....
चित्प्रतिहतप्रसरः सर्वत्र विषये झटिति सन्दर्भकारी प्रतिभान-
कविः । अप्रधानप्रतिभः प्रधानश्रुतादिपदबन्धपर्यालोचनसमुप-
नतविद्याप्रकारप्रदर्शनविशारदो मन्दमन्दं सन्दर्भकारी व्युत्पत्ति-
कविः प्रतिभाप्रधानत्वात् । उक्तरूपः सन्दर्भप्रधानः सन् प्रति-
भानकविः सर्वभाषाभिः सर्वप्रबन्धरचनासु कुशलो भवति ।
क्वचित्तु चित्रप्रबन्धेषु केषाञ्चिदेव निर्मितौ नैपुण्यं लभते ।

End :

"देव प्रालेयकणिकानवमौक्तिककञ्चुकः ।
आगतश्शिशिरोऽस्माकम्" । इति ।

अत्र व्योमपुष्करं गगनारविन्दम् अम्बरं वसनं नास्तीत्यर्थः ।
न चेह छलादीनां प्रसङ्गः । पर्यायपदपरिग्रहे अत्यन्त-
तुच्छतया वैचित्र्याभावात् । अत एवास्मिन् विषये
क्वचिन्निर्दिष्टवर्णावयवीकरणपूर्वकं पदाधानेनापि पूरणं भवति । यथा

अतीव निपुणो ह्ययं नरपतिर्विचित्रं स्वयं
जरीगृहदिमां भुवं युधि विरोधमातन्वते ।
ददाति सुरसुन्दरीलालितवामपार्श्वाञ्चितं
गतासिलसितास्फुटत्करतलः परस्मै पदम् ॥ समस्या ।

शिवमस्तु । शिवम् ।

Colophon :

Author ;

Remarks—Same as No. 1241 E.

॥ काव्यप्रकाशः ॥

1343. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—$18\frac{1}{3}'' \times 1\frac{1}{3}''$. Leaves—47. 8—10 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—1700. Incomplete.

Subject—Same as No. 1324.

Author—Same as No. 1327 B.

Remarks—The work extends up to a fragment of the 10th Ullāsa. The leaves are much decayed.

॥ काव्यप्रकाशः ॥

1344. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—$9\frac{1}{4}'' \times 1\frac{5}{8}''$. Leaves—46. 8—10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—925. Incomplete.

Subject—Same as No. 1324.

Author—Same as No. 1327 B.

Remarks—The work contains the first 6 Ullāsas and the definition of "ग्राम्यलक्षण" in the next.

॥ काव्यप्रकाशः ॥

2345. KĀVYAPRAKĀŚA.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{8}''$. Leaves—32. 9—11 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—650. Incomplete.

Subject—Same as No. 1324.

Author—Same as No. 1327 B.

Remarks—The Ms. ends on a fragment of the 5th Ullāsa.

॥ काव्यादर्शः ॥

1346. KĀVYĀDARŚA.

Substance—Palm leaf. Size—$9'' \times 1\frac{1}{2}''$. Leaves—49. 6—7 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—700 Complete.

Subject—Same as No. 1324.

Beginning:

गणपतये नमः ।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च ।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ॥

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ॥
इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम् ।
यदि शब्दात्मकं ज्योतिरासंसारान्न दीप्यते ॥
आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥
गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुस्सैव शंसति ॥
तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेनैकेन दुर्भगम् ॥

End :

तस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे ।
आर्द्रांशुकप्रवालानामास्पदं सुरशाखिनाम् ॥
राज्ञां विनाशपिशुनश्चचार खरमारुतः ।
धून्वन् कदम्बरजसा सह सप्तच्छदोद्गमान् ॥
डोलातिप्रेरणत्रस्तवधूजनमुखोद्गतम् ।
कामिनां लयवैषम्याद्गेयं रागमवर्द्धयत् ॥
ऐन्द्रपादार्चिषः कामी शिशिरं हव्यवाहनम् ।
अबलाविरहक्लेशविह्वलो गणयत्ययम् ॥
प्रमेयोऽप्यप्रमेयोऽसि सकलोऽप्यसि निष्कलः ।
एकत्वमस्यनेकोऽपि नमस्ते विश्वमूर्तये ॥
पञ्चानां पाण्डुपुत्राणां पत्नी पाञ्चालकन्यका ।
सतीनामग्रणीश्चासीद्दैवो हि विधिरीदृशः ॥
शब्दार्थालंक्रियाश्चित्रा मार्गाः सुकरदुष्कराः

गुणा दोषाश्च काव्यानामिति संक्षिप्य दर्शिताः ॥

व्युत्पन्नबुद्धिरमुना विधिदर्शितेन
मार्गेण दोषगुणयोर्विशवर्तिनीभिः ।
वाग्भिः कृताभिसरणो मदिरेक्षणाभि-
र्धन्यो युवेव रमते लभते च कीर्तिम् ॥

Colophon :

इत्याचार्यदण्डिनः कृतौ काव्यादर्शे गुणदोषविभागो नाम चतुर्थः परिच्छेदः ।

समाप्तश्च काव्यादर्शः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।

Author—Daṇḍin. He flourished probably in the beginning or in the first half of the 8th century. (Vide p. 70 HSP. Vol. I.)

Remarks—The work is available in print.

॥ काव्यादर्शः ॥

1347. KĀVYĀDARŚA.

Substance—Palm leaf. Size—7″ × 2″. Leaves—56. 8—10 lines per page and 24—30 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 1324.

Beginning etc.—Same as No. 1346.

Remarks—At the end of the Ms. occur the words, "दण्ड्यलङ्कारः समाप्तः".

॥ काव्यादर्शः ॥

1348. KĀVYĀDARŚA.

Substance—Palm leaf. Size—5″ × 1″. Leaves—103. 6—8 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 1324.

Beginning etc.—Same as No. 1346.

Remarks—The work also ends with the words, "दण्ड्यलकारः समाप्तः".

॥ काव्यादर्शः ॥

1349. KĀVYĀDARŚA.

Substance—Palm leaf. Size—7″ × 1½″ Leaves—75. 7—9 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 1324.

Beginning etc.—Same as No. 1346.

Remarks—The Ms. is much damaged.

॥ काव्यादर्शः ॥

1350. KĀVYĀDARŚA.

Substance—Palm leaf. Size—9″ × 2″. Leaves—46. 7—10 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 1324.

Beginning etc.—Same as No. 1346.

Remarks—Same as No. 1349.

॥ काव्यादर्शः ॥

1351. KĀVYĀDARŚA.

Substance—Palm leaf. Size—13″ × 2″. Leaves—36. 8 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—700.

Subject—Same as No. 1324.

Beginning etc.—Same as No. 1346.

Remarks—The Ms. is old and decayed. The following few lines occur at the end:

आदृतकम्पां परि... ... ...लोलापाङ्गमा... ।
असहायचूतवसतेरन्तःपरमन्तरङ्गमस्माकम् ॥
अगेन्द्रतनयामम्वाममृतां ... ... ।
क्षीं मदनाशतेः? कामाक्षीं कलये सदा ॥

"പ്രാ-ാമാണ്ടു് ആവണിമാസം ൧൨-ാംനു ദണ്ഡിഅവ
ങ്കാരം എഴുതി മുകിന്തതു്."

॥ काव्यादर्शः ॥

1352 A. KĀVYĀDARŚA.

Substance—Palm leaf. Size—18″ × 2″. Leaves—12 11 lines per page and 41 letters per line.

Script—Grantha. No. of Granthas—600. Incomplete.

Subject—Same as No. 1324.

Beginning etc.—Same as No. 1346.

Remarks—The Ms. begins on the 2nd Paricchcda and ends on the 4th. The leaves are much injured.

॥ काव्यादर्शव्याख्या ॥

1352 B. KĀVYĀDARŚAVYĀKHYĀ.

Substance—Palm leaf. Size—10″ × 2″. Leaves—20. 9 lines per page and 36 letters per line. Script — Grantha. No. of Granthas—1200.

Subject—Exposition of *Kāvyādarśa*.

Beginning:

गणपतये नमः । काव्यलक्षणात्मकं प्रबन्धमारभमाणस्तस्य निष्प्रत्यूहपरिसमाप्त्यर्थं शब्दाधिदेवतां सरस्वतीं स्वचित्ते सन्निधिं प्रार्थयते—

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥

चतुर्मुखस्य मुखाम्भोजवने हंसवधूः हंसीभवन्ती सर्वशुक्ला सर्वस्मात् शुक्लतरा सर्वस्मात् स्वेतरस्मात् शुक्लपदार्थाद् अतिशयेन शुक्ला । वृत्तौ तरपो लोप इति वचनात् समासे तरपो लोप इति सर्वशुक्लेति रूपासिद्धिः ।

End:

....

प्रबन्धार्थमुपसंहरति—शब्दार्थालं ... ... परिच्छेदोक्ता शब्दार्थालंक्रिया तृतीयपरिच्छेदोक्ता यमकादिविषयाः । सुकरदुष्क-

रमार्गा अपार्थादयो दोषास्तद्गुणीकरणेनोक्ता गुणाश्च संक्षिप्य दर्शिता इति ग्रबन्धस्य प्रयोजनं कथमिति । विपन्नेति एतत्प्रबन्धपरि .... लं कवित्वं तस्य स्वर्गनिवासफला कीर्तिरिति ।

Colophon :

साहित्ये सौहित्यं येनेह प्राप्तमाप्ततस्तेन ।
काव्यादर्शव्याख्या विनिर्मिता साधु तरुणवाचस्पतिना ॥
काव्यादर्शव्याख्या समाप्ता । नारायणाय नमः ।

Remarks—The work is identical with No. 12834, DCSM. Vol. XXII. The commentary has been published by Rao Bahadur M. Raṅgācārya of Madras. Some leaves in the end are torn.

॥ काव्यादर्शव्याख्या ॥

1353. KĀVYĀDARŚAVYĀKHYĀ.

Substance—Palm leaf. Size—10″ × 2″. Leaves—53. 9 lines per page and 32—40 letters per line. Script—Malayāḷam. No. of Granthas—1150.

Subject—Same as No. 1352 B.

Beginning :

.... राष्ट्री । शौरसेनी लाटी गौडी अन्या च तादृशीति ... ... ते अपभ्रंशलक्षणमाह आभीरादीति आभीरदेशो नामाभीरप्रायः पाश्चिमसमुद्रप्रायः पश्चिमसमुद्रपार्श्ववर्ती जनपदः । आदिशब्देन गूर्जरः । भाषाभेदानां प्रयोगस्थानान्याह संस्कृतमिति । सर्गबन्धमुक्तककुळकादिकाव्यं संस्कृतमयं स्कन्धकादि स्कन्धकं नाम महार्यागीतिनिर्मितं काव्यम् । आदिशब्देन गीत्युपगीत्यादि-

निर्मितं गृह्यते एतत्प्राकृतमयं ओसरादिः ओसर इति अपभ्रष्ट-भाषारचितः कश्चित्प्रबन्धः । नाटकादि तु रूपकदशकं तत्तत्पात्रानुरूपसर्वभाषामिश्रं मिश्रकम् इति । गद्यप्रबन्धस्तु संस्कृतेनेव भाषान्तरैरपि बध्यत इत्याह——

End etc.—Same as No. 1352 B.

Remarks—Leaves 1—7 and 9 are missing.

॥ काव्यादर्शव्याख्या ॥

1354. KĀVYĀDARŚAVYĀKHYĀ.

Substance—Palm leaf. Size—12″ × 2″. Leaves—23. 8 lines per page and 37—43 letters per line. Script — Malayāḷam. No. of Granthas—450. Incomplete.

Subject—Same as No. 1352 B.

Beginning:

... ...ल... ... ...

... ...।...का... ... ...

... ...श्च स्वराष्ट्रत्वं... ... ...

... ...श्च मृदुत्वं..अ..थ..भि... ... ...

... ... काले समानाकारणा... ... ...

End:

....श्वरनिदेशपतितमिति श्रूयते इह....जन्मनि कुन्ती...

...रब्धं शास्त्रम् उपसंजिहीर्षुः उक्तमर्थजालमनुवदति शब्दार्था...

....निर्दिष्टं शास्त्रं निगमयति व्युत्पन्न....त्यादिना... ....

....विषयाहानोपादानक्रियोपकरणभू ....
....अस्य ऐहिकामुष्मिकसुखहेतुत्वमुक्तं.... ....

Colophon :

... दः श्रीकृष्णाय नमः । शङ्करेण लिखितमिदं... ...

Author :

Remarks—The Ms. is much decayed and the portions in the beginning and in the end are not discernible. In RCMPL. the name of the author is given as Yāmuneya.

॥ काव्यानुशासनम् (अलंकारचूडामणियुतम्) ॥

1355. KĀVYĀNUŚĀSANAM
with Alaṅkāracūḍāmaṇi.

Substance—Palm leaf. Size—19″ × 2¼″. Leaves—66. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—2600.

Subject—The style, diction, merits, demerits etc. of literary composition.

Beginning :

हरिः ओं अविघ्नमस्तु ।

प्रणम्य परमात्मानं निजं काव्यानुशासनम् ।
आचार्यहेमचन्द्रेण विदुत्प्रीत्यै प्रतन्यते ॥

ग्रन्थारम्भे शिष्टसमयपरिपालनाय शास्त्रकारः समुचितेष्टदेवतां प्रणिधत्ते—

अकृत्रिमस्वादुपदां परमार्थाभिधायिनीम् ।
सर्वभाषापरिणतां जैनीं वाचमुपास्महे ॥

रागादिजेतारो जिनास्तेषामियं जैनी (जा?जि)नोपज्ञा अनेन कारणशुद्धोपादेयतामाह । उच्यते इति वाक् । वर्णपदवाक्यादिभावेन भाषाद्रव्यपरिणतिस्तामुपास्महे । उपासनं योगप्रणिधानं अकृत्रिमस्वादून्यनाहार्यमाधुर्याणि पदानि नामकादीनि यस्यां सा तथा स्वच्छस्वादुमृदुप्रभृतयो हि गुणमात्रवचना अपि दृश्यन्ते।

End:

बालाक्रीडानियुद्धादि तथा सूकरसिंहजा ।
धवलादिकृता क्रीडा यत्र सा भाणिता मता ॥
हास्यप्रायं प्रेरणन्तु स्यात्प्रहेलिकयान्वितम् ।
ऋतुवर्णनसंयुक्तं रामाक्रीडन्तु भाण्यते ॥
मण्डलेन तु यन्नृत्तं हल्लीसकमिति स्मृतम् ।
एकस्तत्र तु नेता स्याद्गोपस्त्रीणां यथा हरिः ॥
अनेकनर्तकीयोज्यं चित्रतालल्यान्वितम् ।
आ चतुःषष्टियुगलां द्रासकं मसृणोद्धतम् ॥
गोष्ठे यत्र तु विरहश्चेष्टितमिह कैटभद्विषः किञ्चित् ।
रिष्टासुरप्रमथनप्रभृति तदिच्छन्ति गोष्ठीति ॥
यस्मिन् कुलाङ्गना पत्युः सख्यग्रे वर्णयेद् गुणान् ।
उपालम्भञ्च कुरुते ज्ञेयं श्रीगदितं तु तत् ॥
लयान्तरप्रयोगेण रागैश्चापि विचित्रितम् ।
नानारसं सुनिर्वाह्यगतं काव्यमिति स्मृतम् ॥

आदिग्रहणाच्छम्याछलित(द्यु?द्वि)पद्यादिपरिग्रहः । प्रपञ्चस्तु ब्रह्मभरतकोहलादिशास्त्रेभ्योऽवगन्तव्यः ।

प्रेक्ष्यमुक्त्वा श्रव्यमाह—

श्रव्यं महाकाव्य

Colophon :

इत्याचार्यहेमचन्द्रविरचितायामलङ्कारचूडामणिसंज्ञ-
स्वोपज्ञकाव्यानुशासनवृत्तौ नायकवर्णनस्सप्तमोऽध्यायः ।

Author—Hemacandra.

Remarks—The Ms. extends up to a portion of the 8th chapter. It has been published in N. S. Press, Bombay. It is identical with No. 12836, DCSM. Vol. XXII. Hemacandra, the author of the text is also credited with the commentary. He flourished between 1088 and 1173 A. D. He composed this work under the patronage of Jayasimhasiddharāja and Kumāra Pāla of Guzerat. (Vide p. 204, HSP. Vol. I).

॥ काव्यानुशासनम् (अलंकारचूडामणिसहितम्) ॥

1356. KĀVYĀNUŚĀSANAM
with Alaṅkāracūḍāmaṇi.

Substance—Palm leaf. Size—21″×2″. Leaves—109. 6 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—2600.

Subject etc.—Same as No. 1355.

Remarks—The leaves are numbered up to 40. The Ms. comprises only 8 chapters and is much decayed.

॥ काव्यालंकारः ॥

1357. KĀVYĀLAṄKĀRA.

Substance—Palm leaf. Size—15″ × 2¼″. Leaves—20. 8 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—425.

Subject—Same as No. 1324.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीमद्दाशरथिपादेभ्यो नमः ।

प्रणम्य सर्वं सर्वज्ञं मनोवाक्कायकर्मभिः ।
काव्यालङ्कार इत्येष यथाबुद्धि विधास्यते ॥
धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम् ॥
अधनस्येव दातृत्वं क्लीवस्येवास्त्रकौशलम् ।
अज्ञस्येव प्रगल्भत्वमकवेश्शास्त्रवेदनम् ॥
विनयेन विना का श्रीः का निशा शशिना विना ।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता ॥
गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम् ।
काव्यं तु जायते जातु कस्यचित्प्रतिभावतः ॥

End:

अभ्यस्तेषु प्रयोक्तव्यमदन्तं च विदेः शतुः ।
असौ दधदलङ्कारं स्रजं बिभ्रच्च शोभते ॥
... ...रं योगिनं वदेत् ।
ययैतच्छ्यामभाभाति वनं वनजलोचने ॥

नैकत्रौकारभूयस्त्वं गतो यातो हतो यथा ।
सावर्ण्यो वत्सयो भस्य ब्रूयान्नान्यत्र पद्धतेः ? ॥

सालातुरीयमतमेतदनुक्रमेण
को वक्ष्यतीति विरतोऽहमतो विचारात् ।
शब्दार्णवस्य यदि कश्चिदुपैति पारं
भीमाम्भसश्च जलधेरिति विस्मयोऽसौ ॥

विद्यानां सततमपाश्रयोऽपरासां
तासूक्तान्न च विरुणद्धि कांश्चिदर्थान् ।
श्रद्धेयं जगति मतं हि पाणिनीयं
माध्यस्थ्याद्भवति न कस्यचित्प्रमाणम् ॥

अवलोक्य मतानि सत्कवीना-
मवगम्य स्वधिया च काव्यलक्ष्म ।
सुजनावगमाय भामहेन
ग्रथितं रक्रिलगोमिसूनुनेदम् ॥

Colophon :

इति भामहालङ्कारे षष्ठः परिच्छेदः ।

Author—Bhāmaha, son of Rakrilagomi.

Remarks—The author's date may be assigned to the period between the last quarter of the 7th and that of the 8th century A. D. (Vide p. 49. HSP. Vol. I.) The work is noticed as No. 12920, DCSM. Vol. XXII under the title Bhāmahālaṅkāra. "It has been printed as an appendix to Pratāparudrīya in Bombay Sanskrit Series",

The following verses occur after the end:

षष्ट्या शरीरं निर्णीतं शतषष्ट्या त्वलंकृतिः ।
पञ्चाशता दोषदृष्टिः सप्तत्या न्यायनिर्णयः ॥
षष्ट्या शब्दस्य शुद्धिः स्यादित्येवं वस्तुपञ्चकम् ।
उक्तं षड्भिः परिच्छेदैर्भामहेन क्रमेण वः ॥

॥ काव्यालंकारः ॥

1358. KĀVYĀLAṄKĀRA.

Substance—Palm leaf. Size—10″ × 2″. Leaves—25. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—400.

Subject—Same as No. 1324.

Beginning etc.—Same as No. 1357.

Remarks—The Ms. is too fragile to be touched and the portions at the beginning and end are almost illegible.

॥ काव्यालंकारसूत्रम् (सवृत्तिकम्) ॥

1359. KĀVYĀLAṄKĀRASŪTRAM with Vṛtti.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—50. 8 lines per page and 30—38 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject—Aphorisms on the principles of rhetoric and poetics.

Beginning :

हरिः । श्रीगणपतये नमः । श्रीमद्दाशरथिपादेभ्यो नमः ।

अविघ्नमस्तु ।

प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ।

काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधास्यते ॥

काव्यं ग्राह्यमलङ्कारात् ।

काव्यं खलु ग्राह्यमुपादेयं भवति अलङ्कारात् । काव्यशब्दोऽयं गुणालङ्कारसंस्तुतयोः शब्दार्थयोर्वर्तते । भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते । कोऽसावलङ्कार इत्यत आह—

सौन्दर्यमलङ्कारः ।

End :

उक्तिवैचित्र्यं माधुर्यम् अपारुष्यं सौकुमार्यम् अग्राम्यत्वमुदारता वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः दीप्त.....कान्तिः ।

Colophon :

इति काव्यालङ्कारसूत्रे गुणविवेचने तृतीयेऽधिकरणे द्वितीयाध्यायः अर्थगुणविवेकः ।

समाप्तश्चेदं तृतीयमधिकरणम् ।

Author—Vāmana.

Remarks—The author flourished between the middle of the 8th and that of the 9th century (Vide p. 82. HSP. Vol. I.) The leaves are much decayed. The Ms. contains three Adhikaraṇas only. The script is old Malayāḷam. The work is available in print.

॥ काव्यालङ्कारसूत्रम् (वृत्तिसहितम्) ॥

1360. KĀVYĀLAṄKĀRASŪTRAM with Vṛtti.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—39. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—900.

Subject—Beginning—Same as No. 1359.

End :

"म्लायन्त्यङ्गुलिसङ्गेऽपि कोमलाः कुसुमस्रजः" इत्यत्र अङ्गुलिसङ्ग इति न युक्तं समासेऽङ्गुलेः सङ्ग इति मूर्धन्यविधानात्। तेनावन्तिसेनादयः प्रत्युक्ताः। तेन अङ्गुलिसङ्ग इत्यनेनावन्तिसेना इन्द्रसेना इत्येवमादयः प्रत्युक्ताः सुपामादिष्वेति संज्ञायामगादिति मूर्धन्यविधानात्। नेन्द्रवाहनशब्दे णत्वमाहितत्वस्य। वाहनशब्दे वाहनमाहितादिति णत्वं न भवति। आहितत्वस्याविवक्षितत्वात स्वामिभावमात्रं विवक्षितम्। तेन सिद्धमिष्टमिन्द्रवाहनमिति।

सदसन्तो मया शब्दा विविच्यार्थे निदर्शिताः।
अनयैव दिशा कार्यं शेषाणामन्वेक्षणम्। इति।

Colophon :

इति काव्यालङ्कारवृत्तौ प्रायोगिके पञ्चमे अधिकरणे द्वितीयोऽध्यायः।

कथामन्तुमतीयस्य चित्रेव्यैऽस्य पराकृतिः (?)
दृत्यो मतिप्रतिष्ठायाः काव्यशास्त्रार्थजन्मनः॥
तेन विद्वज्जनप्रीत्या वामनेन लघुस्फुटा।
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विनिर्मिता॥

काव्यशास्त्रप्रविष्टस्य तदिदं शास्त्रमस्त्रवत् ।
श्रुतान्तरानभिज्ञस्य गीतविद्या करोति किम् ॥
प्रत्यूहव्यूहसन्नाहमहामोहनिबर्हणम् ।
नित्यानन्दं क्रियारूपं वन्दे तं देवमान्तरम् ॥
दाशरथये नमः ।

Author—Same as No. 1359.

Remarks—The Ms. is preserved in fairly good condition. The leaves between थन (21) and वद्दे (59) are extant herein.

॥ कुवलयानन्दः ॥

1361. KUVALAYĀNANDA.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—101. 10 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—2000.

Subject—Exposition of *Candrāloka*.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
परस्परतपःसंपत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥

अलंकारेषु बालानामवगाहनसिद्धये ।
ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ॥
येषां चन्द्रालोके लक्ष्यन्ते लक्ष्यलक्षणश्लोकाः ।
प्रायस्त एव तेषामितरेषामभिनवा विरच्यन्ते ॥

End :

निरतिशयवितरणोत्कर्षपर्यवसायिनो हेत्वलंकारस्यात्यद्भुततथ्यौदार्यवर्णनात्मिकयात्युक्त्या सहैकवाचकानुप्रवेशसंकरः । तन्मूलकस्याप्रस्तुतप्रशंसालंकारस्य प्रस्तुताङ्कुरस्य वा राजसम्पत्समृद्धिवर्णनात्मकोदात्तालंकारेण सहैकवाचकानुप्रवेशसंकरः । वाचकशब्दस्य प्रतिपादकमात्रपरतया व्यञ्जकसाधारण्यात् । एषां च त्रयाणामेकवाचकानुप्रवेशसंकराणां समप्राधान्यसंकरः । नह्येतेषां परस्परमन्यत्र वाचकत्वमस्ति । उदात्तादिमात्रस्यैव हेत्वलङ्कारादिचारुतापादकत्वेनातिशयो... ... ...
त्वात् । एवमत्र श्लोके चतुर्णामपि संकराणां यथायोग्यं संकरः । एवमन्यत्राप्युदाहरणान्यूहनीयानि ।

Colophon :

अमुं कुवलयानन्दमकरोदप्पदीक्षितः ।
नियोगाद्वेङ्कटपतेर्निरुपाधिकृपानिधेः ॥
चन्द्रालोको विजयतां शारदागमसंभवः ।
ह्यः कुवलयानन्दो यत्प्रसादादभूद् भुवि ॥

इति श्रीमदद्वैतविद्याचार्यश्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीरङ्गराजाध्वरिवरसूनोरप्पदीक्षितस्य कृतिः कुवलयानन्दः संपूर्णः । कुवलयानन्दग्रन्थसंख्या द्विसहस्रम् । वासुदेवाय

नमः ।

वासुदेवपदाम्भोजभक्तिमान् वेङ्कटेश्वरः ।

अमुं कुवलयानन्दं व्यलिखत् सुमनोहरम् ॥

Author—Appayyadīkṣita.

Remarks—The leaves are not arranged in order. The author's date may be assigned to the latter half of the 16th century.

॥ कुवलयानन्दः ॥

1362. KUVALAYĀNANDA.

Substance—Palm leaf. Size—8″ × 2″. Leaves—151. 9—10 lines per page and 20—25 letters per line Script—Malayāḷam. No. of Granthas—2000.

Subject etc.—Same as No. 1361.

Remarks—The following portion,

श्रीपण्मुखाय नमः ।

ഉള്ളൂർ സുബ്രഹ്മണ്യൻ സഹസ്തലിഖിതം.

വിശാഖം തിരുനാൾ വക ഗ്രന്ഥം.

ശ്രീപദ്മനാഭസ്വാമിനെ നമഃ.

occuring after the colophon bears ample testimony to the keen interest evinced by H. H Viśakham Tirunal Maha Raja in preserving Oriental Mss.

॥ कुवलयानन्दः ॥

1363. KUVALAYĀNANDA.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—116.

6—8 lines per page and 22—30 letters per line. Script—Malayāḷam. No. of Granthas—1400. Incomplete.

Subject—Beginning—Same as No. 1361.

End :

गूढोक्तिरन्योद्देश्या गीर्यदन्यं प्रति कथ्यते ।
वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः ॥

यं प्रति किञ्चिदुक्तव्यं तत्तटस्थैर्माज्ञायीति तदेवान्यं कंचित् प्रति श्लेषेणोच्यते चेत् सा गूढोक्तिः! वृषेत्युदाहरणम्। इह परकलत्रमुपभुञ्जानं कामुकं प्रति वक्तव्यं परक्षेत्रे सस्यानि भक्षयन्तं कंचिदुक्षाणं समीपे चरन्तं कथ्यते । नेयमप्रस्तुतप्रशंसा कार्यकारणादिव्यङ्ग्यत्वाभावात्। यथावा—

नाथो मे विपणिं गतो न गणयत्येषा सपत्नी पुन-
स्त्यक्त्वा मामिह पुष्पिणीति गुरवः प्राप्ता गृहाभ्यन्तरम् ।
शय्यामात्रसहायिनीं परिजनः श्रान्तो न मां सेवते
स्वामिन्नाग ....

Colophon :

Author—Same as No. 1361.

Remarks—The work extends up to *Gūḍhoktyalaṅkāra.*

॥ चन्द्रालोकः ॥

1364. CANDRĀLOKA.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—15.

9 lines per page and 20—24 letters per line. Script—Malayāḷam. No. of Granthas—200. Complete.

Subject—Dissertation on poetics.

Beginning :

हरिः ।
परस्परतपस्सम्पत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥
अलङ्कारेषु बालानामवगाहनसिद्धये ।
ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ॥
उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ॥
वर्ण्योपमानधर्माणामुपमावाचकस्य च ।
एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा ॥
तटिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम ।
कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ॥

End :

हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते ।
असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम् ॥
हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ।
लक्ष्मीविलासा विदुषां कटाक्षा वेङ्कटप्रभोः ॥

Colophon :

इत्थं शतमलङ्कारा लक्षयित्वा निदर्शिताः ।
प्राचामाधुनिकानां च मतान्यालोच्य सर्वशः ॥

Author—Jayadeva.

Remarks—The author's date is assigned to a period between 1175 and 1325 A. D. (Vide p. 218. HSP, Vol. I.) Two leaves at the close of the Ms. contain the following index in verse to all Alaṅkāras :

चत्वारो रसवत्प्रेय ऊर्जस्वि च समाहितम् ।
भावस्य चोदयः सन्धिश्शबलत्वमिति त्रयः ॥
अष्टौ प्रमाणालङ्काराः प्रत्यक्षप्रमुखाः क्रमात् ।
एवं पञ्चदशान्यानप्यलंकारान् विदुर्बुधाः ॥
उपमा द्विविधा प्रोक्ता पूर्णा लुप्तोपमेति च ।
उपमानन्वयौ पश्चादुपमेयोपमा मता ॥
प्रतीपं रूपकं चैव परिणामस्ततः परम् ।
उल्लेखः स्मृतिमद्भ्रान्तिसन्देहाश्च ततः परम् ॥
ततोऽपह्नुतिरुत्प्रेक्षातिशयोक्तिस्ततः परम् ।
पश्चात्तु तुल्ययोगित्वं दीपकावृत्तिदीपके ॥
प्रतिवस्तूपमा पश्चाद्दृष्टान्तश्च निदर्शनम् ।
व्यतिरेकस्सहोक्तिश्च विनोक्तिरथ कथ्यते ॥
समासोक्तिः परिकरः पश्चात्परिकराङ्कुरः ।
श्लेषोऽस्तुतप्रशंसा च प्रस्तुताङ्कुर एव च ॥
पर्यायोक्तं तथा व्याजस्तुतिश्च व्याजनिन्दनम् ।
आक्षेपश्च ततः प्रोक्तो विरोधाभास एव च ॥
विभावना विशेषोक्तिस्ततोऽसम्भव इष्यते ।
असङ्गतिश्च विषमं समं चैव विचित्रितम् ॥
अधिकाल्पे ततोऽन्योन्यं विशेषालंकृतिस्तथा ।
व्याघाताख्यस्ततः प्रोक्तः पश्चात्कारणमालिका ॥

एकावली ततो मालादीपकं सार एव च ।
यथासंख्यं च पर्यायः परिवृत्तिरतः परम् ॥
परिसंख्या विकल्पश्च पश्चात्प्रोक्तस्समुच्चयः ।
समाधिः प्रत्यनीकश्च तथा कारकदीपकम् ॥
काव्यार्थापत्तिसंज्ञश्च काव्यलिङ्गमतःपरम् ।
पश्चादर्थान्तरन्यासस्ततः प्रोक्तो विकस्वरः ॥
प्रौढोक्तिसंज्ञोऽलंकारस्सम्भावनमतःपरम् ।
मिथ्याध्यवसितिश्चैव ललितं च प्रहर्षणम् ॥
विषादनं तथोल्लासोऽवज्ञानुज्ञे ततः परम् ।
लेशो मुद्रा च तदनु रत्नावलिरलंकृतिः ॥
तद्गुणश्चातद्गुणश्च मीलितालंकृतिर्मता ।
सामान्यं चोन्मीलितं च विशेषकमतः परम् ॥
गूढोत्तरं तथा चित्रं सूक्ष्मालङ्कार एव च ।
पिहितं च तथा व्याजवचनं च ततः परम् ॥
गूढोक्तिर्विवृतोक्तिश्च युक्तिर्लोकोक्तिरेव च ।
छेकोक्तिश्च ततः पश्चाद्वक्रोक्तिश्च ततः परम् ॥
स्वभावोक्तिर्भाविकं स्यादुदात्तश्च ततः परम् ।
अत्युक्तिश्च निरुक्तिश्च निषेधस्सिद्धिहेतुकौ ॥
एवं शतमलङ्काराश्चन्द्रालोके प्रकीर्तिताः ॥

॥ चन्द्रालोकः ॥

1365. CANDRĀLOKA.

Substance—Palm leaf. Size—$3\frac{5}{8}'' \times \frac{3}{4}''$. Leaves—33.
6 lines per page and 15—18 letters per line,

Script—Malayāḷam. No. of Granthas—200. Complete.

Subject etc.—Same as No. 1364.

Remarks—The following discussion in prose is attempted in the course of the work on Luptopamā and Utpreksā:

उपमीयत इत्युपमेयम् । उपमीयतेऽनेनेत्युपमानम् । साधारणः समानः एको धर्मो यस्य येन स साधारणधर्मः । समानं तुल्यमेकमधिकरणमाधारो यस्य येन तत् समानाधिकरणं; तस्य भावस्सामानाधिकरण्यम् ।

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥

वाचकलुप्ता, धर्मलुप्ता, धर्मवाचकलुप्ता, वाचकोपमेयलुप्ता, उपमानलुप्ता, वाचकोपमानलुप्ता, धर्मोपमानवाचकलुप्ता ।

'यत्तया मेलनमि'त्यत्र अवितर्कितसम्भवरूपसाधारणधर्मयोगे वाचकोपमानलोपः, धर्मयोगाभावे वाचकोपमानधर्मलोप इति द्विविधा । लाभो मे यश्च तद्रतेरित्यत्र धर्मयोगे उपमानलोपः । धर्मयोगाभावे उपमानधर्मलोप इति द्विविधा । एवं चतुर्धा । श्रीगुरुभ्यो नमः । शुभमस्तु । बाधकालीनेच्छाजन्यज्ञानमुत्प्रेक्षा । आहार्यसंशय उत्प्रेक्षा । अस्पष्टान्यकोटिकः उत्कटैककोटिकः सन्देहः उत्प्रेक्षा ।

On a leaf at the close occurs the *śloka* quoted below:

शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

॥ चन्द्रालोकः ॥

1366. CANDRĀLOKA.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—14. 7—10 lines per page and 16—20 letters per line. Script—Grantha. No. of Granthas—125.

Subject—Beginning—Same as No. 1364.

End:

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः ॥
हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् ।
गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ॥
प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनम् ।
कचाः कलिन्दजातीरतमालस्तोममेचकाः ॥
सम्भावनं यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये ।
यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥

Colophon:

चन्द्रालोककारिका । ओम् ।

Author—Same as No. 1364.

Remarks—The work ends on the Sambhāvanālaṅkāra.

॥ चन्द्रालोकः ॥

1367. CANDRĀLOKA.

Substance—Palm leaf. Size—$10 \times 1\frac{3}{4}''$. Leaves—8.

10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—200. Complete.

Subject etc.—Same as No. 1364.

Remarks—After the colophon occur an index to Alaṅkāras and the following benedictory verse:

चन्द्रालोको विजयतां शारदागमसंभवः ।
हृद्यः कुवलयानन्दो यत्प्रसादादभूद् ध्रुवम् ॥

॥ चन्द्रालोकः ॥

1368. CANDRĀLOKA.

Substance—Palm leaf. Size—$14\frac{1}{2}''\times 1\frac{7}{8}''$. Leaves—7. 9 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—180.

Subject etc.—Same as No. 1364.

Remarks—The opening leaf is numbered 33. The benedictory verse quoted at the close of No. 1367 is missing herein. The following additional verses occur after the end :

फलोन्मुखैर्हि कर्मादिव्यापारैरभिसंवृतः ।
कर्तृव्यापार एवार्थः प्राधान्यात् सर्वधातुषु ॥
कर्मादेरानुगुण्यात्तु मार्गणे प्रतिपादने ।
तत्तद्व्यापारमात्रेऽर्थे धातुशेषः प्रवर्तते ॥
स्वव्यापारे च कर्तृत्वं भजन्ते करणादयः ।
[illegible] पचति च स्थाली पचत्यन्नं तु पच्यते ॥

सम्यग् ज्वलत्युद्दहतीत्यर्थोऽपि क्ष्विद्यतीति च ।
एवं हि कर्मकर्तुश्च कर्तृत्वात् कर्तरीह लः ॥
प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥

॥ चन्द्रालोकः ॥

1369. CANDRĀLOKA.

Substance—Palm leaf. Size—$2\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—44. 8—9 lines per page and 8 letters per line. Script—Malayāḷam. No. of Granthas—180.

Subject etc.—Same as No. 1364.

Remarks—The Ms. is remarkably small as is evident from the dimensions given above.

॥ चन्द्रालोकः ॥

1370. CANDRĀLOKA.

Substance—Palm leaf. Size—$11'' \times 1\frac{7}{8}''$. Leaves—10. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—180. Complete.

Subject etc.—Same as No. 1364.

Remarks—The Ms. is old and decayed. The

benedictory śloka given under No. 1367 and the following additional verse occur at the beginning :

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥

॥ चित्रमीमांसा ॥

1371. CITRAMĪMĀMSĀ.

Substance—Palm leaf. Size—$11\frac{1}{4}'' \times 1\frac{7}{8}''$. Leaves—65. 10—12 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—2000. Complete.

Subject—Classification and definitions of poetic compositions.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अभिवन्द्य चन्द्रशेखरमाद्यं गौरीसखं परं ज्योतिः ।
वितनोमि विपुलविषयां विशदार्थामर्थचित्रमीमांसाम् ॥

त्रिविधं तावत्काव्यम् । ध्वनिगुणीभूतव्यङ्ग्यचित्रभेदात् । यत्र वाच्यातिशायि व्यङ्ग्यं, स ध्वनिः ।

यथा—

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥

End :

ननु यत्र कश्चिच(द्धे?दभे)देनाध्यवसीयते स विषयः, यस्तु तथाध्यवसीयते स विषयीति विषयविषयिभावोऽत्र विवक्षित इति नोक्तातिव्याप्तिरिति चेत्, एवमपि 'विद्वन्मानसहंसे'त्यादिश्लिष्ट-रूपकेऽतिव्याप्तिर्दुर्वारा । रूपके तादूप्यारोपमात्रं न त्वतिशयोक्तिवदभेदाध्यवसाय इति कल्पना तु रूपकलक्षणविचार एव निरस्ता । सारूप्यनिबन्धनाप्रस्तुतप्रशंसोदाहरणेषु चातिव्याप्तिः ।

Colophon :

इति चित्रमीमांसा समाप्ता ॥

Author—Appayyadīkṣita.

Remarks—The work has been published in the Kāvyāmālā Series in N. S. Press, Bombay. It has been referred to in Prof. Śeṣagiri Śāstri's Report No. 2 as No. 34.

॥ दशरूपकम् (अवलोकनोपेतम्) ॥

1372 A. DAŚARŪPAKAM with Avalokanam.

Substance—Palm leaf. Size—18" × 2". Leaves—36. 10—14 lines per page and 64—72 letters per line. Script—Grantha. No. of Granthas—1850.

Subject—Dramaturgy.

Beginning :

सदाचारं प्रमाणयता अविघ्नेन प्रकरणसमाप्त्यर्थमिष्टयोः प्रकृताभिमतयोश्च दैवतयोः नमस्कारः क्रियते—

(मू) नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे ॥
दशरूपानुकारेण यस्य माद्यन्ति भावकाः ।
नमः सर्वविदे तस्मै विष्णवे भरताय च ॥

(व्या) यस्य कण्ठः पुष्करायते मृदङ्गवदाचरति मदाभोगेन घनध्वानो निविडध्वानः नीलकण्ठस्य शिवस्य ताण्डवे उद्भटनृत्ते तस्मै गणेशाय नमः । अत्र खण्डश्लेषाक्षिप्यमाणोपमाच्छायालङ्कारः । नीलकण्ठस्य मयूरस्य ताण्डवे मेघध्वनिः यथा पुष्करायते इति प्रतीतेः ।

End:

(मू) षट्त्रिंशद्भूषणादीनि सा..... ।
.....सालङ्कारेषु तेषु च ॥

(व्या) "विभूषणं चाक्षरसंहतिश्च शोभाभिमानं गुणकीर्तनञ्च" इत्येवमादीनि षट्त्रिंशत्काव्यलक्षणानि "सामभेदः प्रदानं च" इत्येवमादीनि सन्ध्यन्तराण्येकविंशतिरुपमादिष.....हादिष्वन्तर्भावान्न पृथगुक्तानि ।

(मू) रम्यं जुगुप्सितमुदारमथापि नीच-
मुग्रं प्रसादि गहनं विकृतं च वस्तु ।
यद्वाप्यवस्तु कविभावकभाव्यमानं
तन्नास्ति यन्न रसभावमुपैति लोके ॥
विष्णोः सुतेनापि धनञ्जयेन ॥
विद्वत्.... ....
....मुञ्जमहीशगोष्ठी ।
वैदग्ध्यभाजा दशरूपमेतत् ... ...

Colophon :

इति दशरूपावलोकने धनिकविरचिते चतुर्थः प्रकाशः।

नमः सरस्वत्यै ।

Author—Text : Dhanañjaya.

Com : Dhanika.

Remarks—The work has been edited and published with this commentary by Hall and Parab. It is identical with No. 12888, DCSM. Vol. XXII. The author flourished during the reign of King Muñja. Dhanika, the commentator, was his contemporary. (Vide p. 129, HSP. Vol. I.)

॥ ज्ञानोपदेशविधिः ॥

1372 B. JÑĀNOPADEŚAVIDHI.

Substance—Palm leaf. Size—18″ × 2″. Leaves—1½. 14 lines per page and 50 letters per line. Script—Grantha. No. of Granthas—25.

Subject—Instructions on self-realisation.

Beginning :

अथ ज्ञानोपदेशविधिं व्याख्यास्यामः मुमुक्षवे श्रद्धानाय यतये वीतरागाय। आत्मलाभात् परमलाभाभावात्। द्रष्टुर्दृश्योऽन्य इति प्रसिद्धो लोके। अथ क आत्मेति। देहस्तावदात्मा न भवति रूपादिमत्त्वेनोपलभ्यमानत्वात्। घटादिवत्। यथा घटादयो रूपादिमन्तः चक्षुरादिकरणैरुपलभ्यन्ते। एवं देहव्यतिरिक्त आत्मा सिद्धः। स्वापमरणादिदर्शनात्।

End :

अथ क आत्मा इति । उक्तेभ्यः सर्वेभ्यो व्यतिरिक्तेभ्यः अन्तरतमः आकाशवत् सर्वगतः सूक्ष्मो नित्यो निरवयवो निर्गुणो निरञ्जनो गमनागमनरहितोऽहङ्कार ... ... स्वयंज्योतिः-स्वभावो ... ...

Colophon :

ओ... ... ...इति प्रथमः खण्डः ।

Author :

Remarks—The Ms. contains one Khanda only.

॥ दशरूपकम् (अवलोकनोपेतम्) ॥

1373. DAŚARŪPAKAM

with Avalokanam.

Substance—Palm leaf. Size—15″ × 1¼″. Leaves—63. 6—8 lines per page and 66 letters per line. Script—Grantha. No. of Granthas—1850.

Subject etc.—Same as No. 1372 A.

Colophon :

श्रुतिराज्ञा वपुर्ज्ञानं तं वन्दे देवकीसुतम् ।

इति विष्णुसूनोः धनिकस्य कृतौ दशरूपकावलोकने रसविभागप्रकाशस्तुरीयः ।

शुभमस्तु मङ्गलं मङ्गलम् ।

Author—Same as No. 1372 A.

Remarks—The script is legible. The leaves are much decayed.

॥ ध्वन्यालोकः ॥

1374. DHVANYĀLOKA.

Substance—Palm leaf. Size—9½" × 2". Leaves—112. 7—8 lines per page and 32—36 letters per line. Subject—Malayāḷam. No. of Granthas—1800.

Subject—Explication of the fundamentals of Dhvani.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः ।
त्रायन्तां नो मधुरिपोः प्रपन्नार्त्तिच्छिदो नखाः ॥

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम् ॥

बुधैः काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिसंज्ञितः परंपरया यः समाम्नातः सम्यगासमन्तात् म्नातः प्रकटीकृतः तस्य सहृदयमनःप्रकाशमानस्याप्यभावमन्ये जगदुः । तदभाववादिनां चामी विकल्पाः संभवन्ति । तत्र केचिदाचक्षीरन् । शब्दार्थशरीरं

तावत् काव्यम् । तत्र शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धाः ।

End :

नित्याक्षिप्तरसाश्रयोचितगुणालङ्कारशोभाभृतो
यस्माद्वस्तु समीहितं सुकविभिः सर्वं समासाद्यते ।
काव्याख्येऽखिलसौख्यधाम्नि विबुधोद्याने ध्वनिर्दर्शितः
सोऽयं कल्पतरूपमानमहिमा भोग्योऽस्तु भव्यात्मनाम् ॥

सत्काव्यतत्त्वविषयस्फुरितप्रसुप्त-
कल्पं मनः सुपरिपक्वधियां यदासीत् ।
तद् व्याकरोत्सहृदयोदयलाभहेतो-
रानन्दवर्द्धन इति प्रथिताभिधानः ॥

Colophon :

इत्यानन्दवर्द्धनविरचितसहृदयालोकनाम्नि काव्यालङ्कारे चतुर्थ उद्योतः ।

Author—Ānandavardhana.

Remarks—The script is old Malayāḷam. The Ms. is printed in the Kāvyāmālā Series. The work is also known by the titles, Sahṛdayāloka and Kāvyāloka. The author flourished during the reign of Avantivarman, 855—884 A. D. as disclosed by Rājataraṅgiṇī and accepted by Bühler and Jacobi. (Vide p. 105 HSP Vol. I.)

॥ ध्वन्यालोकः ॥

1375. DHVANYĀLOKA.

Substance—Palm leaf. Size—7½″ × 1½″. Leaves—129. 8—9 lines per page and 22—32 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Subject etc.—Same as No. 1374.

Remarks—The script is square-shaped. The leaves are worn out.

॥ ध्वन्यालोकः ॥

1376. DHVANYĀLOKA.

Substance—Palm leaf. Size—15″ × 1″. Leaves—60. 6 lines per page and 52—60 letters per line. Script—Grantha. No. of Granthas—1300.

Subject—Beginning : Same as No. 1374.

End :

अलङ्कारनिबन्धो यः स चित्रविषयो मतः ।
रसादिष्टविवक्षा तु स्यात् तात्पर्यवती यदा ॥
तदा... ...ध्वनेर्यत्र न गोचरः ।

एतच्चित्रं कवीनां विशृङ्खलगिरां रसादितात्पर्यमनन्वेक्ष्यैव काव्यप्रवृत्ति. . . .रिकल्पितमिदानीन्त. . . .यें काव्यनयन्यवस्थापने क्रियमाणे नास्त्येव ध्वनिव्यतिरिक्तकाव्यप्रकारः यतः परिपाकवतां कवीनां रसादितात्प. . . .

Colophon :

Author—Same as No. 1374.

Remarks—The closing portion of the Ms. is considerably worn out.

॥ नञ्जराजयशोभूषणम् ॥

1377. NAÑJARĀJAYAŚOBHŪṢAṆAM.

Substance—Palm leaf. Size—13½″ × 1⅝″. Leaves—107. 10—12 lines per page and 50 letters per line. Script—Grantha. No. of Granthas—3700. Complete.

Subject—The merits, and demerits of literary composition.

Beginning :

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥

यद्दीक्षाञ्चलकल्पिता हरिहरब्रह्मादयो निर्जरा
यस्यैकयं समुपाश्रते च कतिचित्तत्त्वं महायोगिनः ।
विश्वाकारतया चिराय समभूदीशोऽपि यस्य त्विषा
तच्छम्भोरनपायधाम किमपि प्रस्तोतुमीशे हृदि ॥

चिदाकाराय शुद्धाय सर्वविद्याविधायिने ।
योगानन्दयतीन्द्राय सान्द्राय गुरवे नमः ॥

शिवरामसुधीक्षनोर्नरसिंहकवेः कृतिः ।
नञ्जराजगुणग्रामभूषिता भुवि दीव्यतु ॥

नवं वा प्राचीनं भवतु ननु काव्यं सुचरितं
रसस्यन्दि स्यात्तन्महृदयचमत्कारि भवति ।
सुधापारावारो निवसतु चिरत्नोऽपि भरसो
न रुच्यः किं तस्मादपि जगति राकाहिमरुचिः ॥

रसालङ्काराद्यैर्ध्वनिभिरपि कैश्चित्सुरभिलैः
प्रगीयन्ते काश्चिद् भुवि कव(तयां ? यतां) साधुकृतयः ।
इयं चास्माकीना भुवनजननीपादकमल-
प्रणामप्राचुर्याद्वहतु महतामादरभरम् ॥

शरत्फुल्लन्मल्लीविगलितमधूलीरसरमा-
धुरीणा मद्वाणी सुखयतितरामेव सुधियः ।
विधत्ते किं तोषं जगति बधिराणामिह नट-
द्भृटीसाटोपस्फुरितमणिकाञ्चीकलरवः ॥

गुणा भूषायन्ते सहजमधुरा नञ्जनृपतेः
कृतेरस्या एते त्रिजगति धुरीणा अपि तथा ।
ततः सैषा भूयः स्वगिव नवसौरभ्यभरिता
कवीनामानन्दं जनयतु जगद्रञ्जयतु च ॥

असङ्ख्येयास्तेऽमी कथमपि गुणा नञ्जनृपतेः
परिष्कर्तुं को वा प्रभवति तदल्पेन मनसा ।
तथाप्युद्दामोऽयं गुरुवरकृपासारविसरः
समन्तादुद्वेलं मुखरयति मामेव बहुधा ॥

अथास्य प्रबन्धस्य सुखादिरूपपुरुषार्थसाधकत्वाभावेन .....

... ...

जगदादरणीयत्वात्, (काव्यालापांश्च वर्जयेदिति निषेधश्रुते रसवत्काव्यविषयत्वे निर्दोषत्वात्?) काव्यालापांश्च वर्जयेदिति निषेधस्मरणाच्चेति चेन्मैवम् । अस्य प्रबन्धस्य रामायणादिवन्महापुरुषगुणव(न्न?र्णन)परतया सकलपुरुषार्थसाधकत्वेन (सुग्रत्वात्?)श्रोतृजनमनोरञ्जकत्वेनोपादेयत्वाच्च, स च सरसपदबन्धवाहितया कवेरपि निरवधिकानन्दसम्पादको भवति ।

End :

अत्र वसुमती युवतिरिवेति उपमालङ्कारे स्निग्धामिति विशेषणं बाधकम् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोग' इत्यनुशासनेन सामान्यप्रयोगस्य उपमासमासनिरोधकत्वात् ! अत्र पारिशेष्याद्रूपकालङ्कारः । एवं यथासम्भवमन्येषामलंकाराणां संसृष्टिसंकरौ ।

संक्षोभ्यतां मतिधनैर्मम तु प्रबन्धो
नान्यो यदत्र मधुरा बहवः पदार्थाः ।
आलोड्यते हि विबुधैर्विमलः पयोधि-
र्नान्यो वितीर्णकमलामणिकल्पभागः ॥

आचन्द्रतारमखिलामरमञ्जुवाणी-
पुञ्जेन वर्णितगुणानि भवद्यशांसि ।
नञ्जक्षितीन्द्र नयमार्गविधूततन्त्र
भूयो जयन्तु भुवनानि च रञ्जयन्तु ॥

वाणीयं भुवि वर्ततां बुधजनश्लाघ्या त्रिलोकीजुषां
सौभाग्यैकनिकेतनं च शशिनो वंशस्सदा वर्धताम् ।
देवश्चन्द्रकलाधरश्च दयया निर्व्याजमाप्यायितो
नित्यं नञ्जमहीमहेन्द्रहृदये वासं विधत्तां मुदा ॥

आत्मरतिरुमलकवेरभिनवभवभूतिनामविरुदस्य ।
सुहृदा नृसिंहकविना कृतिरकृत नवीनकालिदासेन ॥
करुणारसकल्लोलकलितापाङ्गवीक्षणम् ।
कन्दर्पजनकं धाम कल्याणानि करोतु नः ॥

Colophon :

इति श्रीपरमशिवावतारशिवरामदेशिकचरणारविन्दानुसन्धानमहिमसमासादितनिस्सहायदैनन्दिनप्रबन्धनिर्माणमाहसिकनिखिलविद्वज्जनलालनीयसरससाहितीसम्प्रदायप्रवर्तकनरसिंहकविविरचिते नञ्जराजयशोभूषणे अलंकारशास्त्रे अलंकारनिरूपणं नाम सप्तमो विलासः ।

नञ्जराजयशोभूषणं समाप्तम् ।

Author—Nṛsimhakavi *alias* Abhinavakāḷidāsa, son and disciple of Śivarāmasudhī.

Remarks—The illustrative verses are composed in praise of Nañjarāja, the son of Vīrabhū who flourished in the 17th century. The work has been published. The contents of chapters are noted below :

१. नायकनिरूपणम्
२. काव्यनिरूपणम्
३. ध्वनिनिरूपणम्
४. रसनिरूपणम्
५. दोषगुणनिरूपणम्
६. चन्द्रकलाकल्याणम्
७. अलङ्कारनिरूपणम्

॥ प्रतापरुद्रयशोभूषणम् ॥

1378. PRATĀPARUDRAYAŚOBHŪṢAṆAM.

Substance—Palm leaf. Size—11" × 1¾". Leaves—158. 9 lines per page and 36 letters per line. Script—Grantha. No. of Granthas — 3200. Complete.

Subject—Same as No. 1377.

Beginning:

हरिः ओम् । अविघ्नमस्तु ।

विद्याकैरवकौमुदीं श्रुतिशिरस्सीमन्तमुक्तामणिं
दागन् पद्मभुवस्त्रिलोकजननीं वन्दे गिरं देवताम् ।
यत्पादाब्जनमस्क्रियास्सुकृतिनां सारस्वतप्रक्रिया
बीजन्यासभुवो भवन्ति कवितानाट्यैकजीवातवः ॥

पूर्वेभ्यो भामहादिभ्यः सादरं विहिताञ्जलिः ।
वक्ष्ये सम्यगलंकारशास्त्रसर्वस्वसङ्ग्रहम् ॥ २ ॥

चिरेण चरितार्थोऽभूत् काव्यलंकारसङ्ग्रहः ।
प्रतापरुद्रदेवस्य कीर्तिर्येन प्रकाश्यते ॥ ३ ॥

रसप्रधानाश्शब्दार्था गुणालंकारवृत्तयः ।
रीतयश्चेयती शास्त्रप्रमेयं काव्यपद्धतिः ॥ ४ ॥

यद्यप्यसौ प्रबन्धेषु प्राचां साधु निरूपिता ।
तथप्यस्याः समं नेतुनोदाहरणमादृतम् ॥ ५ ॥

पुण्यश्लोकस्य चरितमुदाहरणमर्हति ।
न कश्चित्तादृशः पूर्वैः प्रबन्धाभरणीकृतः ॥ ३ ॥

प्रबन्धानां प्रबन्धृणामपि कीर्तिप्रतिष्ठयोः ।
मूलं विषयभूतस्य नेतुर्गुणनिरूपणम् ॥ ७ ॥

यथा (राम)गुणवर्णनं रामायणवल्मीकजन्मनोर्महाप्रतिष्ठाकारणम्; तथा महापुरुषवर्णनेन हि श्रेयस्करी प्रबन्धस्थितिः । यथा वेदशास्त्रपुराणादेर्हितप्राप्तिरहितनिवृत्तिश्च तथा सदाश्रयात् काव्यादपि ।

End:

बाधकं यथा—
काकतीन्द्रस्य निस्त्राणध्वनौ दिक्षु विजृम्भिते ।
व्याकुलीकृतसत्त्वोऽभूत् प्रतिपक्षबलार्णवः ॥

अत्र प्रतिपक्षबलार्णव इत्युपमाया व्याकुलीकृतसत्त्व इति बाधकं प्रमाणम् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोग' इत्यनुशासनेन सामान्यप्रयोगस्योपमाबाधकत्वात् । अतः पारिशेष्याद्रूपकालङ्कारः । एवं यथा सम्भवमन्येषामलङ्काराणां संसृष्टिसङ्करौ बोद्धव्यौ तत्र तत्र प्रबन्धेषु ॥

Colophon:

इति विद्यानाथमहोपाध्यायकृतौ प्रतापरुद्रयशोभूषणेऽलङ्कारशास्त्रे मिश्रालङ्कारप्रकरणं समाप्तम् ।

हरिः ओम् ।

प्रतापरुद्रीयं नामालङ्कारशास्त्रं समाप्तम् ।

Author—Vidyānāthamahopādhyāya.

Remarks—All the illustrative verses extol the greatness of Pratāparudra of Ekaśilā, the

modern Warangole, about 8 miles N. N. E. of Hyderabad. His date has been assigned by Sewell to the period between 1295—1323 A. D. and by Śeṣagiri Śāstrī between 1268—1319 A. D. (Vide p. 230. HSP. Vol. I). The work is referred to as No. 35 in Śeṣagiri Śāstri's Report No. 2. It is printed in BSS.

॥ बालरामवर्मयशोभूषणम् ॥

1379. BĀLARĀMAVARMAYAŚOBHŪṢAṆAM.

Substance—Palm leaf. Size—$19\frac{7}{8}'' \times 2\frac{1}{4}''$. Leaves—108. 8—12 lines per page and 60 letters per line. Script—Grantha. No. of Granthas—4000.

Subject—Same as No. 1377.

Beginning :

महागणपतये नमः ।

क्षीराब्धेः परिगृह्य रत्नयुगलं श्रीकौस्तुभाख्यं नयन्
वक्षस्तत्प्रतिबिम्बकल्पितपराशङ्कारुणामिन्दिराम् ।
आकारैरुपलालयन्ननुपदं श्रीपद्मनाभो विभु-
र्लोकानुग्रहतत्परो वितरतु श्रेयांसि भूयांसि वः ॥

वल्मीकजन्ममुनये कविलोकमूल-
कन्दाय धातृकरुणाङ्कुरितप्रवाचे ।
तस्मै नमोऽस्तु रघुनाथकथोपकल्प-
सत्काव्यकल्पकतरुः सफलो यतोऽभूत् ॥

महाकविभ्यः पूर्वेभ्यो नमोवाकमुदीरयन् ।
वक्ष्येऽलङ्कारशास्त्रार्थतत्त्वसारं यथामति ॥
प्रबन्धोऽयं सहृदयप्रियो भवितुमर्हति ।
यतः श्रीरामवर्मेन्द्रगुणसंसर्गतः कृती ॥
अत्र प्रमेयं काव्यज्ञमर्यादैकनिबन्धनम् ।
रसप्रधानाः शब्दार्था गुणालङ्कारवृत्तयः ॥

End :

कुवलयोल्लसनैकदृढव्रतो
मुखविधुः किल वञ्चिमहीशितुः ।
असितचन्द्रिकया प्रकृतिव्रजे
क्षणचकोरतृपं विनिहन्त्यलम् ॥

अत्र मुखविधुरित्यत्र उपमायाः कुवलयोल्लसनैकदृढव्रत इति बाधकं प्रमाणम् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोग' इत्यनुशासनेन सामान्यप्रयोगस्य उपमाबाधकत्वात् । अतः परिशेषाद्रूपकालङ्कारः । एवं यथासम्भवमन्येषामप्यलङ्काराणां संसृष्टिसङ्करौ बोद्धव्यौ तत्र तत्र प्रबन्धेषु ।

आकल्पमादिमरसोचितभावबन्धां
भूकन्यकामणिमिमां भुजकेलिधाम्नि ।
प्रेम्णाब्जनाभशरणागतवज्रिबाल-
श्रीरामवर्मकुलशेखरराड् बिभातु ॥

Colophon :

इति श्रीसदाशिवदीक्षितकृतौ अलङ्कारशास्त्रे श्रीपद्मनाभदासवञ्चिबालरामवर्मकुलशेखरभूपालयशोभूषणेऽलंकारप्रकरणं सम्पूर्णम् ॥

अचमत्कृतिरपि मत्कृति-
रङ्गीकारात्तवेयमयि धन्या ।
अखिला सकला कुशला-
प्यनुरागादिव कुलाङ्गना भर्तुः ॥

शुभमस्तु । श्रीरामाय नमः ।

शेषाद्रेर्हस्तलेखः ।

Author—Sadāśivadīkṣita.

Remarks—This is a treatise on poetics, the principles of which are illustrated from the point of view of Bālarāmavarmā who is represented as an embodiment of all good qualities. Daśarūpakas are exemplified herein by means of a drama, styled Vasulakṣmīkalyāṇa with five acts, wherein the hero is none other than Bālarāmavarma Kulaśekhara. Its preface points out that the author was the son of Chokkanātha Dīkṣita.

॥ बालरामवर्मयशोभूषणम् ॥

1380. BĀLARĀMAVARMAYAŚOBHŪṢAṆAM.

Substance—Palm leaf. Size—14¼″ × 1¾″. Leaves—165. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—4000. Complete.

Subject—Same as No. 1377.

Beginning etc.—Same as No. 1379.

॥ रसगङ्गाधरः ॥

1381. RASAGAṄGĀDHARA.

Substance—Palm leaf. Size—22″ × 2″. Leaves—44. 13 lines per page and 100 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject—Explication of the principles of poetics.

Beginning :

नमस्तुरगतुण्डाय चण्डपाण्डित्यदायिने ।
खण्डितारातये तुभ्यं पुण्डरीकामलत्विषे ॥

श्रीहयग्रीवाय नमः । श्रीसरस्वत्यै नमः ।

स्मृतापि तरुणा(त)पं करुण(या)हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् ।
कलिन्दनगनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतनिखिलब्रह्मविद्याप्रपञ्चः
काणादीराक्षपादीरपि गरिमगिरो यो महेन्द्रादवेदीत् ।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलफणितिरभूत् सर्वविद्याधरो यः ॥

पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥

निमग्नेन क्लेशेन न जल(नि)धेरन्तरुदरं
मयोन्नीतो लोके ललितरसगङ्गाधरमणिः ।
हरन्नन्तर्ध्वान्तं हृदयमधिरूढो गुणवता-
मलङ्कारान् सर्वानपि गलितगर्वान् रचयतु ॥

परिष्कुर्वन्त्वर्थान् हृदय...धुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भविता ।
तिमीन्द्रास्संक्षोभं विदधतु पयोधेः पुनरिमे
किमेतेनायासो भवति विफलो मन्दरगिरेः ॥

निर्म्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किञ्चित् ।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननशक्तिमता मृगेण ॥

मननतरितीर्णविद्यार्णवो जगन्नाथपण्डितनरेन्द्रः ।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम् ॥
रसगङ्गाधरनामा सन्दर्भोऽयं चिरं जयतु ।
किञ्च कुलानि कवीनां निसर्गसम्यञ्चि रञ्जयतु ॥

श्रीरघुनन्दनाय नमः ।

तत्र कीर्तिपरमाह्लादगुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य व्युत्पत्तेः कविहृदयाधारावश्यकतया गुणालङ्कारादिभिर्निरूपणीये तस्मिन् विशेष्यतावच्छेदकं तदितरभेदबुद्धौ साधनञ्च तल्लक्षणं तावत् निरूप्यते । रमणीयार्थप्रतिपादकः शब्दः काव्यम् ।

End :

मधुद्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित्केषाञ्चिन्न खलु विदधीरन्निह मुदम् ।
ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथफणितिः ।

अथ सन्देहः—

सादृश्यमूलाभासमानविरोधकसमबलनानाकोट्यवगाहिनी धीरमणिर्या सा सन्देहालङ्कृतिः—

अधिरोप्य हरस्य हन्त चापं
परितापं प्रशमय्य बान्धवानाम् ।
परिणेष्यति वा न ...

Colophon :

इति रसगङ्गाधरे परिणामप्रकरणम् ।

Author—Jagannāthapaṇḍita.

Remarks—The work has been published in the Kāvyamālā Series, N. S. Press, Bombay. The Ms. is in good condition and the script is small but legible. The author passed his youth under the patronage of Shāh Jahān who reigned from 1628 to 1658 A. D. and from whom he received the title of Paṇḍitarāja. It may therefore be presumed that his literary activity was confined to the 2nd and 3rd quarters of the 17th century. Vide p. 274—76. HSP. Vol. I.

॥ रसमञ्जरी ॥

1382. RASAMAÑJARĪ.

Substance—Palm leaf. Size—9″ × 2″. Leaves—27. 9—10 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—500.

Subject—Exposition of the principles of Rasa and characterisation of heroes and heroines.

Beginning :

श्रीगणपतये नमः ।
आत्मीयं चरणन्दधाति पुरतो निम्नोन्नतायां भुवि
स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशङ्कया ।

तल्पे किञ्च मृगत्वचा विरचिते निद्राति भागैर्निजै-
रन्तः प्रेमभरालसः प्रियतमामङ्के दधानो हरः ॥

विद्वत्कुलमनोभृङ्गरसव्यासङ्गहेतवे ।
एषा प्रकाश्यते श्रीमद्भानुना रसमञ्जरी ॥

तत्र रसेषु शृङ्गाररसस्याभ्यर्हितत्वात् तदालम्बनविभावत्वेन नायिका तावन्निरूप्यते । सा त्रिविधा । स्वीया परकीया सामान्या चेति । तत्र स्वामिन्येवानुरक्ता स्वीया । न च परिणीतायां परगामिन्यामव्याप्तिः । तत्र पतिव्रताया एवाभ्यर्हितत्वात्तस्याः परगामितया परकीयात्वमपि सम्भवति ।

End :

चित्रदर्शनं यथा ।

नीवीं हरेदुरसिजं विलिखन्नखेन
दन्तच्छदञ्च दशनेन दशेदकस्मात् ।
इत्थं हि चित्रलिखितं दयितं विलोक्य
बाला पुरेव न जहाति विहारशङ्काम् ॥

साक्षादर्शनं यथा—

चेतश्चञ्चलतां त्यज प्रियसखि व्रीळे न मां पीडय
भ्रातर्मुञ्च दृशौ निमेष भगवन् काम ! क्षणं क्षम्यताम् ।
बर्हं मूर्धनि कर्णयोः कुवलयं पाशं दधानः करे
सायं लोचनगोचरो भवति मे दामोदरः सुन्दरः ॥

Colophon :

माध्वीकस्यन्दसन्दोहसुन्दरीं रसमञ्जरीम् ।
कुर्वन्तु कवयः कर्णभूषणं कृपया मयि ॥

तातो यस्य गणेश्वरः कविकुलालङ्कारचूडामणि-
देंशो यस्य विदेहभूः सुरसरित्कल्लोलकिर्म्मीरितः ।
गद्येन स्वकृतेन तेन कविना श्रीभानुना योजिता
वाग्देवी श्रुतिपारिजातकुसुमस्पर्धाकरी मञ्जरी ॥

श्रीमत्सकलविद्वत्कविपटलपटुतरमकुटतटघटितानर्घमणिमरीचि-पुञ्जपिञ्जरितचरणारविन्दयुगळश्रीभानुमिश्रविरचिता विद्वज्जन-कर्णभूषणभूता रसमञ्जरी समाप्ता ।

Author—Bhānudatta *alias* Bhānumiśra, son of Gaṇeśvara.

Remarks—The author's date may be assigned to a period earlier than the middle of the 14th century but later than the 12th. (Vide p. 249. HSP. Vol. I). His native country is noted herein as Videha. The work has been published in Benares. It is identical with No. 680, TCM. Vol. I. Part I. C.

॥ रसमञ्जरी ॥

1383. RASAMAÑJARĪ.

Substance—Palm leaf. Size—8″ × 2″. Leaves—39. 8—9 lines per page and 22—25 letters per line. Script—Malayāḷam. No. of Granthas—500.

Subject etc.—Same as No. 1382.

Remarks—The Ms. is in good condition and the letters are legible.

॥ रसविवेकः (काव्यादर्शः) ॥

1384. RASAVIVEKA

Substance—Palm leaf. Size—16″×2″. Leaves—25. 9 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—1125.

Subject—Description of Rasa (artistic delectableness) and its essentials.

Beginning :

जयत्यप्राकृतं ज्योतिर्दूरं वाक्चेतसोरपि ।
(वि)वृतिं (यस्य मन्यन्ते बुधाः) शब्दार्थरूपिणीम् ॥
इदमस्तु नमस्तस्मै (दक्षिणा)मूर्तिसूरये ।
(यत्पादपद्म)रजसा जगदासीत्परोरजः ॥
जय ... ... सृहृदां स्वानन्दसंविदावेद्यम् ।
यदुदाहरन्ति कवयो ब्रह्मास्वादस्य नेदिष्ठम् ॥
जयति स भावो योऽसौ समस्तसाधारणैरुपायैस्तैः ।
श्रोतृप्रेक्षकवर्गं नाय(कव)द्रसमयं कुरुते ॥
यो लौकिको ... ... सिद्धोऽप्यकार्यभूतश्च ।
सविकल्पोऽप्यविकल्पः सरसः केनोपमीयते कविना ॥
स्वानन्दसंविद्रूपस्य पुळकाङ्कुरसाक्षिणः ।
विरलाः खलु बोद्धारो रसस्य ब्रह्मणो यथा ॥

End :

अविरलकरवालकम्पनै-
भ्रंकुटीतर्जनगर्ज(नै)र्मुहुः ।
ददृशे (तव वै)रिणां मदः
स गतः क्वापि तवेक्षणे क्षणात् ॥

अत्र भावस्य प्रशमः ।

साकं कुरङ्गकदृशां मधुपानलीलां
कर्तुं सुहृद्भिरपि वैरिणिके प्रवृत्ते ।
अन्याभिधायि त(व नाम) विभो गृहीतं
(केनापि तत्र विदुषा)मकरोदवस्थाम् ॥

अत्र त्रासस्योदयः ।

असोढा तत्काढोच्छ्वसदसहभावस्य तपसः
कथानां विस्रम्भेष्वथ च रसिकः शैलदुहितुः ।
प्रमोदं वो दिश्यात्कपटबटुवेषापनयने
त्वराशै(थिल्या)भ्यां (युगपदभियुक्तः) स्मरहरः ॥

अत्रावेगधैर्ययोः सन्धिः ।

पश्येय कञ्चिच्चल चपल रे का त्वराहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः
क ... ...नाभिधत्ते ॥

अत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्याचिन्तौत्सुक्यानां शबलतेत्यस्य भावाङ्गत्वम् ।

इत्थं रसात्मार्थैः विविध प्रकारैः
निरूपितो ... ...पूर्व्या ।
ज्ञात्वा यदीयं रसिकः प्रयोगं
प्रमोदते शब्दमये विवर्ते ॥

Colophon :

इति रसविवेकनाम्नि काव्यादर्शे रससम्भेदविचारो नाम तृतीय उल्लासः । पूर्णोऽयं रसविवेको नाम ग्रन्थः ।

Author : Br. of Saujanya bhūṣaṇa kavi; disciple of Dakṣiṇāmūrti.

Remarks—The Ms. is very old and decayed but the script is legible. It is identical with No. 589, TCM. Vol. I. Part I. C. The word Kāvyādarśa in the colophon refers only to the literary aspects and not to the title. The author was the brother of Saujanyabhūṣaṇakavi and a disciple of Dakṣiṇāmūrtīsūri. (Vide p. 805, TCM. Vol. I. Part I.C.)

॥ रसविवेकः ॥

1385. RASAVIVEKA.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—87. 7—8 lines per page and 28—32 letters per line. Script—Malayāḷam. No. of Granthas—1125.

Subject etc.—Same as No. 1384.

Remarks—Same as No. 1183.

॥ रसार्णवसुधाकरः ॥

1386. RASĀRṆAVASUDHĀKARA.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—143. 8 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—3000.

Subject—Rules of poetics with illustrations.

Author—Śṛṅgabhūpa.

Remarks—This Ms. is much decayed. It is published as No. 50 in TSS.

॥ रसार्णवसुधाकरः ॥

1387. RASĀRṆAVASUDHĀKARA.

Substance—Palm leaf. Size—11″ × 2″. Leaves—102. 8 lines per page and 32—44 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Subject etc.—Same as No. 1386.

Remarks—The Ms. comprises the first two chapters only.

॥ रसिकरञ्जिनी (कुवलयानन्दव्याख्या) ॥

1388. RASIKARAÑJINĪ.

Commentary on Kuvalayānanda.

Substance—Palm leaf. Size—19″ × 1¾″. Leaves—145. 9 lines per page and 60 letters per line. Script—Grantha. No. of Granthas—4850.

Subject—Explication of Kuvalayānanda.

Beginning:

अविघ्नमस्तु । श्रीगुरुभ्यो नमः । श्रीमहासरस्वत्यै नमः ।
श्रोतॄणां निरन्तरायव्याख्यानश्रवणप्रचयगमनार्थं श्रीमन्ना-

रायणानुस्मरणलक्षणं मङ्गलं निबध्नाति उद्घाट्येति । हृदयाब्जकोशं हृत्पद्मकलिकां योगकलया योगाभ्यासपाटवेन उद्घाट्य विकासं प्रापय्य चिरं धन्यैः चिरकालसन्ततततपोबललब्धसुकृतपरिपाकशालिभिः पुरुषधौरेयैः यथारुच्यनुसन्धेयत्वेनागमसिद्धानां नीवारशूकाङ्गुष्ठप्रमाणादिपरिमाणानां तत्तदुपासनोपकरणगतानां स्वस्वरुच्यनुसारेण तेन तेन परिमाणेन गृह्यमाणः—

End :

चन्द्रालोकनाम्नो ग्रन्थस्य सर्वोत्कर्षेण वर्तनवर्णनात् तद्भावाविष्करणरूपस्य स्वग्रन्थस्य इतरग्रन्थापेक्षया आधिक्यप्रतीतेरर्थशक्तिमूलोपस्कृतव्यतिरेकध्वनिश्चेति शिवम् ।

श्रीदेवसिंहसुमनेस्तनयः प्रतीतः
श्रीविश्वरूपयतिराजकृपानुबन्धी ।
श्रीचन्द्रचूडचरणाम्बुजगर्भदासो
गङ्गाधरोऽध्व(? रि)वरः श्रुतपारदृश्वा ॥
स्वां वैदुषीं प्रथयितुं विबुधावलीना-
मप्पय्यदीक्षितकृतेर्विवृतिच्छलेन ।
तास्ताः पुरातनकृतीः परिशील्य टीका-
मेनां व्यधात् कृतधियः परिशीलयन्तु ॥

इयं कुवलयानन्दटीका रसिकरञ्जिनी ।
अर्पिता पुष्पमालेव चन्द्रचूडपदाम्बुजे ॥

Colophon :

श्रीमद्धाभूलवंशमुक्ताफलतिलकश्रीदेवसिंहसुमतिनन्दनस्य श्रीविश्वरूपेन्द्रगुरुचरणदिव्यकरुणाकटाक्षवीक्षासंप्रसादितसकलविद्यावैशारद्यस्य श्रीमत्साग्निचित्यवाजपेययाजिगङ्गाधरमनीषिणः श्री-

मद्भारद्वाजकुलजलधिकौस्तुभश्रीमदप्पय्ययज्वावतंसविरचितकु-
वलयानन्दटीका रसिकरञ्जिनी समाप्ता ।

1058 വർഷം ആനിമാസം 18-ാനു- എഴുതിയതു്. ശെ
ങ്കോട്ടൈ വെങ്കിട്ടരാമയ്യൻ.

Author—Gaṅgādhara.

Remarks—The work has been printed and published in Kumbhakoṇam. It is identical with No. 388, TCM, Vol. I. Part I B but the benedictory verses therein are missing in this Ms.

॥ लोचनम् (ध्वन्यालोकव्याख्या) ॥

1389 A. LOCANAM.
Commentary on Dhvanyāloka.

Substance—Palm leaf. Size—11″×2″. Leaves—70. 13 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject—Explication of the theories of Dhvani and Rasa.

Beginning:

र्थ्याप्रतीतिमात्रं नतु तत्कृता काचि ... ... त्व-
निष्पत्तिरिति न प्राधान्यम् । पर्यायोक्ते हि यदि प्राधान्येन
व्यङ्ग्यत्वं तद् भवतु नाम । तस्य ध्वनावन्तर्भावः । नतु
ध्वनेस्तत्रान्तर्भावः । तस्य महाविषयत्वेन चाङ्गित्वेन च प्रति-
पादयिष्यमाणत्वात् ।

End :

अथवा ज्ञानमेव ध्वनिलक्षणम्; लक्षणस्य ज्ञानपरिच्छेद्यत्वात् । वृत्तावेवकारेण ततोऽन्यदविभासरूपमेवेति सूचयता तदाभासविवेक-हेतुभावो यः प्रक्रान्तः स एव निर्वाहित इति सर्वं शिवम् ।

प्राज्यं प्रोल्लासमात्रं सद्भेदेनासूत्र्यते यया ।
वन्देऽभिनवगुप्तोहं पश्यन्तीं तामिदं जगत् ॥

Colophon :

इति महामहेश्वराभिनवगुप्तोन्मीलिते सहृदयालोकलोचने द्वितीयोद्योतः ।

Author—Abhinavaguptācārya.

Remarks—The Ms. is much decayed. It comprises only the first two *Udyotas*. It has been published in the Kāvyamālā Series. The opening three leaves are missing. The author's date may be assigned to the period between the close of the 10th century and the beginning of the 11th. He is the author of Abhinavabhāratī, a commentary on Nāṭyaveda and of many treatises on Kāśmir-Śaivaism and on poetics.

॥ लोचनव्याख्या ॥

1389 B. LOCANAVYĀKHYĀ.

Substance—Palm leaf. Size—11″ × 2″. Leaves—24. 12—16 lines per page and 60 letters per line. Script—Malayāḷam, No. of Granthas—1300,

Subject—Explanation of Locana, a commentary on Dhvanyāloka.

Beginning:

अविघ्नमस्तु ।

कारुण्यस्फुरणं चन्द्रकलापुष्पजटावनम् ।
समग्रं मृगशावाक्ष्यास्सर्वस्योपरिवर्तते ॥
को नामात्र परिच्छिन्द्याल्लोचनप्रसराशयम् ।
तदप्येतस्य दिङ्मात्रमभिव्य.....मुपक्रमे ॥

अथ श्रीमदभिनवगुप्ताचार्यपादा ध्वनिग्रन्थव्याख्यानारम्भे मङ्गलमाचरन्ति—अपूर्वं यद्वस्त्वित्यादिना ।

End:

अयं व्याख्यानग्रन्थश्च लोको भुवनं आलोकश्चायं ध्वनिग्रन्थः चन्द्रिका ज्योत्स्ना । ध्वनिव्याख्यानग्रन्थश्चान्यः । लोचनोन्मीलनं उन्मीलितं लोचनमिति यावत् । आलोकस्य शोभाग्रहणं वा उन्मीलितेन लोचनेनानेनेत्यर्थः । यदुन्मीलनेति उन्मीलनयुक्त्या उन्मीलति स्फुरति । स्वस्वायतनविश्रान्तां स्वस्वरूपावस्थिताम् ।

Colophon:

शिवम् ।
इति प्रथमोद्योतः ।

श्रीगुरोः पदपयोजपावनो-
दाररेणुपरिरूपिताङ्गकः ।
श्रीकटाक्षमधुपावलिप्रभा-
भास्वरोऽनुदिवसं (जननं)भवान्यहम् ॥

Author : Diff. from Uttungoolay's C.

Remarks—The commentary extends up to the end of the first *Udyota* only. This Ms. and the one noticed as No. 12895, in Vol. XXII, DCSM. differ in the introductory portions. But it is identical with R. No. 2680 MTC Vol. III, part I C.

॥ अलंकारसर्वस्वविवृतिः (सव्याख्या) ॥

1389 C. ALAṄKĀRASARVASVAVIVṚTI with commentary.

Substance—Palm leaf. Size—11″ × 2″. Leaves—5. 13 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—225.

Subject—The principles of poetics.

Beginning :

अविवक्षितवाच्यस्य पदवाक्यप्रकारता ।
तदन्यस्यानुरणनरू(पव्यङ्ग्यस्य च ध्वनेः ॥
अनिष्टस्य ... ... ।
... ...द्वदिष्टस्मृतिर्गुणाः ॥
पदानां स्मारकत्वेऽपि पदमात्रावभासितः ॥
तेन ध्वनेः प्रभेदेष्टसर्वे... ... ... ॥
... ... व कामिनी ।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ॥

End :

अङ्गाङ्गिभावात् सन्देहात् प्रवेशादेकवाचके ।
त्रिधा तु सङ्करः शब्दालंकृत्योरेकवाचके ॥
तत्र पुनरुक्तवदाभासोऽर्थस्य पौनरुक्त्ये ।

Colophon :

अलङ्कारसर्वस्वसूत्रविवृतिः ।

Author—Śrividyācakravartin.

Remarks—This is a commentary on Alaṅkāra-sarvasva in the form of metrical *kārikas*.

॥ ध्वनिसंग्रहः ॥

1389 D. DHVANISAṄGRAHA.

Substance—Palm leaf. Size—11″ × 2″. Leaf—$\frac{1}{2}$. 10 lines per page and 56 letters per line. Script—Grantha. No. of Granthas — 18.

Subject — A compendium of the principles of Dhvani, set forth in Dhvanyāloka.

Beginning :

प्रणम्य ..... मीशानं श्रवणानुगुणक्रमम् ।
तीर्थं व्यङ्ग्यामृताम्भोधेः करोमि ध्वनिसंग्रहम् ॥
स्वयं कृतार्थो व्याख्यातृश्रोतृणामिष्टसिद्धये ।
आदावीश्वरसांमुख्यमाशिषाकृत वृत्तिकृत् ॥
व्यङ्ग्येऽथ व्यापृते काव्ये तथा शब्दार्थयोर्ध्वनिः ।

End :

एवं सत्तां प्रसाध्याथ प्राधान्यमपि साध्यते ।
व्यङ्ग्यावलम्बनेनैव महत्वं स्यात् कवेरिति ॥
उपायत्वेन वाच्यस्य पूर्वोपादानयोग्यता ।
दीपप्रकाशदृष्टान्तयोजनेन समर्थिता ॥
... ...

Colophon :

Author :

Remarks—The work is identical, with No. 3396 (b) TCM. Vol. IV, Part I. B. wherein it is designated Dhvanyālokasaṅgraha. It has been published in the Kāvyamālā Series.

॥ काव्यालङ्कारसूत्रं (सवृत्तिकम्) ॥

1389 E. KĀVYĀLAṄKĀRASŪTRAVṚTTI.

Substance—Palm leaf. Size—11″ × 2″. Leaves—11. 12 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—475.

Subject—Beginning—Same as No. 1359.

End :

विस्तारशालिनीति । पत्रपत्रं पलाशोपरचितममत्रं भानि ताराः भक्तमन्नं घनं श्रितं अत्र ग्राम्यजनोक्तौ समस्तपदार्थविषयत्वात् समस्त. . . .

Colophon :

Author—Same as No. 1359.

Remarks—The Ms. is very old. It extends up to the 3rd chapter in the fourth *Adhikaraṇa*.

॥ लोचनम् (ध्वन्यालोकव्याख्या) ॥

1390. LOCANAM.

Commentary on Dhvanyāloka.

Substance—Palm leaf. Size—$14\frac{3}{4}'' \times 4\frac{1}{8}''$. Leaves—93. 9 lines per page and 48—56 letters per line. Script—Malayāḷam. No. of Granthas—2750. Incomplete.

Subject—Same as No. 1389 A.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात्सारयति च ।
क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥

भट्टेन्दुराजचरणाब्जकृताधिवास-
हृद्यश्रुतोऽभिनवगुप्तपदाभिधोऽहम् ।
यत्किञ्चिदप्यनुरणन् स्फुटयामि काव्या-
लोकं स्वलोचननियोजनया जनस्य ॥

स्वयमव्युच्छिन्नपरमेश्वरनमस्कारसम्पत्तिचरितार्थोऽपि व्याख्यातृ-श्रोतृणामविघ्नेनाभीष्टव्याख्याश्रवणलक्षणफलसम्पत्तये समुचिताशीः-

प्रकटनद्वारेण परमेश्वरसाम्मुख्यं करोति वृत्तिकारः स्वेच्छेत्यादिना ।

End :

बाध्यत्वाभिप्रायं व्याचष्टे—बाध्यत्वं हीति । अङ्गभावाभिप्राय ... ... चष्टे । तत्र प्रथमं स्वाभाविकप्रकारं निरूपयति । तदङ्गानङ्गिनामिति निरपेक्षभावतया सापेक्षभावविप्र(लम्भशृङ्गारावरोधि)न्यपि करुणे (ये न्या)ध्यादयस्सर्वथा(ङ्गत्वेन) दृष्टाः । तेषामिति । ते हि करुणे भवन्त्येव त एव च भवन्तीति शृङ्गारे तु (भवन्त्ये)व नापि त एवेति । अतदङ्गादीनामिति यथाल(स्यौ ग्रयजु)गुप्मादीनामित्यर्थः । तदङ्गत्वे चेति सर्व एव शृङ्गारे व्यभिचारिण इत्युक्तत्वादिति (भावः) ।

Colophon :

इति महामहेश्वराभिनवगुप्ताचार्यविरचिते सहृदयालोकलोचने द्वितीय उद्योतः ।

Remarks—The Ms. is very much decayed. The commentary breaks off on Śṛṅgāropanyāsa in the third *Udyota*.

॥ लोचनम् (ध्वन्यालोकव्याख्या) ॥

1391. LOCANAM

Commentary on Dhvanyāloka.

Substance—Palm leaf. Size—18$\frac{3}{4}$" × 1$\frac{3}{4}$". Leaves—150. 8 lines per page and 52 letters per line. Script — Grantha. No. of Granthas — 3900. Complete.

Subject—Same as No. 1389 A.

Beginning—Same as No. 1390.

End :

तदभिप्रायेणाहानन्दवर्धन इति (प्रथित)शब्देनैवेदं प्रथितम् । यत्तु तदेव नामश्रवणं केषाञ्चिन्निवृत्तिं करोति तन्मान्मर्यविजृम्भितं (नात्र).... ....यं) निःश्रेयसप्रयोजनादेव विश्रुतात् कोऽपि रागान्धो यदि (निवर्तेत) किमेतावता प्रयोजनमवक्तव्यमेव स्यात् । तस्मादर्थिनां प्रवृत्त्यङ्ग(नाम प्र)थितमिति सिद्धम् ।

स्फुटी(भूतार्थवैचित्र्य बहिः) प्रसरदायी(नीम्) ।
तुल्यां शक्तिमहं वन्दे प्रत्यक्षार्थनिवेशिनीम् ॥

आनन्दवर्धनविवेकविपाथिकाया?
लोकार्थतत्त्वघटनादनुमेयसारम् ।
यत्प्रो(न्मिषत्सकल)सद्विप(यप्रकाशी
(व्यापार्यताभिनवगुप्त) विलोचन (....) ॥

(इत्याह ।

... ...
... ...
... ...

(सज्जनान्)कविर)सौ न याचते ह्लादनाय)शशभृत् किमर्थितः ।
नैव (निन्दति) खलान्महुर्मुहुर्धिक्कृतोऽपि नहि शीतलोऽनलः ॥
वस्तुत ....वमये हृदि स्फुटं स....जीवायं विराजते ।
नागीवं .....चरकस्य (विद्वचः) तेन वः .....भवेत् ॥

Colophon :

इति महामाहेश्वराचार्याभिनवगुप्तविरचिते काव्यालोकलोचने चतुर्थ उद्योतः ।

तुङ्गप्रज्ञो हतग्लानिः श्रद्धा(हीनोऽध्व)नोऽखनिः ।
लोचनोक्तश्रुतमनो मम स्थायि परास्त्वनुत् ॥
ज्ञानदार्ढ्यं ध्वनौ ध्यानेनैव लोचनगामिना ।
गुरो-र्लेखिता धार्या शिवाय धनिकारिका ॥

हरिः । ओम् ।

कौण्डि(ल्य?न्य)कुलसम्भूतस्त्रीश्वरोध्वरिनन्दनः ।
श्रीनिवासेऽलिखद्यज्ञा शिवाय ध्वनिलोचनम् ॥

हरिः । ओम् ।

Author—Same as No. 1389. Abhinavagupta

Remarks—The colophon furnishes the name of the scribe.

॥ लोचनम् (ध्वन्यालोकव्याख्या) ॥

1392. LOCANAM.

Commentary on Dhvanyāloka.

Substance—Palm leaf. Size—13¾″ × 2″. Leaves—134. 9 lines per page and 52—56 letters per line. Script—Malayāḷam. No. of Granthas—3900. Complete.

Subject—Same as No. 1389 A.

Beginning—Same as No. 1390.

End etc.—Same as No. 1391.

Remarks—The Ms. is in good condition.

॥ व्यक्तिविवेकः ॥

1393. VYAKTIVIVEKA.

Substance—Palm leaf. Size—19″ × 2″. Leaves—160. 8 lines per page and 72 letters per line. Script — Grantha. No. of Granthas — 5700.

Subject—Discussion on Dhvani in terms of *Inference*.

Author—Rājānaka Mahimabhaṭṭa.

Remarks—The work has been published as No. 5 in TSS.

॥ शृङ्गारतिलकम् ॥

1394. ŚṚṄGĀRATILAKAM.

Substance—Palm leaf. Size—16″ × 2″. Leaves—16. 8 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—450. Incomplete.

Subject—The principles of poetics.

Beginning :

शृङ्गारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे
वीभत्सोऽस्थिभिरुत्फणी भयकरो मूर्त्यादद्भुतस्तुङ्गया ।
रौद्रो दक्षविमर्दने च हसकृन्नग्नः प्रशान्तश्चिरा-
दित्थं सर्वरसाश्रयः पशुपतिर्भूयात्सतां भूतये ॥

आख्यातनामरचनाचतुरश्रसन्धि-
सद्वागलङ्कृतिगुणं सरसं सुवृत्तम् ।
आसेदुषामपि दिवं कविपुङ्गवानां
तिष्ठत्यखण्डमिह काव्यमयं शरीरम् ॥

काव्ये शुभे विरचिते खलु नो खलेभ्यः
कश्चिद् गुणो भवति कर्तुरसाम्प्रतं हि ।
कुर्यात्तथापि सुजनार्थमिदं यतः किं
यूकाद् भयेन परिधानविमोक्षणं स्यात् ॥

सानन्दप्रमदाकटाक्षविशिखैर्येषां न भिन्नं मनो
यैस्संसारसमुद्रपारविधुरेष्वन्येषु पोतायितम् ।
यैर्निस्सीमसरस्वतीविलसितद्वित्रैः पदैः संवृतं
तेषामप्युपरि स्फुरन्ति मतयः कस्यापि पुण्यात्मनः ॥

प्रायो नाट्यं प्रति प्रोक्ता भरताद्यै रसस्थितिः ।
यथामति तथाप्येषा काव्यं प्रति निगद्यते ॥

End :

नातिगूढार्थसंपत्तिश्राव्यशब्दमनोरमा ।
वीरे रौद्रेऽद्भुते शान्ते वृत्तिरेषा मता यथा ॥

लक्ष्म्याः स(त्व?)ज्जनको निधिश्च पयसां निश्शेषरत्नाकरो
मर्यादानिरतस्त्वमेव जल.....तेऽत्र कोऽन्यादृशः ।
किन्त्वेतस्य गृहागतस्य वडवावह्नेस्सदा तृष्णया
क्लान्तस्योदरपूरणेऽपि न महोवृत्तिर्म्मनाङ्मध्यमः ॥

स्फारितोत्करकठोरताम्फुरत्-
कीर्णवह्निकणसन्ततिः क्रुधा ।

दुर्निमित्तघटिताकृतिर्वभौ
दृष्टिरिष्टसमरांशुमालिनः ॥

अत्यद्भुतं नराधिप! कीर्तिधवलयन्त्यपि जगन्ति ।
रक्तान्कुरुते सुहृदो मलिनयते वैरिवदनानि ॥

निवृत्तविषयासङ्गा मधुराः सुचिराय मे ।
आत्मन्येव समाधानं मनः केवलमिच्छति ॥

प्रधानपुरुषप्राया या वक्रोक्तिर्निरन्तरा ।
भारतीयं भवेद् वृत्तिर्वीरहास्याद्भुताश्रया ॥

जन्म देव वयवेदनात्मकं.....

Colophon :

इति रुद्रटाचार्यविरचिते शृङ्गारतिलके विप्रलम्भशृङ्गारो नाम द्वितीयः परिच्छेदः ।

Author—Rudraṭācārya.

Remarks — The Ms. is very much decayed. It ends on a fragment of the third chapter. The leaves 248—263 are alone numbered herein. The work has been published in the Kāvyamālā Series. The author flourished in the latter half of the 9th century.

॥ शृङ्गारतिलकम् ॥

1395. ŚṚṄGĀRATILAKAM.

Substance—Palm leaf. Size—7″ × 2″. Leaves—45.

8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—450.

Subject etc.—Same as No. 1394.

Remarks—The Ms. is in good condition. The script is legible.

॥ सम्प्रदायप्रकाशिनी (काव्यप्रकाशवृहट्टीका) ॥

1396. SAMPRADĀYAPRAKĀŚINĪ.
Commentary on Kāvyaprakāśa.

Substance—Palm leaf. Size—13½″ × 2″. Leaves—126. 8—11 lines per page and 41 letters per line. Script—Grantha. No. of Granthas—3500.

Subject—Elucidative exposition of Kāvyaprakāśa.

Author—Vidyācakravartī.

Remarks—The Ms. has been utilised for its publication as Nos. 88 and 100 in TSS.

॥ सम्प्रदायप्रकाशिनी (काव्यप्रकाशवृहट्टीका) ॥

1397. SAMPRADĀYAPRAKĀŚINĪ.
Commentary on Kāvyaprakāśa.

Substance—Palm leaf. Size—17″ × 2″. Leaves—60. 8—10 lines per page and 60—80 letters per line. Script—Malayāḷam. No. of Granthas—2400. Incomplete.

Subject etc.—Same as No. 1396.

Remarks—The Ms. comprises only 9 Ul'āsas.

॥ सम्प्रदायप्रकाशिनी (काव्यप्रकाशबृहट्टीका) ॥

1398. SAMPRADĀYAPRAKĀŚINĪ.
Commentary on Kāvyaprakāśa.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaves—69. 10—12 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—2800.

Subject—Same as No. 1396.

Remarks—The Ms. contains Ul'āsas 1—8 and a fragment of the 9th.

॥ सम्प्रदायप्रकाशिनी (काव्यप्रकाशबृहट्टीका) ॥

1399. SAMPRADĀYAPRAKĀŚINĪ.
Commentary on Kāvyaprakāśa.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—30. 6—7 lines per page and 58—62 letters per line. Script—Grantha. No. of Granthas—750.

Subject etc.—Same as No. 1396.

Remarks—The Ms. contains the 4th and the 5th Ullāsas in fragments.

॥ साहित्यचिन्तामणिः ॥

1400. SĀHITYACINTĀMAṆI.

Substance—Palm leaf. Size—10½″ × 2″. Leaves—184. 10—12 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—4500.

Subject—Discussion on the literary figures of Śabda and Arṭha.

Beginning :

यस्य प्रसादम(त्री ?)धिगम्य सुधाशनानां
निर्विघ्नमेव निरवर्तत कार्यजातम् ।
तं वारणाननमसन्म(?)सकलान्तराय-
विच्छेदकं हृदि भजे सकलार्थसिद्धये ॥

अथेदानीं ग्रन्थकारः स्वग्रन्थस्य प्रयोजनसिद्धये प्र(तिपाद्य)स्य काव्यस्य प्रयोजनान्याह

काव्यात् पूजा यशो लाभो वैदग्ध्यमव. . . .सितिः ।
आनन्द उपदेशश्च सुसम्मिततया भवेत् ॥

लोकोत्तरवर्णनानिपुणस्य कवेः स रसशब्द. .दनात्मककर्म सत्कर्म तत् काव्यम् । तस्माद्वाल्मीकिव्यासादीनामिव सकलाराधनीयता कालिदासभोजादीनामिव यशः । भोजादेश्चित्त.....तीनावाञ्छितार्थसिद्धिर्लाभः ।

End :

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥

अत्र हुताशने भानुः पुनर्वभाविति कालभङ्गः ।
अपूर्णमोच्छ.....गृहीतमुक्तैः कर्तव्यमङ्गिनः ।

वेदादिभिः अङ्गिरसैः गृहीतमुक्तैः प्रकाशितिरोहितैः अङ्गिनो रसस्य स्थायी परिपोषणीयः ।

Colophon :

श्रीगुरुभ्यो नमः ।
इति श्रीवीरनारायणीये साहित्यचिन्तामणौ अलङ्कारशास्त्रे वृत्तनिरूपणं नाम दशमः परिच्छेदः ।

Author—Vīranārāyaṇa.

Remarks—The codex extends up to a portion of the 11th Pariccheda. The author may be identified with the Reḍḍi Prince Vema of Koṇḍaviḍu figuring as the hero of Vīranārāyaṇacarita or Vemabhūpālacarita. His date may be assigned to the period between the close of the 14th century and the beginning of the 15th. (Vide p. 314 HSP. Vol. I).

॥ साहित्यचूडामणिः (काव्यप्रकाशविभर्शिनी) ॥

1401. SĀHITYACŪḌĀMAṆI.
Commentary on Kāvyaprakāśa.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—166. 5 lines per page and 28 letters per line. Script — Malayāḷam. No. of Granthas—1450.

Subject—Same as No. 1396.

Author—Lauhityabhattagopāla.

Remarks—The Ms. comprises 7 Ullāsas only. Kumārasvāmi's reference to the author proves that he flourished earlier than the 15th century. The work is published in 2 Volumes as No. 88 and 100 in TSS.

॥ साहित्यसारः ॥

1402 A. SĀHITYASĀRA.

Substance—Palm leaf. Size—13½" × 2". Leaves—48. 11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—575.

Subject—Explication of the essentials of dramaturgy.

Beginning:

सूत्रधारो नटीयुक्तो वस्तुप्रस्तावनाविधिम् ।
कुरुते यत्र सद्वृत्तैस्तदामुखमुदाहृतम् ।
पारिपार्श्वकसंयुक्तो वा विदूषकसंयुतः ।
सूत्री यत्र(वस्तु विस्ता)रयेत् सा स्थापना स्मृता ।
तत्रैवं विधिरादिष्टो गुरुभिस्तत्त्ववेदिभिः ।
पूर्वरङ्गे विधायादौ साङ्गरङ्गव्यवस्थिते ।
कृतादरस्य सत्कारे सूत्रधारे कृताञ्जलौ ।
तद्वन्नटः प्रविश्यान्यः शुद्धाम्बरधरश्शुचिः ।
काव्यमास्थापयेदाशु सविशेषगुणाश्रयम् ।

दैविकं दैविको भूत्वा मानुषं मानुषाकृतिः।
तयोरन्यतरो भूत्वा मिश्रीभूतमपश्रमः।

End:

रौद्रो रसोऽङ्गीकर्तव्यश्चत्वारोऽङ्गास्सुविस्तराः।
दीर्घवित्तविचित्रार्था निर्विमर्शो डिमो भवेत्।
सन्धिसन्ध्यङ्गवृत्त्यङ्गवृत्तिनायकवस्तुभिः॥
भिद्यमानाङ्कसङ्केता भेद्याः स्युर्नाटके दश।
सुदृढरचितबन्धस्साधु सर्वेश्वरेण
प्रथितभरतशास्त्रप्राप्तभूषाविशेषः।
मृदुतरपदशय्याशोभितश्शश्वदुच्चैः
सरसि मनसि भूयादेव साहित्यसारः॥

Colophon:

इति सर्वेश्वराचार्यविरचिते साहित्यसारे षष्ठः प्रकाशः।
साहित्यसारः समाप्तः।

Author—Sarveśvara.

Remarks—The first Fol. is missing.

॥ सात्विकाङ्गिकभावरसविवेकः ॥

1402 B. SĀTVIKĀṄGIKABHĀVARASAVIVEKA.

Substance—Palm leaf. Size—13¼″ × 2″. Leaves—3. 11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Definitions of Bhāva, Rasa etc.

Beginning :

प्रणम्य भावरसयोरनुकर्तारमीश्वरम् ।
विवेकः क्रियतेऽस्माभिस्तात्त्विकाङ्गिकयोस्तयोः ॥
जानन्नपि जनो भेदमेतयोरभिधानतः ।
स्फुटमन्तर्न जानाति तच्छिक्षार्थोऽयमुद्यमः ॥
बाह्यार्थालम्बनो यस्तु विकारो मानसो भवेत् ।
स भावः कथ्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः ॥
पुंसः पूर्वापरीभूता सुखित्वेन व्यवस्थिता ।
बुधैरुन्मीलनी गाढं प्रीतित्वेन निगद्यते ॥

End :

शृङ्गाराकारचेष्टत्वं ललितं तदुदाहृतम् ।
दानमभ्यवपत्तिश्च तथाच प्रियभाषणम् ॥
पिकस्वरमुखत्वं यत् तदार्यकमुदाहृतम् ।
समानानां वशीयत्वं (?) कर्मणा मनसा गिरा ॥
यस्य सन्तः प्रशंसन्ति तदाहुस्तेज इत्यपि ।
ग्राह्यं किञ्चन निश्चित्य तत्साधनपरिग्रहा ॥
सुहृत्स्वपि सुधीगुप्तिः शाठ्यमित्यभिधीयते ।
शब्दः स्कन्धोऽनयो धर्म आत्मविद्या च पञ्चमः ॥
कृतमित्यस्य विज्ञानं कृती तद्वान् नरः स्मृतः ।
वयो ... ... ॥

Colophon :

Auth[illegible]

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

Remarks—Same as No. 1941 B.

(To be continued)

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE